

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 127 पुष्पम्

# शैक्षिकानुसन्धानं बुद्धिश्च

IQ EQ SQ


प्रधानसम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

लेखिका
**डॉ. सविता रायः**



शोध–प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली–16

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 127 पुष्पम्

# शैक्षिकानुसन्धानं बुद्धिश्च

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

लेखिका
**डॉ. सविता रायः**

श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः
नवदेहली-110016

प्रकाशक:
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:**
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016

© प्रकाशकाधीन:

प्रकाशनवर्षम् : 2023

ISBN : 978-81-966663-7-8

मूल्यम् : ₹ 300.00

मुद्रक:
**डी.वी. प्रिन्टर्स**
97-यू.बी., जवाहरनगरम्, देहली-110007

## ॥ मङ्गलाचरणम् ॥



शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥

# प्ररोचना

शिक्षाशास्त्रस्य मुख्यमुद्देश्यमस्ति मानवानां सर्वाङ्गीणविकास इति। गुरुकुलप्रणाल्यां विद्यार्थिनः गुरोः सन्निधाने समवस्थाय ज्ञानार्जने प्रवृत्ता भवन्ति स्म। तेनैव तेषामाध्यात्मिकाधिभौतिकाधिदैविको विकासः सम्भवति स्म। शिक्षाशास्त्रमाध्यमेन जनानां ज्ञानवृद्धिः, कौशलविकासः, प्रौद्योगिकीदक्षता, आचरणशुद्धिः, मूल्यवृद्धिश्च भवतीत्यत्र नास्ति काचिद्विप्रतिपत्तिः। व्यक्तित्वस्य विकासाय देशस्याभिवृद्धये चेदमावश्यकं भवति यत्सर्वेऽपि नागरिकाः सुशिक्षिता भवेयुरिति।

वर्तमाने प्रौद्योगिकोन्नतिशीले काले प्रायोगिकशिक्षाया महन्महत्त्वं वर्तते। तस्यामवस्थायां नित्यनूतनतथ्यानामाविष्करणं, विविधशैक्षिकपरिस्थितेरनुसन्धानञ्चा-वश्यकम्भवतीति सर्वैरपि विपश्चिदपश्चिमैरङ्गीक्रियत एव। न केवलं कक्षाऽध्ययनेन व्यक्तित्वविकासः सम्भवत्यपितु शिक्षामाध्यमेन प्राप्तस्य ज्ञानस्योचितप्रयोगेण जीवने तस्य व्यवहारेण च तद्भवितुमर्हतीति सिद्धान्तराद्धान्तः। एतत्सर्वमभिज्ञानाय शैक्षिकानुसन्धानस्यापेक्षा नितान्तमावश्यकी अस्ति।

अस्यां दिशि श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्र-विभागे सहायकाचार्यपदे कार्यरतया डॉ. सविताराय-महोदयया शैक्षिकानुसन्धानं बुद्धिश्च इत्याख्यो ग्रन्थः पञ्चस्वध्यायेषु विलिख्य प्रकाशनार्थमत्र प्रस्तुतः। ग्रन्थेऽस्मिन् ये विषयाः वर्णितास्ते शोधच्छात्राणां संस्कृतशिक्षापिपासुजनानां च ज्ञानाभिवृद्धये नितान्तमुपयोगिनः भविष्यन्तीत्यहमाशासे।

ग्रन्थोऽयं डॉ. सवितारायमहोदयाया यशोभिवर्द्धने सहायको भवेदग्रेऽप्येदृशानां विषयाणामुपर्यनुसन्धानं कृत्वा ग्रन्थलेखनेनेयं सामाजिकानां सर्वेषामुपर्युपकारं करिष्यतीत्यहं भूतभावनं भगवन्तं विश्वनाथं प्रार्थये।

शुभाशिषः शतशः सहस्रशः।

**प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

# कृतज्ञताज्ञापनम्

परिवर्तनशीले वर्तमानपरिदृश्ये प्रतिव्यवसायम् आवश्यककुशलासु परिवर्तनं जायते। अध्यापन-व्यवसायाय अपि शिक्षके शिक्षणसम्बद्धकुशलताभिः सह वर्तमाने तकनीकी-कुशलताः अपि अपेक्षिताः भवन्ति। परन्तु शिक्षणाय अत्यावश्यककुशलताः अद्यापि तथैव सन्ति। याः तकनीकी-युगात् प्राक् आसन्। शिक्षणाधिगमप्रक्रियायाः प्रभावीकरणाय एकस्मिन् शिक्षके शिक्षण-कुशलताभिः सहैव विषयज्ञानस्य, सामाजिककुशलतायाः, उच्चस्तरीयसमायोजनक्षमतायाः, धैर्यस्य, विद्यार्थिनः प्रतिभानुसारं मार्गदर्शनाय व्यापकदृष्टिकोणस्य च आवश्यकता भवति। एतस्याः सर्वस्याः योग्यतायाः विकासे शिक्षकस्य शैक्षिक-बुद्ध्या सहैव तस्य भावानात्मकाध्यात्मिकबुद्धिः साहाय्यं करोति। प्रस्तुतपुस्तके शिक्षकाणां शैक्षिक-भावनात्मकाध्यात्मिकबुद्धेः विश्लेषणं कृत्वा शिक्षकाणाम् एतासां कुशलतानां ज्ञानाय प्रयासः कृतः।

कस्यापि कार्यस्य संपादनम् अन्येषां व्यक्तीनां साहाय्यं विना कर्तुं न शक्यते। कार्यस्यास्य समाप्तावपि मम गुरुचरणानां विद्वज्जनानाञ्च आशीर्वादाः शुभचिन्तकानां सहयोगः च सदैव प्राप्तः।

सर्वप्रथमं नैकेषां शास्त्राणां ज्ञातारं, कुशलप्रशासकं, विद्यार्थिनां शुभचिन्तकं एतायाः संस्थायाः प्रगतेः कारणीभूतं नित्यं कार्यपोषकं दृढसंकल्पं श्रीलालबहादुर-शास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिं प्रो. मुरलीमनोहरपाठकमहोदयम् अभिनन्दामि प्रणमामि च।

शिक्षाशास्त्रनिष्णातां प्रो. अमितापाण्डेय-महोदयामपि विनम्र-कृतज्ञताम् अर्पयामि या सर्वदा अस्माकं मार्गदर्शनं कृतवती। भवत्याः सहयोगेन विना इदं कार्यं समये संपूर्णतां न प्राप्नोत्। शिक्षाशास्त्रविभागस्य अन्यान् गुरुजनान् प्रत्यपि कृतज्ञास्मि। ये आवश्यकतानुसारं मार्गदर्शनं परामर्शान् च प्रदाय अस्य कार्यस्य सम्पादने मम साहाय्यं कृतवन्तः।

श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य पुस्तकालयाध्यक्षं श्रीराजेशकुमारपाण्डेयवर्यं तथा च पुस्तकालयस्य सर्वान् कर्मचारिणः प्रत्यपि अहं कृतज्ञा अस्मि। समये-समये मम साहाय्यं कृतवन्तः।

पारम्परिकाधुनिकधारायाः तान् सर्वान् सेवापूर्वशिक्षक-शिक्षकान् प्रति धन्यवादं करोमि ये तथ्यानां संकलने मम पूर्णयोगेन साहाय्यं कृतवन्तः। श्रीलालबहादुरशास्त्री-राष्ट्रीयसंस्कृतविश्वविद्यालयस्य शोधप्रकाशनविभागस्य विभागाध्यक्षं प्रो. शिवशंकर-मिश्रमहाभागं शोधसहायकं डॉ. ज्ञानधरपाठकवर्यं च प्रति सादरं धन्यवादं करोमि।

तदनन्तरम् अहं सर्वेषां सादरं धन्यवादं करोमि ये प्रत्यक्षेण परोक्षेण वा यथासम्भवं सहायकाः अभवन्। तान् सर्वान् लेखकान् प्रत्यपि धन्यवादं करोमि। येषां लेखन्याः निस्सरितविचारैः तथ्यैः प्रत्यक्षेण परोक्षेण वा अहम् अस्य कार्यस्य सम्पादने प्रेरणां गृहीतवती, कार्यं सम्पूरयितुं सहायतां प्राप्तवती, तेभ्यः समेभ्यः भूयो भूयः धन्यवादान् वितीर्य विरमामि।

**सविताराय:**

# प्राक्कथनम्

वर्तमानवैज्ञानिकप्रौद्योगिकीयुगे शिक्षाया: यन्त्रीकरणम् अभवत्। छात्रा: यान्त्रिकरूपेण ज्ञानं गृहीत्वा आवश्यकतानुगुणं प्रकटयन्ति। परन्तु ज्ञानार्जन-प्रकटीकरणयो: प्रक्रिययो: व्यक्ते: संवेग-संवादकला-सामञ्जस्य-सदृशगुणानां विकास: समवरुद्ध:। सम्प्रति जना: भौतिकवादिभावमनुमन्यमाना: भवन्ति। एतस्यादेव कारणाद् वर्तमानशिक्षाप्रक्रियायां विविधेषु स्तरेषु शान्तिशिक्षामूल्य-शिक्षासदृशानां विषयाणां पाठ्यक्रमे समायोजनं कृतम्। प्राचीनभारतीयशिक्षाव्यवस्थाया: पर्यालोचनेन ज्ञायते यद् विद्यार्थिन: गुरो: सानिध्ये निवसन्त: न केवलं ज्ञानार्जनं कुर्वन्ति स्म अपि तु ज्येष्ठं प्रति श्रद्धा-सहयोग-प्रेम-सद्भाव-आदर-स्वेन्द्रिय-संयमादीनां गुणानामभिवर्द्धनं कुर्वन्ति स्म। व्यक्तित्वविकास: न केवलं ज्ञानार्जनेन भवति अपि तु तस्य ज्ञानस्य जीवने व्यावहारिकप्रयोग: अपि आवश्यक:। प्राय: एतद् मन्यते यत् कस्मिन्नपि व्यावसायिकक्षेत्रे साफल्याय मानवेषु उच्चबौद्धिक-क्षमताया: बुद्धेरुपलब्धिश्च (IQ) आवश्यकी परञ्च गतवर्षेषु अनुभूतं यत् केवलं बुद्धेरुपलब्धिरेव साफल्याय आवश्यकी नास्ति अपि तु भावात्मकाध्यात्मिक-बौद्धिकपक्षाणां सुदृढीकरणमपि आवश्यकम्।

एतत्कृते परिस्थितीनाम् अन्येषां भावानाम् अवगमनमावश्यकम्। परिस्थितीनां भावानाम् अवगमनक्षमता मानवानां संवेगात्मकप्रौढतया संबद्धा वर्तते। बौद्धिकप्रौढता ज्ञानं वा अधिगमव्यवहारपरिवर्तनस्य च परिणाम: अस्ति। शिक्षणं व्यवहारपरिमार्जनस्य साधनं वर्तते। बालकस्य अन्तर्निहितशक्तीनां गुणानां च विकासे शिक्षकस्य भूमिका महत्त्वपूर्णा वर्तते। अध्यापकशिक्षायां परिवर्तनं परिमार्जन द्वारा वर्तमानसमाजस्य परिवर्तमानावश्यकतानुगुणं शिक्षाव्यवस्थायां परिष्कारं कर्तुं शक्यते।

अत एव सामान्यशैक्षिकबुद्ध्या साकम् अध्यापकेषु भावात्मकबुद्धि: अपि आवश्यकी यया विद्यार्थिनां भावनाम् अवगम्य तै: सह तदनुभूति: स्थापयितुं शक्यते। वर्तमानसमये जना: स्वसंवेगमनोवेगाभ्यां सम्मुखी: कुर्वान: सन्ति। अस्यां परिस्थितौ अन्येषां विषये समाजविषये वा चिन्तनावकाश: नास्ति।

आध्यात्मिकबुद्धिः मानवेषु मूल्येन आत्मज्ञानेन च अन्येषां कृतेऽपि दृष्टिं विकासयति। येन प्रशिक्षणकार्यक्रमेष्वपि सेवापूर्वशिक्षकाणां व्यक्तित्वविकासे साहाय्यं भविष्यति।

प्रस्तुतपुस्तकस्य विवरणं पञ्चसु अध्यायेषु इत्थं वर्णितं वर्तते। प्रथमाध्याये प्रस्तावना प्राचीनभारतीयसन्दर्भे बुद्धेः अवधारणा, पाश्चात्याधुनिकसन्दर्भे बुद्धेः अवधारणा, बुद्धेः विविधप्रकाराः, अनुसन्धानस्य आवश्यकता, अनुसन्धाने समस्याकथनम्, पारिभाषिकशब्दावली, शोधचराः, शोधोद्देश्यानि, शोधपरिकल्पना, शोधसीमाङ्कनञ्च इमे विषयाः वर्णिताः सन्ति। द्वितीयाध्याये सम्बन्धितसाहित्याध्ययनेन सम्बन्धितविषयाणां वर्णनं विद्यते। तृतीयाऽध्याये अनुसंधानाभिकल्पस्य विवरणं वर्तते यत्र शोधविधिः, शोधप्रतिदर्शः, शोधस्योपकरणम्, आधारसामग्रीणां सङ्कलनार्थं सम्प्रत्यात्मकरूपरेखा, आधारसामग्रीणां विश्लेषणार्थं सम्प्रत्यात्मकरूपरेखानाञ्च वर्णनं विद्यते। चतुर्थाध्याये आधारसामग्रीणां सांख्यिकीयविश्लेषणं निर्वचन-परिकल्पनापरीक्षणञ्च वर्तन्ते। पञ्चमाध्याये सामान्यीकरणं, निष्कर्षनिरूपणं, शैक्षिकनिहितार्थश्च निबद्धाः सन्ति।

**सविताराय**

# विषयानुक्रमणिका


| | | |
|---|---|---|
| | **प्ररोचना** – प्रो. मुरलीमनोहरपाठकः, कुलपतिः | v |
| | **कृतज्ञताज्ञापनम्** – सविताराय: | vii |
| | **प्राक्कथनम्** – सविताराय: | ix |
| अध्यायः | | पृष्ठसंख्या |


## प्रथमोऽध्यायः


| | | |
|---|---|---|
| 1.1 | प्रस्तावना | 1 |
| 1.2 | प्राचीनभारतीयसन्दर्भे: बुद्धेरवधारणा | 3 |
| 1.3 | पाश्चात्यसन्दर्भे: बुद्धेरवधारणा | 5 |
| 1.4 | बुद्धेः विविधस्वरूपम् | 7 |
| 1.4.1 | शैक्षिकबुद्धेरवधारणा | 10 |
| 1.4.2 | भावात्मकबुद्धेरवधारणा | 11 |
| 1.4.3 | आध्यात्मिकबुद्धेरवधारणा | 15 |
| 1.5 | शिक्षाक्षेत्रे अनुसन्धानम् | 24 |
| 1.6 | अनुसंधानस्य तात्पर्यम् | 24 |
| 1.7 | अनुसन्धानस्य प्रकृतिः | 28 |
| 1.8 | अनुसन्धानस्य वर्गीकरणम् | 29 |
| 1.9 | अनुसन्धानस्यौचित्यम् | 33 |
| 1.10 | अनुसन्धानसमस्या | 38 |
| 1.11 | अनुसन्धानसमस्यायाः विशेषता | 3 |
| 1.12 | अनुसन्धानसमस्यायाः स्रोतांसि | 40 |
| 1.13 | अनुसन्धानप्राक्कल्पना-अनुसन्धानसमस्ययोर्मध्ये विभेदाः | 43 |
| 1.14 | अनुसन्धानसमस्याकथनम् | 44 |

1.15 पारिभाषिकशब्दावली 44

1.16 अनुसन्धानचरा: 45

1.17 अनुसन्धानस्योद्देश्यानि 46

1.18 अनुसन्धानप्राक्कल्पना 48

1.18.1 अनुसन्धानप्राक्कल्पनाया: विशेषता: 50

1.18.2 अनुसन्धानप्राक्कल्पनाया: महत्त्वम् 51

1.18.3 अनुसन्धानप्राक्कल्पनाया: प्रकारा: 53

1.19 अनुसन्धानसीमाङ्कनम् 55

## द्वितीयोऽध्याय:

सम्बन्धितसाहित्याध्ययनम् 57–71

## तृतीयोऽध्याय:

अनुसन्धानाधिकल्प: 72

3.1 भूमिका 72

3.2 अनुसन्धानविधि: 72

3.2.1 ऐतिहासिकविधि: 73

3.2.2 प्रयोगात्मविधि: 74

3.2.3 तुलनात्मककार्य–कारणविधि: 74

3.2.4 सह–संबंधप्रविधि: 74

3.2.5 एकलाध्ययनविधि: 74

3.2.6 वर्णनात्मकविधि: 75

3.2.7 सर्वेक्षणविधि: 75

3.3 अनुसन्धानप्रतिदर्श: 76

3.3.1 प्रतिदर्शस्य अवधारणा 77

3.3.2 अनुसन्धानप्रतिदर्शस्य विशेषता 77

3.3.3 अनुसन्धान-प्रतिदर्शचयनस्य विधय: 78

3.4 अनुसन्धानस्योपकरणम् 84

3.5 आधारसामग्रीणां सङ्कलनार्थं सम्प्रत्यात्मकरूपरेखा 86

3.6 आधारसामग्रीणां विश्लेषणार्थं सम्प्रत्यात्मकरूपरेखा 86


## चतुर्थोऽध्याय:


आधारसामग्रीणां विश्लेषणं निर्वचनञ्च 88–152


## पञ्चमोऽध्याय:

## सामान्यीकरणं निष्कर्षनिरूपणञ्च


5.1 भूमिका 153

5.2 परम्परागतधाराया: सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धे: विश्लेषणात्मकमध्ययनस्याधारेण सामान्यीकरणं निष्कर्षनिरूपणञ्च 153

5.3 आधुनिकधाराया: सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिक-बुद्धे: विश्लेषणात्मकमध्ययनस्याधारेण सामान्यीकरणं निष्कर्षनिरूपणञ्च 156

5.4 परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां शैक्षिकभावात्मका-ध्यात्मिकबुद्धे: तुलनात्मकमध्ययनस्याधारेण सामान्यीकरणं निष्कर्षनिरूपणञ्च 158

5.5 लिङ्गाधारेण परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धे: तुलनात्मकमध्ययनाधारेण सामान्यीकरणं निष्कर्षनिरूपणञ्च 162

5.6 शैक्षिकनिहितार्थ: 167


## सन्दर्भग्रन्थसूची


परिशिष्टम्

# आरेखाः ( तालिकानां ) सूची


| क्र.सं. | आरेखः | पृष्ठसंख्या |
|---|---|---|
| 1.1 | थार्नडाइकमहोदयेन वर्णिताः बुद्धेस्त्रयः प्रकाराः | 6 |
| 1.2 | विविधबुद्धिषु सम्बन्धः | 9 |
| 1.3 | मस्तिष्के विविधबुद्धेः अवस्थिताः स्थितिः | 9 |
| 1.4 | शैक्षिकबुद्धेः संप्रत्ययः | 10 |
| 1.5 | भावात्मकबुद्धेः विविधायामाः | 11 |
| 1.6 | गार्डनरमहोदयानुसारेण भावात्मकबुद्धेः प्रकाराः | 12 |
| 1.7 | अन्तःव्यक्तिरन्तवैयक्तिकयोश्च योग्यतायाः वर्णनम् | 13 |
| 1.8 | आध्यात्मिकबुद्धेरन्तर्निहितसिद्धान्ताः | 18 |
| 1.9 | राबर्टइमान्समहोदयेन आध्यात्मिकबुद्धेः पञ्चतत्त्वानि | 19 |
| 1.10 | सिन्डीविगलवर्थमहोदयेन उल्लिखितानि आध्यात्मिकबुद्धेः एकविंशतिकौशलानि | 20 |
| 1.11 | डेविडबी.किंगमहोदयेन वर्णिताः आध्यात्मिकबुद्धेः आयामाः | 21 |
| 1.12 | व्यवसायस्य विभिन्नक्षेत्रे भावात्मकबुद्धेरुपयोगिता | 34 |
| 1.13 | सामाजिकव्यवहारसम्पादने भावात्मकबुद्धेः महत्त्वम् | 35 |
| 3.1 | प्रतिदर्शचयनस्य विधयः | 79 |
| 4.1 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विविधायामानामाधारेण विश्लेषणात्मकमध्ययनम् | 90 |
| 4.2 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण विवरणम् | 91 |
| 4.3 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 93 |

| | | |
|---|---|---|
| 4.4 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 95 |
| 4.5 | परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विवरणम् | 97 |
| 4.6 | परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 99 |
| 4.7 | परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्कानां वर्गानामाधारेण विवरणम् | 100 |
| 4.8 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विविधायामानामाधारेण विश्लेषणात्मकम् अध्ययनम् | 102 |
| 4.9 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण विवरणम् | 104 |
| 4.10 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 105 |
| 4.11 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 107 |
| 4.12 | आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विवरणम् | 108 |
| 4.13 | आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 110 |
| 4.14 | आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्काः वर्गानां प्रतिशताधारेण विवरणम् | 112 |
| 4.15 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः तुलनात्मकं विवरणम् | 114 |
| 4.16 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 116 |
| 4.17 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः समेकित-प्राप्ताङ्कानां प्रतिशताधारेण तुलनात्मकविवरणम् | 118 |

| | | |
|---|---|---|
| 4.18 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 120 |
| 4.19 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 12 |
| 4.20 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकित– प्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 124 |
| 4.21 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 126 |
| 4.22 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः तुलनात्मकविवरणम् | 127 |
| 4.23 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः तुलनात्मकविवरणम् | 130 |
| 4.24 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 132 |
| 4.25 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण तुलनात्मकविवरणम् | 134 |
| 4.26 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तवृत्तये प्रतिशतानां तुलनात्मकविवरणम् | 136 |
| 4.27 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 138 |
| 4.28 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 141 |
| 4.29 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 143 |
| 4.30 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः तुलनात्मकविवरणम् | 145 |

# सारिणीनां सूची


| क्र.सं. | सारिणी | पृष्ठसंख्या |
|---|---|---|
| 1.1 | बुद्धेः विविधस्वरूपम् | 8 |
| 3.1 | प्रतिदर्शः | 83 |
| 3.2 | प्रतिदर्शस्य आकारः | 84 |
| 4.1 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विवरणम् | 89 |
| 4.2 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण विवरणम् | 91 |
| 4.3 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 92 |
| 4.4 | परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 94 |
| 4.5 | परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विवरणम् | 96 |
| 4.6 | परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 98 |
| 4.7 | परम्परागतधाारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 100 |
| 4.8 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विवरणम् | 101 |
| 4.9 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण विवरणम् | 103 |
| 4.10 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 105 |

| | | |
|---|---|---|
| 4.11 | आधुनिकधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 106 |
| 4.12 | आधुनिकधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विवरणम् | 108 |
| 4.13 | आधुनिकधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम् | 109 |
| 4.14 | आधुनिकधाराया: सेवापूर्वशिक्षकाणां आध्यात्मिकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 111 |
| 4.15 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिक-बुद्धेस्तुलनात्मकं विवरणम् | 113 |
| 4.16 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 115 |
| 4.17 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः समेकित- प्राप्ताङ्कानां प्रतिशताधारेण तुलनात्मकं विवरणम् | 117 |
| 4.18 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 119 |
| 4.19 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 121 |
| 4.20 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकित- प्राप्ताङ्काः प्रतिशताधारेण तुलनात्मकविवरणम् | 123 |
| 4.21 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिक-बुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 125 |
| 4.22 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिक-बुद्धेः समेकितप्राप्ताङ्काः प्रतिशतानां तुलनात्मकविवरणम् | 127 |
| 4.23 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्व-शिक्षकाणां शैक्षिकबुद्धेस्तुलनात्मकविवरणम् | 129 |

| | | |
|---|---|---|
| 4.24 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्व-शिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 131 |
| 4.25 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण तुलनात्मकम् विवरणम् | 133 |
| 4.26 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तये प्रतिशतानां तुलनात्मकविवरणम् | 135 |
| 4.27 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम् | 137 |
| 4.28 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्काः प्रतिशताधारेण तुलनात्मकम् विवरणम् | 140 |
| 4.29 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम् | 142 |
| 4.30 | लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः समेकितप्राप्ताङ्काः प्रतिशतानां तुलनात्मकविवरणम् | 144 |
| 4.31 | परम्परागताधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्म-काध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम् | 147 |
| 4.32 | आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्म-काध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम् | 148 |
| 4.33 | परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मक आध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम् | 149 |
| 4.34 | लिङ्गाधारेण परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मक आध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम् | 150 |

4.35 लिङ्गाधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मक-आध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम् 151

4.36 लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकता-परीक्षणम् 152

# प्रथमोऽध्यायः

## 1.1 प्रस्तावना

**नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।**
**कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥**

इति अग्निपुराणवचनाद् ज्ञायते यद् इह जगति नरत्वं तत्रापि शक्तिः अर्थात् प्रतिभा बुद्धिर्वा सुदुर्लभा भवति, शक्तिस्त्रिविधा प्रोक्ता- मन्त्रशक्ति-उत्साहशक्ति-प्रभुशक्तिभेदेन। तदुक्तं महाकविमाघेन शिशुपालवधमहाकाव्ये- तस्याः शक्तेः महत्त्वप्रतिपादनक्रमे व्यक्तेः बुद्धिविषये स्पष्टं कथितम्। तत्र व्यक्तेः व्यक्तित्वस्य विकासः लोके अर्थात् समूहे समाजे वा भवति। व्यक्तित्वविकासाय बुद्धेः महत्त्वं स्वयमेव सिद्धम्। बुद्धेः सम्पोषने संवर्द्धने परिवारस्य समाजस्य विद्यालयस्य वातावरणस्य च महती भूमिका भवति। मानवः एकः सामाजिकप्राणी अस्ति। मनुष्यः समाजं परित्यज्य क्षणमपि जीवितुं नैव प्रभवति। समाजस्य कृते सोऽपि उत्तरदायित्वं निर्वाहयति, अतः स्व-जीवने सामाजिककर्त्तव्यानां समीचीनतया परिपालनमेव मनुष्यस्य परमं लक्ष्यं भवति। विद्यालयोऽपि समाजस्य एको भागः। यतो हि समाजस्य सर्वाणि कार्याणि विद्यालये प्रतिफलितानि भवन्ति। अत एव विद्यालये प्रदत्ता शिक्षा सामाजिकभावनाया विकासक्षेत्रे प्रमुखस्थानम् आवहति।

शिक्षा मानवजीवनस्य विकासार्थम् आजीवनं जायमाना एका प्रक्रियाऽस्ति। मानवः जन्मतः मृत्युपर्यन्तं यत्किमपि शिक्षति, अनुभवति तत्सर्वं शिक्षान्तर्गतमेव परिगण्यते। भौतिक-सामाजिकवातावरणेन सह समायोजनमपि शिक्षैव सम्भवति। डॉ. ए.एस. अल्तेकरमहाभागानुसारेण- ''शिक्षा प्रकाशशक्तेः एतादृशं प्रेरणास्रोतः मन्यते स्म, यदस्माकं शारीरिकमानसिकभौतिकाऽध्यात्मिकशक्तीनां क्षमतानाञ्च सततसामञ्जस्यपूर्णविकासं विधाय अस्माकं स्वभावं परिवर्तयति परिवर्द्धयति च।''

मनुष्यस्य सर्वांगीणोन्नतेः समाजस्य सर्वविधोन्नतेः सहायिका च भवति शिक्षा। इयं शिक्षा मानवस्य निर्माणं कृत्वा तं व्यवहारयोग्यं विदधाति। शिक्षायाः माध्यमेनैव अन्तर्निहितगुणानां विकासः सम्भवति। अस्य विकासस्य कृते विद्यालयः यः लघुसमाजस्य प्रतिबिम्बोऽस्ति, एतादृशं वातावारणं समुपस्थापयति यत्र राष्ट्रस्य भविष्यस्य निर्माणं भवति। सा शिक्षा अपि समाजस्य प्रतिबिम्बं, लघुसमाजरूपविद्यालयस्य वातावरणनिर्माणकार्यस्य कर्णाधारभूतो भवति शिक्षकः। एच. जी. वेल्समहोदयानुसारम् – "अध्यापकः इतिहासस्य रचनाकर्ता, कस्यापि देशस्य इतिहासः तस्य देशस्य विद्यालयाद् विरचितो भवेत्। एवञ्च विद्यालयः अध्यापकगुणेभ्योः भिन्नः नास्ति अपितु आधार एव।" (Teacher is the maker of the history . The history of a nation is written in its schools and can not be different from the quality of their teacher) रवीन्द्रनाथटैगोरमहोदयेन उक्तं यत्– "एकः अध्यापकः तावत् पर्यन्तम् अध्यापयितुं न शक्नोति यावत् स स्वयम् अध्ययनं न करोति। यथा दीपः अन्येषां कृते आलोकं न प्रददाति यावत् स स्वयं न प्रज्वलति। तदानीमेव अध्यापकः स्वज्ञानक्षेत्रे सर्वोच्चस्थाने स्थित्वा आत्मनः मस्तिष्के ज्ञानं समावेशयति। यदा स अध्यापकः छात्राणां कृते अध्ययनं करोति।"

अध्यापकानामुपरि देशनिर्माणस्य गुरुदायित्वं न्यस्तं वर्तते। अध्यापकस्य सफलप्रयासमाध्यमेन देशः विकासोन्मुखसमृद्धिं प्रति अग्रे गच्छति। तदर्थम् उत्तमप्रशिक्षणप्राप्ताः अध्यापकाः देशस्य कृते उत्तमनागरिकाणां निर्माणं कुर्वन्ति। अध्यापकशिक्षायाः महत्त्वं डा. राधाकृष्णन्महोदयेन प्रकटितं यत् समाजे शिक्षकाणां स्थानं महत्त्वपूर्णं वर्तते। शिक्षकस्य योग्यता तस्य प्रशिक्षणं शिक्षायां परिचिनोति। वस्तुतः, कस्यापि देशस्य अर्थनैतिकस्तरम् अध्यापकाश्रितं भवति। अतः सम्पूर्णशिक्षाव्यवस्थायाः सम्पूर्णाधिकारी अध्यापक एव इति वक्तुं शक्यते।

शिक्षाप्रक्रिया त्रिमुखिप्रक्रियामेव समाश्रित्य तिष्ठति यथा– शिक्षकः, शिक्षार्थी, पाठ्यवस्तु च इति। एतेषां त्रयाणां पारस्परिकसहयोगेन शिक्षणं भवति। अत्र शिक्षकस्य स्थानं सर्वोपरि वर्तते। शिक्षकः समाजस्य स्थपतिः कलाकारश्च भवति। सः शिक्षकः एतादृशानां योग्यनागरिकाणां निर्माणं करोति येन समाजस्य राष्ट्रस्य समुन्नतिः विकासश्च सम्भवति, एतस्मात् कारणात् शिक्षकस्य समाजे महत्त्वपूर्णं स्थानं विद्यते। राष्ट्रीयशिक्षानीतेः (1986) एवं संशोधितप्रारूप–(1992) प्रतिवेदनानुसारेण कस्यापि समाजस्य सांस्कृतिकसामाजिकदृष्टिकोणस्य रूपरेखा अध्यापकादेव ज्ञायते।

अध्यापकैः प्रदत्ता शिक्षा व्यक्तेः जीवनस्य गुणवत्तायाम् अनिवार्याङ्गरूपा अस्ति। मानवोन्नतेः मूलसाधनं शिक्षा। शिक्षया मानवस्य मूलप्रवृत्तीनां जन्मजातशक्तीनाञ्च विकासः, तस्य ज्ञानकौशलयोः वृद्धिः, व्यवहारपरिवर्तनञ्च सम्भवति। विषयेऽस्मिन् पेस्टालॉजीमहोदयस्य कथनमस्ति- ''शिक्षा मानवस्य जन्मजातशक्तीनां नैसर्गिकः समरूपः प्रगतिशीलश्च विकासोऽस्ति।''

शिक्षकस्य उद्देश्यं तावत् छात्राणां त्रयाणां पक्षाणां (ज्ञानात्मकपक्षः भावात्मकपक्षः क्रियात्मकपक्षश्च) विकासं कृत्वा तेषु संपूर्णव्यक्तित्वस्य विकसनम्। केनापि आचार्येण उक्तं सुस्थिरशरीरनिर्माणाय यथा सुभोजनस्य आवश्यकताऽस्ति तथैव मानवस्य सर्वाङ्गीणविकासाय शिक्षायाः उपयोगित्वं विद्यते। तत्र ज्ञानात्मकपक्षः भावात्मकपक्षः क्रियात्मकपक्षश्चेति त्रयः पक्षाः अपेक्ष्यन्ते। पक्षत्रयं छात्राणां सर्वाङ्गीणविकासाय इदमावश्यकं यत् शिक्षकः छात्रभावनां विज्ञाय तैः सह उचितप्रकारेण अन्तःक्रियां सम्पादयेत्, अथ च तदनुभूतिं स्थापयेत्। एतदर्थं शिक्षकेषु भावात्मकप्रज्ञायाः महती आवश्यकता वरीवर्ति। अतः स्वसंवेगानाम् उचितप्रकारेण नियन्त्रणं कृत्वा छात्रैः सह तदनुभूतिं स्थापयेत्। केनचित् मनोवैज्ञानिकानुसारेण शैक्षिकबुद्धेः भावात्मकबुद्धेश्च प्रभावी-अनुप्रयोगे आध्यात्मिक-बुद्धेः मूलाधारस्य समर्थनम् आवश्यकं वर्तते। अत एव शिक्षके शैक्षिकभावात्मक-बुद्ध्या सह आध्यात्मिकबुद्धेः उपस्थितिः अपेक्षिता भवति।

## 1.2 प्राचीनभारतीयसन्दर्भे बुद्धेरवधारणा

भारतीयदर्शनं सत्त्वरजस्तमादीनां गुणानां सत्तां स्वीकरोति। एतेषां गुणानां प्रभावेण बुद्धिरपि त्रिधा भवति यथा सत्त्वगुणेन यथार्थबुद्धिः, रजोगुणेन अयथार्थबुद्धिः चञ्चलबुद्धिर्वा एवञ्च तमःप्रभावेण विपरीता बुद्धिः भवति। यथा श्रीमद्भगवद्-गीतायां वर्णितम्-

**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।**
**बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥**

**यया धर्ममधर्मं च कार्यं चाकार्यमेव च।**
**अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥**

**अधर्मं धर्ममिति या मन्यते तमसावृता।**
**सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥**

आसु तिसृषु बुद्धिषु सात्त्विकबुद्ध्या युक्त: मनुष्य एव सांसारिकभौतिकताया: विमुक्त: अथवा कर्मयोगी अस्ति। गीताया: द्वितीयेऽध्याये व्यवसायात्मिकाबुद्धे: वर्णनं प्राप्यते–''व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन''। व्यवसायात्मिकाबुद्धे: तात्पर्यं तया दृढप्रतिज्ञबुद्ध्या सा वर्तते। या व्यक्तिम् अहर्निशं लक्ष्यकेन्द्रितां कृत्वा उद्यमशीलतायै अभिप्रेरयति। पण्डितसातवालेकरस्य शब्देषु–'व्यवसा-यात्मिकाबुद्धे: अर्थोऽस्ति प्रयत्नकारिका बुद्धि:, निष्ठाधात्रीबुद्धि:, उद्योगिकाबुद्धि:, वारं वारं प्रयत्नस्योत्साहदायिका बुद्धि: च।'

भारतीयसन्दर्भे बुद्धितत्त्वस्य अवगत्यर्थमादौ अन्त:करणतत्त्वस्य ज्ञानमवश्यं सापेक्षितं ज्ञातव्यं च विद्यते। अन्त:करणतत्त्वस्य अवगते सति बुद्धितत्त्वस्य ज्ञानं सम्यग् भवितुमर्हति इति भारतीयदार्शनिकानामभिमतम्। अन्त:करणं तावत् शरीरान्त:-स्थितानि इन्द्रियाणि। तच्च साक्षात् वस्तूनां ग्रहणं नैव करोति, अपि च तेषां ज्ञानं बाह्यज्ञानेन्द्रियेण सम्भवति। यद्यपि अन्त:करणं मूलत: एकमेव तथापि तस्य प्रमुखतया वृत्तय: वृत्तिमनश्चित्ताहङ्कारा:। वेदान्तदर्शने अन्त:करणस्य निश्चयात्मिकावृत्ति: बुद्धिर्भवति। संकल्पविकल्परूपसंशयात्मिकावृत्ति: मन:। स्मरण–चिन्तन–रूपादिवृत्ति: चित्तम्, गर्वरूपावृत्तिश्च अहङ्कारो भवतीति।

सांख्यदर्शने तावत् ''अध्यवसायो बुद्धिरिति''। सांख्याभिमतं यत् बुद्धे: लक्षणं भवति, तस्य लक्षणस्य व्याख्यानावसरे व्याख्याकारै: निश्चय एव अध्यवसायशब्दार्थ: स्वीकृत:। अत: निश्चिनोति या सा बुद्धि: अर्थात् या निश्चयं करोति सा बुद्धिरिति। धर्म:, ज्ञानं, वैराग्यमैश्वर्यञ्च बुद्धे: सात्त्विकगुण:, तद्विपरीतम् अधर्म:, अज्ञानम्, अवैराग्यमनैश्वर्यञ्च बुद्धे: नामान्तरं महद् भवति। कस्यापि विषयसम्बन्धस्य निश्चय: बुद्ध्या एव सम्भवति, बुद्धिमन्तरा तादृशनिश्चय: नैव सम्भवति। तत्र सत्त्वगुणस्य प्राधान्यं भवति, किन्तु रजो–तमोगुणस्य विद्यमानता तत्र तिरोहितरूपेण सम्भवति।

भारतीयदर्शने तावत् मानवानां या मूलभूता प्रवृत्तिर्भवति तस्या: प्रवृत्तेरन्तर्गताया: बुद्धि: ज्ञानेन सह सम्बद्धा भवतीति, यत: ज्ञानप्राप्ते: साधनं बुद्धिरेव भवतीति भारतीयदार्शनिकानामभिमतम्। बुद्धिस्तावत् मानवानां सामान्यक्षमताया: ग्रहणशक्तिभूता। तर्क–स्मृति–निश्चयज्ञानमित्यादिकं तु बुद्धे: धर्मो भवति। भारतीयदर्शने विद्यमानतत्त्वस्य पञ्चकोशस्य विश्लेषणावसरे विज्ञानमयकोशेन सह इयं बुद्धि: सम्बद्धा विद्यते इति भारतीयदार्शनिकै: स्वीकृतम्। बुद्धौ धारणाशक्ते: विद्यमानत्वाद् अथर्वसंहितायां बुद्धे: नामान्तरं मेधा भवतीति

प्रयुक्तं विद्यते। उपनिषत्साहित्ये बुद्धेः अनेके पर्यायाः सन्ति। तथाहि–

**संज्ञानं अज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिः धृतिः**
**मतिः मनीषा जूतिः स्मृतिः संकल्पः रतुः**
**असुः कामो वश सर्वाण्येवैतानि प्रज्ञानस्य**
**नामधेयानि भवन्ति।**

भारतीयदर्शनानुसारेण उपर्युक्ताः सर्वाः वृत्तयः प्रज्ञानात्मकब्रह्मण भिन्नभिन्न-रूपाणि एव। प्रज्ञा-प्रज्ञानयोर्वा सन्दर्भः बहुव्यापकः। प्रज्ञायाः स्थानं बुद्धे उच्चत्तरं विद्यते। बुद्धेर्बलात् व्यक्तिः स्वयं स्वकार्यस्य कर्ता भोक्ता इति मन्यते, तं मत्वा च सुखवान् दुःखवाँश्च भवति। काम-क्रोध-लोभादिवृत्तिविशिष्टो भूत्वा सांसारिकबन्धनेन निबद्धो भवति। बुद्धेः वैपरीत्यभूता या प्रज्ञा सा व्यक्तेः सत्यमार्गं प्रशस्तयति। संसारदुःखात् संसारवृत्तिं या विमुञ्चति सा श्रेष्ठबुद्धिः प्रज्ञा एव।

बुद्धेनाम 'निश्चयात्मिकान्तःकरणवृत्तिः' अर्थाद् अन्तःकरणस्य या निश्चयात्मिका वृत्तिः भवति सा बुद्धिरेव। इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति। यथा उक्तञ्च–

**बुद्धिर्बुद्धीन्द्रियैः सार्धं सवृत्तिः कर्तृलक्षणः।**
**विज्ञानमयकोशः स्यात्पुंसः संसारकारणम्॥**

(विवेकचूडामणिः 186)

अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यवहारिको जीव इत्युच्यते।

## 1.3 पाश्चात्त्यसन्दर्भे बुद्धेरवधारणा

बुद्धिपदार्थः एकः एतादृशः सम्प्रत्ययोऽस्ति यस्य प्रयोगः जनैः झटिति अधिगम-अवगमन-तार्किकचिन्तनमित्यादिगुणानाम् अर्थे प्रयुज्यते। मनोविज्ञाने बुद्धिशब्दस्य प्रयोगः विशेषार्थे भवति। यद्यपि विगतशतवर्षेभ्यः बुद्धिसम्प्रत्ययस्य स्पष्टीकरणार्थं बहूनि अनुसन्धानकार्याणि कृतानि सन्ति। तथापि अद्यावधि बुद्धेः सन्दर्भे कस्यचिदपि सर्वमान्योत्तरस्य प्राप्तिर्न जाता। बुद्धिः सा क्षमतास्ति यस्याः आभासः व्यक्तेः कार्येण भवति। अत एव बुद्धिः अप्रत्यक्षरूपेण अवगन्तुं शक्यते। बुद्धेः अप्रत्यक्षताकारणादेव मनोवैज्ञानिकैः एषा विभिन्नरूपेण परिभाषिता। केचन मनोवैज्ञानिकाः बुद्धेः अनुकूलनप्रकृतेरुपरि बलं दत्तवन्तः, केचन बुद्धिम्

अधिगमक्षमतारूपेण स्वीकुर्वन्तः, केचन अमूर्तचिन्तनस्य योग्यतायाः रूपेण अथ च केचन पूर्वाधिगमस्य मात्ररूपेण बुद्धेः इति अङ्गीकृतवन्तः। एतासां सर्वासां परिभाषाणां केषुचित् वर्गेषु विभागाः कर्तुं शक्यन्ते-

1. प्रथमश्रेण्यां तासां परिभाषाणां समावेशः कर्तुं शक्यते यस्यान्तर्गते बुद्धिः समायोजनक्षमता इति विद्वांसः स्वीकृतवन्तः।
2. द्वितीयश्रेण्यां तासां परिभाषाणां समावेशः वर्तते यस्यान्तर्गते बुद्धिः अधिगमक्षमतारूपेण स्वीकृतास्ति।
3. तृतीयश्रेण्यां तासां पारिभाषाणां समावेशः वर्तते यस्यान्तर्गते अमूर्तचिन्तनस्य क्षमतारूपेण बुद्धेः पारिभाषीकरणं क्रियते।

प्रारम्भे मनोवैज्ञानिकाः 'बुद्धिं केवलम् एका क्षमतैव रूपेण' प्रस्तुतवन्तः परञ्च आधुनिकमनोवैज्ञानिकैः इदमनुभूतं यद् वास्तविकरूपेण बुद्धिः केवलं एका क्षमता नास्ति अपितु एषा बुद्धिः अनेकासां क्षमतानां समुच्चयरूपाऽस्ति। थॉर्नडाइकमहोदयानुसारेण बुद्धेः तिस्रः प्रकाराः सन्ति- मूर्तबुद्धिः (Concrete Intelligence), अमूर्तबुद्धिः (Abstract Intelligence) सामाजिकबुद्धिश्च (Social Intelligence)। आरेखमाध्यमेन (आरेख- 1.1) अस्य स्पष्टीकरणम् अधोवर्णितमस्ति।

**आरेखः (1.1)**

**थार्नडाइकमहोदयेन वर्णिताया बुद्धेस्त्रयः प्रकाराः**



वैश्लरमहोदयानुसारेण- "बुद्धिः एका समुच्चभूता सार्वजनिकक्षमता वा अस्ति यस्याधारेण व्यक्तिः उद्देश्यपूर्णक्रियां करोति, विवेकशीलचिन्तनं करोति अथ च वातावरणेन सह प्रभावशालीरूपेण समायोजनं स्थापयति।" मानवानां व्यवहारे निहितबुद्धौ नैकेषां गुणानां परीक्षणमन्तरा कोऽपि जनः बुद्धिमान् बुद्धिहीनो वा इति वक्तुं न शक्यते। थर्स्टनमहोदयः (1938) स्वाध्ययनस्याधारेण इदं स्पष्टं कृतवान् यद् बुद्धौ समग्ररूपेण सप्त एतादृशाः क्षमताः विद्यन्ते या 'प्रधानमानसिकक्षमता' इति नाम्ना अभिधीयन्ते। ताश्च क्षमताः सन्ति- शाब्दिकार्थक्षमता (Verbal MeaningAbility or V), शब्दप्रवाहक्षमता (Word – fluencyAbility or W), स्थानिकक्षमता (SpatialAbility or S), आङ्किकक्षमता (NumericalAbility or N), तार्किकक्षमता (ReasoningAbility or R), स्मृतिक्षमता (MemoryAbility or M) प्रत्यक्षज्ञानात्मकगतिक्षमता च (Perceptual SpeedAbility or P)। गिलफोर्डमहोदयः बुद्धेः 'त्रि-आयामी' इति स्वीयसिद्धान्ते बुद्धौ समग्ररूपेण पञ्चाशदुत्तरैकशतं (150) योग्यतां सम्मेलयति स्म। वर्ननमहोदयेन बुद्धेः जननिकक्षमतायाः, प्रेक्षितक्षमतायाश्च परीक्षणप्राप्ताङ्करूपेण स्पष्टीकरणं विहितम्।

बुद्धेः प्राचीनार्वाचीनावधारणयोर्विश्लेषणेन ज्ञायते यत् पाश्चा-त्यमनोवैज्ञानिकेषु बुद्धिस्वरूपसन्दर्भे मतवैभिन्नं दृश्यते। पाश्चा-त्यमनोवैज्ञानिकैः बुद्धिसन्दर्भं स्वीकृत्य यत्तथ्यं वर्तमानसन्दर्भे प्रस्तुतं तत्तथ्यं भारतीयदर्शनेषु उत्कृष्टरूपेण पूर्वतः वर्तत एव। अत्र इदमपि अवधेयं यद् भारतीयदर्शने तर्क-स्मृति-निश्चयज्ञानादिबुद्धेः धर्मत्वेन अंगीकारः विद्यते। अनेन धर्मेणैव बुद्धिः समस्यायाः समाधाने, अर्मूतपदार्थानां चिन्तने, पूर्वानुभवजन्यज्ञाने, नवीनासु परिस्थितिषु समायोजने च सक्षमा अस्ति। अत एव विभिन्नयोग्यतानां समुच्चरूपेण बुद्धिः स्वीकार्या।

## 1.4 बुद्धेः विविधस्वरूपम्

पूर्वस्यां शताब्द्यां बुद्धेः सम्प्रत्ययेषु विशालं परिवर्त्तनम् अभवत्। एतेन परिवर्त्तनेन बुद्धिलब्धेः सम्प्रत्ययेषु अपि परिवर्त्तनं जातम्। वर्त्तमानसमये मनोवैज्ञानिकैः बुद्धिलब्ध्या सहैव भावात्मिकलब्धेः आध्यात्मिकलब्धेश्च परिचयं कर्त्तुम्, तयोः समन्वितव्याख्यां कर्त्तुं च प्रयासाः कृताः। बुद्धिविषये मनोवैज्ञानिकाः दार्शनिकाश्च स्व-स्वदृष्टिकोणानुसारं स्व-स्वविचारं दत्तवन्तः। अद्य मानवः बुध्या एव श्रेष्ठतमः प्राणीति ज्ञायते। जन्मना एव केचन जनाः प्रखरबुद्धिसम्पन्नाः

न्यूनबुद्धिसम्पन्नाः वा भवन्ति। बुद्धिः प्रत्यक्षरूपेण अवलोकनीया न भवति। अतः कथयितुं शक्यते यद् बुद्धौ एव प्राक्कल्पनात्मिका शक्ति विद्यते। उक्तञ्च 'बुद्धिर्यस्य बलं तस्य' अर्थात् यस्य पार्श्वे बुद्धिरस्ति स एव बलवान् भवति। परन्तु

**यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।**
**लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥**

(चाणक्यनीति.10.9)

अर्थात् यस्य स्वयं बुद्धिः नास्ति इत्युक्ते तस्य विवेकज्ञानं न भवति। तदर्थं शास्त्रं किं कर्तुं शक्यते। यस्य बुद्धिः वा ज्ञानं वा न भवति तत्तु तस्य दोषो भवति न तु शास्त्रस्य, यः नेत्राभ्यां हीनो भवति तस्य दर्पणः किं करिष्यति। इदानीं व्यवहाराध्ययनसंदर्भे बुद्धिः अन्ययोग्यतारूपेण मन्यते। एषा वैयक्तिक-भिन्नतायाः कारणभूता वर्तते। बुद्धिसंदर्भे मनोवैज्ञानिकैः भिन्नं भिन्नं मतं प्रयुक्तम्। विद्वद्भिः बुद्धिः अमूर्तचिन्तनस्य क्षमता, समायोजनस्य योग्यता, पूर्वानुभवद्वारा लाभप्राप्तेः क्षमतेत्यादिरूपेण परिभाषिता।

बुद्धेः सम्प्रत्ययस्य विकासे एकोनविंशतिशताब्द्यां वर्तमानयोः हरबर्टस्पेन्सर-फ्रांसिसगाल्टनमहोदययोः योगदानं महत्त्वपूर्णं वर्तते। तौ बुद्धिं व्यक्तीनां सामान्य-योग्यतारूपेण उपकल्पितवन्तौ। तस्यामेव एव शताब्द्याम् अन्ते: जैक्सनमहोदयाः शेरिंगटनमहोदयाश्चापि बुद्धिसंदर्भे स्वकीयदृष्टिकोणं प्रस्तुतवन्तः। तस्मिन्नेव काले फ्रांसदेशे बिनेमहोदयेन बुद्धिमापकं परीक्षणं निर्मितम्। विंशतिशताब्द्याः अन्तिमेषु वर्षेषु अन्यैः सह गोलमैनमहोदयेन भावात्मकबुद्धेः आध्यात्मिकबुद्धेश्च प्रतिपादनं कृतम्। अत एव वर्तमानकाले समग्ररूपेण बुद्धेः तिस्रः प्रकाराः मन्यन्ते। अस्य विवरणम् (1.1) सारण्यां प्रस्तुतमस्ति।

**सारिणी (1.1)**
**बुद्धेः विविधस्वरूपम्**

| मूलं (Source) | बुद्धि | मापनस्य इकाई | कार्यम् |
|---|---|---|---|
| भौतिकमूलं | शैक्षिकबुद्धिः | IQ | अहं कथं चिन्तयामि |
| सामाजिकमूलं | भावात्मकबुद्धिः | EQ | अहं कथं अनुभवामि |
| आध्यात्मिकमूलं | आध्यात्मिकबुद्धिः | SQ | अहं कथं व्यवहरामि |

शैक्षिकबुद्धेः मूलं भौतिकमस्ति। अतः बुद्धेरस्य विश्लेषणस्य प्रधानताऽस्ति।

भावात्मकबुद्धे: मूलं सामाजिकम् अत: इदं संवेगसम्बद्धा बुद्धि: अस्ति। आध्यात्मिकबुद्धे: मूलं आध्यात्मिकम् अत: बुद्धिरियं व्यक्ते: व्यवहारेण सह सम्बद्धास्ति। उपर्युक्तवर्णितानां बुद्धीनां तासां विविधस्वरूपाणां यथा- शैक्षिक-भावात्मकाध्यात्मिकबुद्धे: यत् मूर्तरूपं तद् आरेखमाध्यमेन (1.2) स्पष्टीकरणाय अत्र प्रयास: कृत:।

**आरेख: ( 1.2 )**

**विविधबुद्धिषु सम्बन्ध:**




अस्माकं मस्तिष्के ऐतेषां त्रयाणां बुद्धीनां भूमिकानां अधोवर्णितारेखस्य (1.3) माध्यमेन स्पष्टं कर्तुं शक्यते। अधोवर्णितारेखे मस्तिष्कस्य वामभागे शैक्षिकबुद्धे:, दक्षिणभागे भावात्मकबुद्धे: मध्यभागे आध्यात्मिकबुद्धेश्च प्रदर्शनं कृतम् अस्ति। बुद्धे: एतेषां त्रयाणां स्वरूपाणां अग्रांकितबिन्दुषु विस्तृतरूपेण वर्णनं कृतमस्ति।

**आरेख: ( 1.3 )**

**मस्तिष्के विविधबुद्धे: अवस्थितस्थिति:**



### 1.4.1 शैक्षिकबुद्धेरवधारणा

शैक्षिकबुद्धिः जनस्य संज्ञानात्मकक्षमतया सह सम्बद्धा भवति। शैक्षिकबुद्धिः एतादृशी अस्ति यया व्यक्तिः विवेकपूर्णं तर्कपूर्णं युक्तिपूर्णरूपेण च चिन्तनं करोति। एषा बुद्धिः व्यक्तेः पूर्वानुभवेभ्यः लाभप्राप्ति-क्षमतारूपेण परिलक्षिता भवति। एषा समस्यासमाधानं, अमूर्तचिन्तनम्, उद्देश्यपूर्ण- सार्थकरूपेण कार्यं करोति, झटिति अधिगमम् अथ च नूतनपरिस्थित्या सह प्रभावपूर्णरूपेण समायोजनस्य योग्यतां प्रस्तौति। आधुनिकमनोवैज्ञानिकैः शैक्षिकबुद्धिः भिन्न-भिन्न-क्षमतारूपेण प्रस्तूयते। थॉर्नडाइकमहोदयेन बुद्धेः त्रयाणां प्रकाराणाम् उल्लेखः कृतः, एतेषु मूर्तबुद्धिः (Abstract) अमूर्तबुद्धिश्च (Concrete) शैक्षिकबुद्धिः च आगण्यते। वर्ननमहोदयेन प्रस्तुतायाः बुद्धेः पदानुक्रमिकसिद्धान्तस्य शाब्दिकी शैक्षिकी च योग्यता, थर्स्टनमहोदयेन या प्रस्तुता तत्र षष्ठप्राथमिकमानसिकयोग्यता यथा- आङ्किकयोग्यता, शाब्दिकयोग्यता, स्थानिकयोग्यता, शब्दप्रवाहयोग्यता, तार्किकयोग्यता, स्मरणयोग्यता च, हावर्डगार्डनरमहोदयेन बुद्धेः संदर्भे प्रस्तुतसप्त-योग्यतान्तर्गते तार्किक- गणितीययोग्यता, वाचिक-भाषायीयोग्यता, दृष्टिमूलक/ स्थानिकयोग्यता च शैक्षिकबुद्ध्यन्तर्गत्वेन ग्रहीतुं शक्यत इति परिलक्ष्यते। आरेखमाध्यमेन (1.4) एताषां योग्यतानां वर्णनम् अधोलिखितमस्ति।

**आरेखः ( 1.4 )**
**शैक्षिकबुद्धेः संप्रत्ययः**



### 1.4.2 भावात्मकबुद्धेरवधारणा

भावात्मकबुद्धेरवधारणा एकमद्यतनमनवद्यं चिन्तनं विद्यते। अस्य तात्पर्यं भवति–'संवेगसम्बद्धविवेक:।' यस्यान्तर्गते व्यक्ति: अन्येषां व्यक्तीनां भावनाम् अर्थात् संवेगं वा ज्ञात्वा तदनुगुणं स्वसंवेगे व्यवहारे च परिवर्तनं करोति। अधोवर्णितारेखमाध्यमेन (1.5) तस्य स्पष्टीकरणाय प्रयास: विहितो विद्यते।

**आरेख: ( 1.5 )**

**भावात्मकबुद्धे: विविधायामा:**




सांवेगिकबुद्धि: इत्युक्ते संवेगाधारिता बुद्धि: इति। यद्यपि 1995 वर्षे इत: भावात्मकबुद्धे: सम्प्रत्ययं लोकप्रियताञ्च आप्नोति यञ्च थॉर्नडाइकमहोदयेन सामाजिकबुद्धिरूपेण प्रतिपादितम्। पीटरसैलावे जानमेयरमहोदयावपि भावात्मकप्रज्ञां स्वतन्त्रमौलिकस्वरूपञ्च प्रतिपाद्य स्पष्टमेव परिभाषितवन्तौ।

हावर्डगार्डनरमहोदय: एतत् श्रेय: मन्यते यत् तेन मनोविज्ञाने शिक्षायाञ्च बुद्धे: प्रज्ञाया: वा सन्दर्भे एकस्य विस्तृतस्य सकारात्मकस्य च परिप्रेक्षस्य विकास: जात:। तेन ''फ्रेम्स ऑफ द माइन्ड : द थ्योरी ऑफ मल्टिपल इन्टेलिजेंस'' नामके पुस्तके बिनेमहोदयेन प्रतिपादिते द्वे योग्यते गणितीयतार्किक-वाचिकभाषीकी च प्रतिपादिते, अपि च पञ्चानां योग्यताञ्च स्वीकुर्वन् तथ्यमिदमुपस्थापितं यद् बुद्धि: पूर्णरूपेणानुवांशिकी, जन्मसमये च निर्धारणयोग्या

न भवति, अपितु इदं तादृशमेव तत्त्वमस्ति यस्य पोषणं विकसनञ्च कर्तुं शक्यते। गार्डनरमहोदयेन बुद्धेः संदर्भे सप्तानां योग्यतानाम् उल्लेखः कृतः। ताः निम्नप्रकारेण (आरेख 1.6)सन्ति-

**आरेखः (1.6)**

**गार्डनरमहोदयानुसारेण भावात्मकबुद्धेः प्रकाराः**




एतासां सर्वासां योग्यतानां संक्षिप्तरूपेण वर्णनं अधोलिखिमस्ति-

I. तार्किकगणितीकी (Logical-Mathematical)- तादृशी योग्यतास्ति यस्या विश्लेषणेन सङ्गणनेन परिमाणात्मिकाऽभिव्यक्तिश्च ज्ञायते।

II. वाचिकीभाषीकी (Verbal Linguistic)- योग्यतेयं शब्दद्वारा व्यक्तेः विचारात्मकस्य भाषाधिगमस्य क्षमता च ज्ञायते।

III. अन्तर्वैयक्तिकी (Inter-personal)- योग्यतेयं अन्यान् अवगन्तुम् अन्यव्यक्तेः अन्तःक्रियया तदनुभूत्यनुभवद्वारा च विज्ञायते।

IV. अन्तःवैयक्तिकी (Intra-personal)- इयं योग्यता भवति यत्र व्यक्तेः एकाकीं प्रवृक्तिम् आत्मनिर्भरतां निरन्तराध्यवसायञ्च शिक्षयति, तच्च लक्ष्योन्मुखतामाध्यमेन परीक्ष्यते।

V. दृष्टिमूलीका/स्थानिकी (Visual/Spatial)- या व्यक्तेः मानसिकप्रतिमानस्य त्रि-आयामीचिन्तनस्य स्थानपरिज्ञानस्य समस्यायाः समाधानस्य वा क्षमतया प्रकटिता भवति।

VI. सङ्गीतात्मिका (Musical)- योग्यतेयं गायकस्य श्रोतुर्वा लयमारोहावरोहं वा प्रति संवेदनशीलतया चिह्निता भवति।

VII. शारीरिकी/गतिबोधके (Bodily/Kinesthetic)- यस्यां संपूर्णस्य देहस्य क्रिया निहिता स्यात्, यथा- कूर्दनं नर्तनम् इत्यादिना अभिव्यक्तिर्भवति।

गार्डनरमहोदयस्य सप्तयोग्यतायाः सूच्यां भावात्मिकासंवेगात्मिकायाः बुद्धेः अवधारणा नवीनैवास्ति। अनया मानवीयव्यवस्थां (विशेषेण सङ्घटनात्मिकां शैक्षिकव्यवस्थां च) अवगन्तुं सहायता प्राप्यते। हावर्डगार्डनरमहोदयेन वर्णितं अन्तःव्यक्ति- (Interpersonal) अन्तःवैयक्तिकयोः (Intrapersonal) योग्यतयोः पञ्चयोग्यतानाम् आधारेण अधोवर्णितारेखरूपेण (1.7) विभाजनं कर्तुं शक्यते।

**आरेखः (1.7)**

**अन्तःव्यक्तिरन्तःवैयक्तिकयोश्च योग्यतायाः वर्णनम्**




उपर्युक्तारेखाधारेण इदं स्पष्टं भवति यद् अन्तःवैयक्तिकयोः (Intra-personal) योग्यतायाः अन्तर्गते आत्माभिज्ञता (Self-Awareness), आत्मप्रबन्धनम् (Self-management/Regulation), आत्माभिप्रेरणाश्च (Self- Motivation)

सम्मिलिताः सन्ति। अन्तःव्यक्ति (Inter-personal) योग्यतायाः अन्तर्गते तदनुभूतिः (Empathy) सामाजिकी दक्षताश्च (Social skills) सम्मिलिताः सन्ति।

डेनियल गोलमैनमहोदयेन भावात्मकबुद्धिः इत्थं रूपेण परिभाषिता यद्-भावात्मकबुद्धिः सा क्षमता भवति येन माध्यमेन वयं स्वस्य अन्येषां च भावनां जानीमः। वयं स्वं अभिप्रेरयामः अथ च स्व-स्वसंबन्धे प्राप्तसंवेगान् समुचितप्रकारेण प्रबन्धयामः।

(Emotional Intelligence is the capacity for recognizing our own emotions and those of others , for motivating ourselves and for managing emotions well in ourselves and in our relationship. Daniel Goleman, 1995)

उक्तपरिभाषाधारेण गोलमैनमहोदयेन ''भावात्मकबुद्धेः'' पञ्चतत्त्वानामुल्लेखः कृतः, येषां कार्यं जगतः परिस्थितिषु प्रभावितं भवति। अस्याः मानवव्यवहाराधि-गमदृष्ट्या विशिष्टं महत्त्वमस्ति। प्रस्तुताध्ययनं गोलमैनमहोदयेन भावात्मकबुद्धेः सन्दर्भे अधोलिखितेषु पञ्चतत्त्वेषु आधारितमस्ति। एतानि तत्त्वानि सन्ति-

आत्माभिज्ञता (Self-Awareness)- अस्या प्रमुखविशेषतत्त्वम् आत्मावबोधः कस्मिन्नपि समये यथार्थभावनानाञ्च ज्ञानम्।

आत्मप्रबन्धनम् (Self-management/Regulation)- अनेन तात्पर्यमस्ति कस्मिन्नपि कार्यविशेषे अवरोधस्थाने सुगमतादृष्ट्या स्वसंवेगेषु नियन्त्रणम्, नकारात्मकेभ्यः संवेगेभ्यः विरक्तिः, समस्यासमाधानस्य च उद्देश्येषु एकस्य रचनात्मकस्य मार्गस्य चयनम्।

आत्माभिप्रेरणा (Self-Motivation)- वाञ्छितलक्ष्यप्राप्तये निरन्तरं प्रयासः नकारात्मकावेगवृत्तिषु विजयप्राप्तिः, वाञ्छितपरिणामप्राप्तये स्वप्रलोभने नियन्त्रणम् एतस्याः मुख्याः विशेषतास्सन्ति।

तदनुभूतिः (Empathy)- एतस्या अर्थोऽस्ति अन्येषां भावानां ज्ञानं तान्प्रति संवेदनशीलतायाः प्रदर्शनम् एतस्यानुमितिकरणं यद् अन्येषामनुभवः कीदृशः किञ्च ते इच्छन्ति इति।

सामाजिकदक्षताः (Social skills)- सामाजिकपरिस्थितीनां पूर्वानुमानस्य अन्यैः सह अन्तःक्रियायाः सम्बन्धस्थापनम् अन्येषां संवेगः तेषां व्यवहारे निहितमार्गदर्शनस्य क्षमतायारन्तर्गते आगच्छति।

पुस्तकेस्मिन् भावात्मकबुद्धेः एतेषाम् आयामानामाधारेण सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विश्लेषणं कृतमस्ति।

### 1.4.3 आध्यात्मिकबुद्धेरवधारणा

विंशतिशताब्द्याः अन्ते मनोवैज्ञानिकाः अस्य विचारस्योपरि बलं प्रदत्तवन्तः तेषामिदं चिन्तनमस्ति यद् मानवीयबुद्धेः सम्प्रत्ययं तावत् पर्यन्तं संपूर्णं भवितुं नार्हति यावत् पर्यन्तं तत्र आध्यात्मिकबुद्धेः सम्प्रत्ययस्य समावेशो न भवति। आध्यात्मिकबुद्धिः सा भवति यया वयं मूल्यस्य अर्थस्य च समस्याभिः सह समन्वयं स्थापयितुं शक्नुमः। एवं च तेषां समाधानान्वेषणाय प्रयासं कुर्मः। आध्यात्मिकबुद्धिः बहुविधबुद्धिषु अन्यतमा। इमां बुद्धिं स्वतन्त्ररूपेण विकासयितुं शक्यते। इयं बुद्धिः बाह्यजगता साकं मनसः बुद्धेः अर्थात् आन्तरिकमानसिकजगतः एकीकरणे बलं ददाति। इतस्याः तर्क-अनुसन्धान-अभ्यासैः विकासं कर्तुं शक्यते। व्यक्तेः आध्यात्मिकानुभवः अस्यां योगदानं कर्तुं शक्नोति। परन्तु अयं सन्दर्भस्य (विषयगतस्य) एकीकरणस्य च साधनेषु आश्रितो भवति। व्यक्तेः ज्ञानस्य सहजस्य च स्वभावद्वारा आध्यात्मिकाभिव्यक्तेः परिपक्वतायाः अभिव्यक्तिर्भवति। पूर्णमानसिकस्य शारीरिकस्वास्थ्यस्य च कृते आध्यात्मिकज्ञानम् आवश्यकम्। यतः स्वस्थव्यक्तित्वस्य विकासहेतवे आध्यात्मिकविकल्पानाम् अर्थात् स्वेन सह समाजस्य कृते कल्याणकरं भवेत्, तेषां चयने सहायतां करोति। विशिष्टप्रकारेण चिन्तनयोग्यता, विनम्रता, अनहंभावः, अहम्भावात् ममत्वभावात् अतिरिच्य चिन्तनस्य योग्यता एव उच्चाध्यात्मिकयोग्यतायाः द्योतकोऽस्ति। वयं कस्मिंश्चिदपि बिन्दौ तदुच्चाहम्भावस्य (Higher self) सम्पर्के आगच्छामः। अस्माकं ज्ञानेन्द्रियेभ्यः पारं चिन्तनस्य, अवबोधनस्य, कार्यकरणस्य च योग्यताः आध्यात्मिकबुद्धिः इत्युच्यते। व्यक्तौ कियती आत्माभिज्ञता अस्ति तथा सः तस्य कथमुपयोगं करोति, एतत् तस्याध्यात्मिकबुद्धौ आश्रितो भवति। आध्यात्मिकबुद्धेः सम्बन्धः केनापि धर्मेण न भवति अपि तु व्यक्तेः उच्चचिन्तनेन सह भवति। अस्याः व्यक्तिमन्यव्यक्तिमन्यसजीवप्राणिञ्च प्रति सम्बन्धो भवति। एतादृशी व्यक्तिः, अस्मान् यत् जगत् दृश्यते अथवा न दृश्यते, तां प्रत्यपि सचेतनं भूय तिष्ठति तथा च अन्येषां भावनां प्रति स्वानुभूतिं धारयति। व्यक्तौ आध्यात्मिकी परिपक्वता, तस्य ज्ञानेन सहजसहयोगात्मकस्वभावेन च व्यक्ता भवति। बुद्धिरियं जन्मजातान्तरिकगुणान्, पारदर्शिचिन्तनानि, कार्याणि, अभिवृत्तीश्च

प्रकटयितुं समर्था भवति। आत्माभिज्ञतायाः सन्दर्भे प्रत्येकं व्यक्तिः स्वभौतिकास्तित्वे रूपे वा विश्वसिति तथा च अस्मिन्नेव रूपे तं ज्ञायते। स्वविषये विपरीतावबोधः, स्वास्तित्वनिरूपणाय सङ्घर्षः व्यक्तेः जीवने भयं, क्रोधः, दुःखं च उत्पादयति। आध्यात्मिकदृष्ट्या एताः भावनाः अहम्भावस्य प्रतीकाः, याः व्यक्तेः आध्यात्मिकप्रकृतिम् अर्थात् शान्तिं, प्रेम, सहयोगम् इत्यादीन् अवरोधयन्ति। आध्यात्मिकी बुद्धिः व्यक्तिम् उचितसमयेन, उचितस्थानेन, उचितभावनया सह उचितनिर्णयग्रहणे सहायिका भवति। अध्यात्मशास्त्रे अनुसन्धानसंस्थानस्य (Spiritual Science Research Foundation) अनुसारम् अध्यात्मशब्दः तान् सर्वान् घटकान् परिभाषयति ये अस्माकं पञ्चज्ञानेन्द्रिय-मनो (अर्थात् सम्वेदनाः, भावनाः, इच्छाश्च)-बुद्धिभ्यः(अर्थात् निर्णयप्रक्रिया तथा तर्कक्षमता) परं वर्तते। अत उच्यते यद् आध्यात्मिकी बुद्धिः विवेकेन करुणया च सह व्यवहारे आन्तरिक-बाह्यशान्तिस्थापनक्षमतां व्यवस्थापयति।

डानाजोहर-मार्शलमहोदययोरनुसारम्- आध्यात्मिकबुद्धेरर्थः केवलायाः धार्मिकतायाः ओतप्रोतभवनमेव नास्ति। इयं तु मानवमस्तिष्क-मनः-आत्मनाम् आन्तरिकयोग्यता क्षमता चास्ति। आध्यात्मिकबुद्धिरेव सा बुद्धिर्भवति या वयं के?, किमर्थं स्मः?, अस्माकं जीवनलक्ष्यं किम्?, तस्य च जीवनस्य आदर्शमूल्यं च किम्? इत्यादिप्रश्नानाम् उत्तरान्वेषणे प्रवृत्ता भवति। एषा सैव बुद्धिः या अस्माकं संज्ञानात्मिकां संवेगात्मिकां च बुद्धिम् एकम् उचितप्रकारस्य दशां दिशां च प्रदाय तयोः सर्वोत्तमोपयोगाय अस्माकं साहाय्यं विदधाति। यस्मात् वयं स्वप्रतिभाभिः स्वस्य परेषां च जीवनम् आनन्दमयं कर्तुं शक्नुमः। इयं बुद्धिः सार्वभौमिकी भवति अर्थात् कस्याः अपि जातेः, धर्मानुयायिनः, लिङ्गस्य च व्यक्तिषु उपलभ्यते। डानाजोहरमहोदयेन 1997तमे वर्षे स्वपुस्तके 'रि राइटिंग दि कॉरपोरेट ब्रेन' इत्यत्र आध्यात्मिकबुद्धिशब्दः प्रस्तुतः। तेन आध्यात्मिक-बुद्धेरन्तर्निहिताः द्वादशसिद्धान्ताः (12) परिभाषिताः।

1. **आत्माभिज्ञता (Self-Awareness)** : अहं कस्य विश्वासं करोमि, किं करोमि येन अहं कस्मात् प्रेरणां प्राप्नोमि। (Knowing what I believe in and values and what deeply motivates me.)

2. **सहजता (Spontaneity)** : वर्तमाने स्थितो वर्तमानक्षणस्य कृते उत्तरदायित्वभवनम्। ( Living in and being responsive to the moment.)

3. **व्यापकदृष्टिस्थापनं मूल्यनेतृत्वञ्च (Being Vision and Value-Led)** : सिद्धान्तानां गभीरमान्यतानाम् अनुसारं कार्यसम्पादनम्, तदनुसारं जीवनयापनञ्च। (Acting from principles and deep beliefs, and living accordingly.)

4. **पवित्रता (Holism)** : बृहत्प्रतीकानां (patterns) सम्बन्धानां (relationships) संयोजनानां (conncetions) दर्शनम् स्वत्वभावस्थापनञ्च। (Seeing larger patterns, relationships, and connections; having a sense of belonging.)

5. **करुणा (Compassion)**: अनुभत्या साकं गभीरसहानूभूतेः गुणस्य भवनम्। (Having the quality of "feeling-with" and deep empathy.)

6. **विविधतायाः उत्सवः (Celebration of Diversity)** : मतभेदानां सत्त्वेऽपि अन्यजनानां महत्त्वप्रदानम्। (Valuing other people for their differences, not despite them.)

7. **क्षेत्रस्य स्वतन्त्रता (Field Independence)** : जनसम्मर्दस्य विरुद्धम् उत्थानम्, स्वयं प्रति प्रतिबद्धताभवनम्। (Standing against the crowd and having one's own convictions.)

8. **विनम्रता (Humility)** : संसारस्य नाटके अभिनयकर्तृत्वस्य सत्स्थाने भवनस्य च भावना। (Having the sense of being a player in a larger drama, of one's true place in the world.)

9. **मौलिकं 'किं' प्रश्नकरणस्य प्रवृत्तिः (Tendency to Ask Fundamental "Why" Questions)** : वस्तूनां ज्ञानं तेषां मूलस्तरपर्यन्तं ज्ञानञ्च। ( Needing to understand things and get to the bottom of them.)

10. **खण्डनस्य क्षमता (Ability to Reframe)** : कस्या अपि स्थितेः समस्यायाश्च अपसारणम्, बृहत्-चित्रस्य व्यापकसन्दर्भस्य च दर्शनम्। (Standing back from a situation of problem and seeing the bigger picture or wider content)

11. **प्रतिकूलतायाः सकारात्मकोपयोगः (Positive Use of Adversity)**

दोषैः असफलताभिः दुःखैश्च शिक्षणम् उत्तरगमनञ्च। (Learning and growing from mistakes, setbacks, and suffering.)

12. **सम्वेदनायाः भावः (Sense of Vocation) :** कस्मैचित् प्रत्यर्पणाय सेवायै आह्वानम्। (Feeling called upon to serve, to give something back.)

**आरेख ( 1.8 )**
**आध्यात्मिकबुद्धेरन्तर्निहितसिद्धान्ताः**




राबर्टइमान्समहोदयेन (Robert Emmans, 2000) आध्यात्मिकबुद्धेः स्वरूपम् इत्थं परिभाषितम्– "as the adaptive use of spiritual information to fecilitate every day problem solving and goal attainment." अर्थाद् इयम् आध्यात्मिकाबुद्धिः सरलरूपेण सर्वासां समस्यानां समाधानार्थं लक्ष्यानां च प्राप्त्यर्थम् आध्यात्मिकसूचनानाम् अनुकूलप्रयोगमात्रमस्ति। इमान्समहोदयैः बुद्धेः पञ्चतत्त्वानां स्वरूपम् इत्थं भाषितम्–

1. दैहिकभौतिकञ्च श्रेष्ठतायाः योग्यता (The capacity to transcend the physical material.)

2. सजगतायाः उच्चावस्थायाः अनुभवस्य योग्यता (The ability to experience heightened.)

3. प्रतिदिनस्य अनुभवानां व्यवहारे प्रयोगयोग्यता (The ability to sanctify everyday experience.)

4. समस्यानां समाधानार्थम् आध्यात्मिकस्रोतसां प्रयोगस्य क्षमता (The ability to utilize spiritual resources to solve problems.)

5. सद्गुणानां धारणस्य योग्यता (The capacity to be virtuous.)

आरेखः (1.9)

राबर्टइमान्समहोदयेन वर्णितायाः आध्यात्मिकबुद्धेः पञ्चतत्त्वानि




सिन्डीविगलवर्थमहोदयानुसारेण- आध्यात्मिकबुद्धिः तादृशी बुद्धिरस्ति यया बाह्यान्तरिकशान्तिप्राप्त्यर्थं विवेकपूर्णव्यवहारप्रयोगक्षमता वर्द्धते, तत्र परिस्थितिः कीदृशी अपि भवतु। (Cindy Wigglesworth defines Spiritual Intelligence as "the ability to behave with Compassion and Wisdom while maintaining inner and outer peace(equanimity) regardless of the circumstances"). उपर्युक्तपरिभाषाऽधारेण सा एकविंशति-(21) कौशलानां सूचीं निर्मितवतीया सूची आध्यात्मिकबुद्धेः आवश्यकी अस्ति-

**उच्चस्व/स्वाहमस्यावबोधनम् (Higher Self/Ego Self Awareness)**

1. स्ववैश्विकदृष्टिकोणस्य ज्ञानम् (Awareness of own worldview)
2. जीवनोद्देश्यस्यावगमनम् (Awareness of life porpose)
3. मूल्यस्य तारतम्यतायाः अवबोधः (Awareness of values hierarchy)
4. आन्तरिकचिन्तनस्य जटिलता (Complexity of inner thought)
5. स्वसत्तायाः अवबोधः (Awareness of Ego self/Higher self)

**सार्वभौमिकाभिज्ञता (Universal Awareness)**

6. सर्वेषां जीवानाम् अन्तःसम्बन्धास्यावबोधः (Awareness of inter-connectedness of all life)
7. अन्येषां दृष्टिकोणानाम् अवबोधः (Awareness of worldview of others)
8. कालं प्रति स्वचिन्तनम् (Breadth of time perception)
9. मानवीयशक्तीनां परिधीनां वा अवबोधः (Awareness of limitations/ power of human perception)
10. आध्यात्मिकनियमानां सिद्धान्तानां चावबोधनम् (Awareness of spiritual laws)
11. श्रेष्ठतमस्य एकत्वावबोधस्यानुभवः (Experience of transcendent oneness)

**उच्चस्व/स्वहं प्रवीणता (Higher Self/Ego Self Mastery)**

12. आध्यात्मिकविकासार्थे प्रतिबद्धता (Commitment to spiritual growth)
13. सर्वदा स्वोत्साहसम्वर्द्धनम् (Keeping higherself in charge)
14. स्वोद्देश्यानां मूल्यानां चानुसारेण जीवन-यापनम् (Living your purpose and values)
15. स्व-विश्वासस्य नैरन्तर्येण सम्वर्द्धनम् (Sustaining your faith)
16. आध्यात्मिकशक्तेः स्वसत्त्वात् निर्देशप्रापणम् ( Seeking guidance from Higher Power or higher self)

## सामाजिकप्रवीणता/आध्यात्मिकप्रवीणता (Social Mastery/Spiritual Presence)

17. व्युत्पन्नो प्रभावोत्पादकश्च गुरुः (A wise and effective teacher/mentor)
18. परिवर्तनार्थम् एको विद्वान् अथ च प्रभावशाली प्रतिनिधिः (A wise and effective change agent)
19. विद्वत्तापूर्णः सहिष्णुतापूर्णश्च निर्णयकर्ता (Makes compassionate and wise decisions)
20. शान्तोपचारात्मिका च उपस्थितिः (A calming, healing presence)
21. जीवनस्य अभ्युन्नतेश्चावनतेश्च ज्ञाता (Being aligned with ebb and flow of life)

### आरेखः (1.10) सिन्डीविगलवर्थमहोदयेन उल्लिखितानि आध्यात्मिकबुद्धेः एकविंशतिकौशलानि

| | |
|---|---|
| **बुद्धेः उच्चस्व/स्वाहमस्यावबोधनम्**<br>• स्ववैश्विकदृष्टिकोणस्य ज्ञानम्<br>• जीवनोद्देश्यस्यावगमनम्<br>• मूल्यस्य तारतम्यतायाः अवबोधः<br>• आन्तरिकचिन्तनस्य जटिलता<br>• स्वसत्तायाः अवबोधः | **उच्चस्व/स्वहं प्रवीणता**<br>• आध्यात्मिकविकासार्थं प्रतिबद्धता<br>• सर्वदा स्वोत्साहसम्वर्द्धनम्<br>• स्वोद्देश्यानां मूल्यानां चानुसारेण जीवन-यापनम्<br>• स्व-विश्वासस्य नैरन्तर्येण सम्वर्द्धनम्<br>• आध्यात्मिकशक्तेः स्वसत्त्वात् निर्देशप्रापणम् |
| **सार्वभौमिकाभिज्ञता**<br>• सर्वेषां जीवानाम् अन्तःसम्बन्धस्यावबोधः<br>• अन्येषां दृष्टिकोणानां अवबोधः<br>• काल प्रति स्वचिन्तनम्<br>• मानवीयशक्तीनां परिधीनां वा अवबोधः<br>• आध्यात्मिकनियमानां सिद्धान्तानां चावबोधनम्<br>• श्रेष्ठतम एकत्वावबोधस्यानुभवः | **सामाजिकप्रवीणता/आध्यात्मिकप्रवीणता**<br>• व्युत्पन्नो प्रभावोत्पादकश्च गुरुः<br>• परिवर्तनार्थं एको विद्वान् अथ च प्रभावशाली प्रतिनिधिः<br>• विद्वत्तापूर्णः सहिष्णुतापूर्णश्च निर्णयकर्ता<br>• शान्तोपचारात्मिका च उपस्थितिः<br>• जीवनस्य अभ्युन्नतिमवनतिञ्च ज्ञाता |

डेविड बी. किंगमहोदयानुसारम् (2008) आध्यात्मिकबुद्धिः मानसिक-क्षमतानां समूहोऽस्ति यद्धि अभिज्ञतायाः एकीकरणस्य कस्या अपि व्यक्तेः

भौतिकेतरस्य श्रेष्ठपरिणामानाञ्च स्वानुरूपोयोगी अस्ति तथा च एतादृशानां परिणामानां गहनास्तित्वप्रतिबिम्बं परिणामेभ्य: श्रेष्ठं विद्यते, अर्थवृद्धौ आत्मतत्त्वस्य श्रेष्ठतां ज्ञातुम् आध्यात्मिकपक्षेषु च दक्षतां प्राप्तुं सहायिका भवति। (David B. King (2008) defines spiritual intelligence "as a set of mental capacities which contribute to the awareness, integration, and adaptive application of the nonmaterial and transcendent aspects of one's existence, leading to such outcomes as deep existential reflection, enhancement of meaning, recognition of a transcendent self, and mastery of spiritual states.") अत: डेविड बी. किंगमहोदयस्य उपर्युक्तमताधारेण आध्यात्मिकबुद्धे: परिस्थितिविशेषानुकूलपरिवर्तनीय: तासां शक्तीनां समूहरूपेण परिभाषितुं शक्यते या: सत्यस्य पराभौतिकमानवीयानुभूतिषु आधारिता सन्ति। विशेषरूपेण तासु अनुभूतिषु या: कस्यापि मानवस्य अस्तित्वस्य प्रकृति-वैयक्तिकधारणा-परानुभूति: तथा च चेतनाया: विस्तृतदशया सह सम्बन्धितास्सन्ति। यदा एता: प्रक्रियाया: वा मानसिकशक्त्या: प्रयोगं भवति तदा एता: शक्त्या: समस्यासमाधानं, सूक्ष्मचिन्तनं परिस्थितिनाञ्च प्रभावीनिराकरणार्थं अद्वितीयसाधनानां प्राप्तिर्भवति। तात्पर्यं इदं यद् आध्यात्मिकबुद्धि: पराभौतिकमानवीयानुभूतिषु यथा मानवस्याऽस्तित्वस्य प्रकृति:, वैयक्तिकधारणा, परानुभूति, चेतनाया: विस्तृतदशायाञ्च आधारितमस्ति। यदा व्यक्ति: स्वं एतासां परिस्थितीनां अनुभवति तदा मानसिकशक्तय: समस्याया: समाधाने, सूक्ष्मचिन्तने, परिस्थितीनां निराकरणे च बुद्धे: सहायिका भवन्ति।

**आरेख: ( 1.11 )**

**डेविडबी.किंगमहोदयेन वर्णिता: आध्यात्मिकबुद्धे: आयामा:**



अतः निश्चप्रचं वक्तुं शक्यते यत् इयम् एतादृशी आध्यात्मिकाबुद्धिः तादृशपरिस्थितेः निराकरणाय सामर्थ्यं प्रयच्छति। डेविड बी. किंगमहोदयेन आध्यात्मिकबुद्धेः आयामानां (Dimensions) प्रकारचतुष्टयं वर्णितम्। तद्धि (आरेख-1.11) समीक्षात्मकास्तित्ववादिचिन्तनम्, (Critical Existential Thinking), व्यक्तिगतार्थोत्पादनम् (Personal Meaning Production), परात्पराभिज्ञता (Transcendental Awareness), चेतनदशाविस्तारः (Conscious State Exapansion)। भारतीयसंदर्भे एतेषु आयामेषु एकमन्यम् 'समन्यवयात्मकदृष्टौ क्षमता' (Ability for Integrative Visioning) आयाममपि योजयितुं शक्यते। अनेन प्रकारेण पञ्चायामानामाधारेण अध्ययनेऽस्मिन् आध्यात्मिकबुद्धेरध्ययनं कृतमस्ति। तेषां वर्णनं संक्षिप्तरूपेणात्र लिखितमस्ति–

1. **समीक्षात्मकास्तित्ववादीचिन्तनम् (Critical Existential Thinking)**– अस्य तात्पर्यं व्यक्तेः तथा च चिन्तनरूपीक्षमता अस्ति यस्या आधारेण सः विभिन्नान् विषयान् संदर्भान् च समीक्षात्मकेषु रूपेषु स्वविचारपरिधौ आनयति, तान् अर्थं प्रददाति अस्तित्वसंदर्भे च तैः सह स्वं योजयति।
2. **व्यक्तिगतार्थोत्पादनम् (Personal Meaning Production)**– व्यक्तेः भौतिकानुभवेभ्यः मानसिकानुभवेभ्यश्च वैयक्तिकार्थग्रहणं प्रयोजनान्वेषणस्य क्षमता इति अस्य तात्पर्यमस्ति।
3. **परात्पराभिज्ञता (TranscendentalAwareness)**– व्यक्तेः आत्मनः, परिवेशात् अन्यव्यक्तिभ्यश्च इतरपरिस्थितेः अवज्ञानश्च क्षमता इति अस्य तात्पर्यमस्ति।
4. **चेतनदशाविस्तारः (Conscious State Exapansion)**– अस्यानुसारं व्यक्तिः चेतनतायाः उच्चतरेषु अवस्थासु प्रविश्य बहिरागत्य च स्वचिन्तनं विस्तारणक्षमतां प्रदर्शयति तथा च चेतनतायाः एकस्मिन्नेव स्तरे न आत्मानं सङ्कुचितं करोति।
5. **समन्यवयात्मकदृष्टौ क्षमता (Ability for Integrative Visioning)**– अस्यानुसारं व्यक्तौ कतिपयेषु विषयेषु तेषां परिस्थितिषु च मध्ये समरूपतत्त्वानि अवलोकनस्य परिज्ञानस्य च क्षमतया सह तेषु दृष्टेः एकरूपतायाः क्षमता भवति।

शिक्षाक्षेत्रे बौद्धिकविकासे अधिकं बलं प्रदीयते, परन्तु यदि व्यक्तित्वस्य

सर्वाङ्गीणविकासस्य चर्चा क्रियते तर्हि प्रश्नः भवति तदा केवलस्य संज्ञानात्मकस्य भावात्मकस्य वा पक्षस्य एव न अपि तु आध्यात्मिकपक्षस्य विकासोऽपि आवश्यकः। वर्तमानसमये सर्वत्र अशान्तिः स्वार्थपरतायाश्च भावनायाः विकासो दृश्यते। समाजस्य प्रत्येकं समुदायः- शिक्षकः, छात्रः, अन्यो वा जनः भवेत् ते सर्वेऽपि समस्याग्रस्ताः सन्ति। एषां समस्यानां प्रभावेण शान्तिपूर्वेण च निराकर्त्तुम् आध्यात्मिकबुद्धेः विकासे बलप्रदानस्य आवश्यकता अस्ति। अनया न केवलं स्वमनःशान्तिः सुनिश्चेतुं शक्यते अपितु सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः इति संकल्पनायाः सिद्धिरपि कर्तुं शक्यते। एकस्य शिक्षकस्य व्यक्तित्वे यदि एतेषां समेषां पक्षाणां विकासो भवेत् तदा सः एतादृशान् छात्रान् निर्माति यत् यत्र विश्वं भवत्येकनीडम् इति संकल्पनायाः साकारं कृत्वा विश्वस्मिन् शान्तिं स्थापयितुं शक्यते।

## 1.5 शिक्षाक्षेत्रे अनुसन्धानम्

मानवजीवने विकासस्य विविधक्षेत्रे अनुसन्धानस्य महती भूमिका भवति। अनुसन्धानं वर्तमानज्ञाने परिमार्जनस्य नवीनज्ञानार्जनस्य च एका क्रमबद्धा सुनियोजिता प्रक्रिया अस्ति। अनुसन्धानस्य कृते अनुसन्धानं, गवेषणा, अन्वेषणप्रभृतयः शब्दाः प्रयुज्यन्ते। अनुसन्धानपदस्य अभिप्रायः कस्यापि विषये बारम्बारं गवेषणा भवति। जिज्ञासा मानवस्य मूलस्वभावो वर्तते। जिज्ञासावशात् मानवः जीवनस्य कस्यापि परिस्थितिविषये वा तथ्यविषये बारम्बारं चिन्तनं विश्लेषणञ्च करोति नवीनानां तथ्यानां, सिद्धांतानाञ्च प्रस्तुतीकरणं करोति। नवीनानां तथ्यानां पदार्थानां वा ज्ञानं विश्लेषणं वैज्ञानिकविधीनां सिद्धान्तनिर्माणं च अनुसन्धानस्य क्षेत्रे समागच्छति। आङ्ग्लभाषायाम् अनुसन्धानस्य कृते रिसर्च (Research), इन्वेस्टिगेशन (Investigation) इत्यादयः शब्दानां प्रयोगः क्रियते। अनुसन्धानकृते प्रयुक्तानां शब्दानां स्पष्टाशयः भवति जिज्ञासा वा प्रश्नानां समाधाने गाम्भीर्यं गहनविश्लेषणात्मकदृष्ट्या कस्यापि समस्यायाः समाधानार्थम् आलोचनात्मक-मध्ययनम्।

## 1.6 अनुसंधानस्य तात्पर्यम्

अनुसंधानं वर्तमानज्ञानस्य परिमार्जनस्य नवीनज्ञानस्य सृजनस्य चैका क्रमबद्धा सुनियोजिता प्रक्रियाऽस्ति। मानवजीवनस्य विभिन्नक्षेत्रेषु विराजमाना-प्रगत्यामनुसन्धानस्य अत्यन्ता महत्त्वपूर्णा भूमिकास्ति। सुनियोजितरूपेण समस्यानां

समाधानाय अयमेक वैज्ञानिकविधिरस्ति। अनुसन्धानस्योद्देश्यम् आलोचनात्मकरूपेण कस्यापि समस्यायाः विश्लेषणं तथा च समाधानं भवति। आङ्ग्लभाषायामनुसन्धानस्य पर्यायः Research वर्तते इति यत् Re (बारं-बारं) तथा च Search (अन्वेषणं) शब्दयोः मिलित्वा निर्मीयते। अतः अस्य Research शब्दस्य शाब्दिकोऽर्थोऽस्ति-बारं बारमन्वेषणम्। हिन्दीशब्दोऽपि अनुसन्धानं अनुवर्तिरूपेण अनुसन्धानकरणाय सङ्केतं करोति। परं यथार्थरूपे आङ्ग्लभाषायाः Research तथा च हिन्दीभाषायाः अनुसन्धानशब्देषु क्रमशः प्रयुक्तम् एवम् अनु शब्दांशस्यार्थः आवृत्तिः बारं बारं वा कार्यकरणस्य न सूचकाः। वरन् ये प्रत्ययाः यथार्थरूपेण गहनतापूर्वकं गम्भीरतापूर्वकं वा कार्यसम्पादनस्य द्योतकाः। ये शब्दाः निःसन्देहं सूचयन्ति यत् गम्भीरताः गहनताः विश्लेषणात्करूपेण च कस्याः अपि एकस्याः समस्यायाः आलोचनात्मकमध्ययनं कृत्वा तस्य समाधानमन्वेषणमेव अनुसन्धानमस्ति। इदमेव कारणमस्ति यत् समीचीनतया सूचनानां संङ्कलनं, विश्लेषणं, नवीनतथ्यानां सिद्धान्तानां वा अन्वेषणकार्यमेव अनुसन्धानप्रक्रियायाः अन्तर्गते आगच्छति। अनुसन्धानशब्दास्यार्थः प्रायः अनुसन्धानं, गवेषणा, अन्वेषणं, परिपृच्छा, नूतनान्वेषणं वा परीक्षणमित्यादीनां शब्दानां प्रयोगः अपि भवति।

जिज्ञासा मानवस्य मूलस्वभावो वर्तते। जिज्ञासावशात् मानवः जीवनस्य कस्यापि परिस्थितिविषये वा तथ्यविषये बारम्बारं चिन्तनं विश्लेषणञ्च करोति। नवीनानां तथ्यानां, सिद्धान्तानाञ्च प्रस्तुतीकरणञ्च करोति। अनुसन्धानस्य प्रक्रिया एका एतादृशी गहना-सुव्यवस्थिता तार्किका वा वर्तते या मानवस्य ज्ञानकोशे काचित् वृद्धिरवश्यमेव करोति अथवा वृद्धिकरणस्य दिशायां प्रवृत्ता भवति। ज्ञानस्य कोशः सत्यतथ्येन समृद्धो भवति। अत एतादृशानां नवीनसत्यानाम् अन्वेषणम् अथवा पुरातनसत्यानां नूतनरूपेण एतादृशी प्रस्तुतिरेव नवीनज्ञानस्य सर्जनमस्ति। यद् ज्ञानभण्डारं समृद्धं करोति। अनुसन्धानस्य प्रक्रिया एका तार्किका प्रक्रिया वर्तते। अनुसन्धाने वैज्ञानिकविधेः अनुसरणं कृत्वा प्रश्नानामुत्तरं प्राप्यते इति। वैज्ञानिकसाक्ष्याणामाधारेण एव सत्यासत्ययोः मध्ये विभेदं दरीदृश्यते। विज्ञानस्यानुसारं यद् सप्रमाणरूपेण सिद्धं कर्तुं शक्यते यद् अनुभवजन्यं तर्कसंगतं वा यस्यास्तित्वमस्ति तद् सत्यमस्ति। वस्तुतः विज्ञानस्य पञ्चप्रमुखाः विशेषताः सन्ति- वस्तुनिष्ठता, निश्चयात्मकता, सत्यापनयोग्यता, सार्वभौमिकता, तथा च पूर्वकथनक्षमता। अनुसन्धानप्रक्रियायां विज्ञानस्य एतेषां सर्वेषां विशेषतानाम् उपयोगो

भवति। इदमेव कारणमस्ति यत् अनुसन्धाने प्रश्नानां जिज्ञासानां वा उत्तरमनुमानेन नाधारितं भूत्वा अनुभवं-परीक्षणं तथा च तार्किकविश्लेषणे आधारितं भवति। वस्तुत: कस्यापि वैज्ञानिकाध्ययनस्य तिस्र: प्रमुखा: विशेषता: वर्तन्ते तासामवलोकनं परीकल्पना तथा च परीक्षणं चाधारितम्। अत: इदं वक्तुं शक्यते यत् अनुसन्धानप्रक्रिया वस्तुत: कस्या: अपि समस्याया: सम्भावितोत्तराणि अर्थात् प्राक्कल्पनायाम् अवलोकनेन प्राप्तसूचनाया: साहाय्येन परीक्षणं करणीयम्। येन माध्यमेन समस्याया: समुचितोत्तरं प्राप्तं भवेत्। अत्र इदं स्पष्टीकरणमुचितमेव भविष्यति यत् अनुसन्धानसमस्या: कस्या: अपि व्यक्ते: दैनिकजीवने आगताभ्य: सामान्यसमस्याभ्य: भिन्ना: भवन्ति। अनुसन्धानसमस्याया: प्रकृति: सार्वजनिका भवति तथा च तस्य समाधानेन नूतनज्ञानं प्राप्तं भवति। विद्वान्स: अनुसन्धानशब्दस्य विभिन्ना: परिभाषा: ददति। यासां काचित् अग्रलिखिता:-

जॉन डब्ल्यू बेस्टमहोदयेन अनुसन्धानविषये प्रतिपादितं यत् -नियंत्रणावलोकनस्य व्यवस्थितरूपेण वस्तुनिष्ठविश्लेषणरूपेण प्रलेखरूपेण च अनुसन्धानमित्थं परिभाषितुं शक्यते येन सामान्यीकरणनियमे सिद्धांतविकासे च सहायकं भवितुमर्हति।

(Research may be defined as the systematic and objective analysis and recording of controlled observations that may lead to the development of generalization, principles or theories. -John W. Best)

जी.जी.क्रोफोर्डमहोदयानुसारेण- कस्या अपि समस्याया: सम्यक् समाधानाय क्रमबद्धपरिष्कृतचिन्तनं, विशिष्टोपकरणस्य प्रयोगाय एक: श्रेष्ठविधि: एव अनुसन्धानम्।

(Research is simply a systematic and refined techniques of thinking, employing specialized tools, instruments or procedure in order to obtain a more adequate solution of a problem. -G.G. Croford)

फ्रेड एन. कारलिंगरमहोदयां शब्देषु वक्तुं शक्यते यत् प्राकृतिकघटनाक्रमाणां मध्ये सम्भावितसमाधानविषये परिकल्पिततर्कवाक्यानां व्यवस्थिता: नियन्त्रणमानुभाविकसमालोचनात्कं परीक्षणं वैज्ञानिकमनुसन्धानमस्ति।

(Scientific research is systematic, controlled, empirical, and critical investigation of hypothetical proposition about the presumed relations among natural phenomena. -Fred N. Karlinger)

पी.एम.कुकमहोदय: अनुसन्धानस्य विशेषतानामाधारे स्पष्टयति यत् कस्यापि प्रेषित-समस्याया: सन्दर्भे ईमानदारी, व्यापकता, विवेकेन तथ्यानामन्वेषणं तेषामर्थं निहितार्थं वा प्रस्तुतीकरणमेव अनुसन्धानम्। कश्चित् प्राप्तमनुसन्धानकार्यस्य परिणामानां निष्कर्षानां वा तस्याध्ययनस्य क्षेत्रे ज्ञानवर्धकं प्रामाणिकं तथा पुष्टीयोग्ययोगे कर्तार: भवेयु:।

(Research is an honest, exhaustive, intelligent searching for facts and their meaning or implications with reference to given problem. The product or finding on a given piece of research should be authentic, verifiable contribution to knowledge in the field studies. -P.M. Cook)

प्रो.एम. वर्मा महोदय: अनुसन्धानं बौद्धिकक्रियाकलापरूपे इत्थं स्पटयति यत् अनुसन्धानं एका एतादृशी बौद्धिकक्रिया वर्तते या नवीनज्ञानं प्रकाशयति अथवा पूर्वस्य त्रुटीनां भ्रान्तीनाञ्च परिमार्जनं करोति एवं ज्ञानस्य विद्यमानकोशे व्यवस्थितरूपेण वृद्धिं करोति।

(Research is an intellectual activity which brings to light new knowledge or corrects previous errors and misconceptions and adds to orderly way to existing corpus of knowledge. -M.Verma)

ब्रूस.डब्ल्यू टकमैनमहोदय: अनुसन्धानशब्दमित्थं परिभाषयति। अनुसन्धानं प्रश्नानामुत्तरं प्रदातुम् एक: व्यवस्थितो प्रयासोऽस्ति। उत्तरमिदं अमूर्तं सामान्यं वा भवितुं शक्नोति यथा प्राय: मूलानुसन्धाने भवति अथवा अत्यधिकस्थूलं विशिष्टं वा भवितुं शक्नोति यथा प्राय: प्रदर्शनात्मकं प्रयुक्तं वा अनुसन्धाने भवति।

(Research is systematic attempt to provide answer to questions. such answers may be abstract and general as is often the case in basic research or they may be highly concrete and specific as is often the case in demonstration or applied research. -B.W. Tuckman)

**एल.वी.रैडमैन ए.बी.एच मोरीमहोदयाभ्यामनुसारेण** नवीनज्ञानस्य प्राप्त्यर्थं क्रियमाणो व्यवस्थित: प्रयास: एव अनुसन्धानम्। (Research is a systematic effort to gain new knowledge.- L.V. Redman &A.V.H. Mory.)

अनुसन्धानस्य उक्तपरिभाषाणां सूक्ष्मनिरीक्षणे इदं स्पष्टमस्ति यत् अनुसन्धानं कस्या: अपि अर्थपूर्णसमस्याया: मौलिकसमस्याया: वा समाधानान्वेषणस्य एक: एतादृश: व्यवस्थित: वस्तुनिष्ठ: सोद्देश्य: तर्कसंगत: इन्द्रियानुभाविकश्च प्रयास:। यस्मिन् वैज्ञानिकविधे: प्रयोगो भवति।

## 1.7 अनुसन्धानस्य प्रकृति:

नि:सन्देह: अनुसन्धान प्रक्रिया स्वसंसोधनीया पुनरावृत्तियोग्या तथा सार्वभौमिक प्रकृतिर्भवति एवं यस्य माध्यमेन प्राप्ता: परिणामा: संचरणयोग्या: भवन्ति। वस्तुत: अनुसन्धानकार्यम् एकस्या: बौद्धिका: सृजनात्कप्रक्रियायाश्च सूचिको भवति। यस्य सम्बन्ध: सदैव ज्ञानसृजनेन आबद्धो भवति। अनुसंधानस्यविधेर्प्रकृतिं प्रतिबिम्बतकारिका तस्य काचित् विशेषता: अग्रे प्रस्तूयते। यास्यावलोकनेन अनुसन्धानस्य प्रकृते सम्यक् रूपेण अवबोधं कर्तुं शक्यते।

1. अनुसन्धानेन नवसिद्धांतानां तथ्यानां वा विकासस्य प्रयासो क्रियते येन नवीनज्ञानस्य प्राप्ति: भवति।
2. अनुसन्धानकार्यं पूर्वसंपादितानुसन्धानेषु जायमानां त्रुटीनां निवारणे वा परिमार्जने सहायतां करोति।
3. भाविघटनानां तथ्यानां वा परिस्थितीनां अध्ययने पूर्वकथने सहायतां करोति।
4. अनुसंधानकार्यं सर्वदा कस्या: अपि अनुभूतसमस्याया: समाधानं करोति अथवा समाधानदिशि प्रवृत्तं भवति।
5. अनुसन्धानकार्ये द्वयो: द्वयाधिकचराणां वा मध्ये विद्यमानसम्बन्धज्ञानाय प्रयासं क्रियते।
6. अनुसन्धानस्य परिणामा: अवलोकितानुभवानां वा इन्द्रियानुभाविक-साक्ष्याणामुपरि आधारिता: सन्ति।
7. अनुसन्धानकार्यस्य संपादनं सुनियोजितं क्रमबद्धरूपेण क्रियते। अत: एव अनुसन्धानकार्ये अनुसन्धानकर्तारौ धैर्यम् आवश्यकं वर्तते।
8. अनुसन्धानकार्यस्य संपादने समस्याचयने, प्राक्कल्पनानिर्माणे, प्रदत्तसंकलने, विश्लेषणप्रविधीनां चयने च विशेषज्ञता: अपेक्षिता: भवति।

9. अनुसन्धानकार्ये समस्यायाः पुनरावलोकनमपि क्रियते यत् परिस्थित्यानुसारेण समस्यायाः स्वरूपे परिवर्तनं भवति।

10. अनुसन्धानकार्यस्य परिणामाः निष्कर्षाः वा तस्याध्ययनस्य क्षेत्रे ज्ञानवर्धकं प्रामाणिकं पुष्टीयोग्यं च भवति।

11. अनुसन्धाने चयनितसमस्यायाः समाधानस्य प्रतिपादनं आंशिकं वा पूर्णरूपेण तथ्यानामुपरि आधारितं भवति।

12. अनुसन्धाने विषयस्य गहनाध्ययनं ज्ञानं च अपेक्षितं वर्तते।

13. अनुसन्धानकार्ये प्रदत्तानां संकलनं, व्यवस्थापनं, विश्लेषणञ्च वस्तुनिष्ठं तर्कयुक्तं करणीयम्।

14. सामान्यतया शैक्षिकानुसन्धानेन प्राप्तपरिणामानां व्यावहारिकपरिस्थित्यां सामान्यीकरणं क्रियते।

## 1.8 अनुसन्धानस्य वर्गीकरणम्

यद्यपि अनुसन्धानस्य वर्गीकरणं कठिनं कार्यं भवति। भिन्न-भिन्न-पाठ्यपुस्तकेषु अनेकानि वर्गीकरणानि भिन्न-भिन्न-प्रकारेण प्रस्तावितानि सन्ति। अनुसन्धानकार्यस्य एकमेव सर्वस्वीकृतः वर्गीकरणं न भवितुम् अर्हति। अनुसन्धानकार्यस्य प्रकृतेः उद्देश्यानुसारञ्च अनुसन्धानकार्यं कर्तुं अनुसन्धानकर्तारः अनेकविधिना सहायं गृह्णाति। एतत् कारणात् विद्वांसः अनुसन्धानस्य अनेकवर्गीकरणं दत्तवन्तः। तेषु केचन वर्गीकरणानि अधोलिखितानि सन्ति।

### 1. अनुसन्धानस्य विध्याधारेण वर्गीकरणम्

वर्गेऽस्मिन् बेस्ट-काह्नमहोदयोः प्रस्तावितवर्गीकरणं (Best & Kahn, 1992) श्रेष्ठं मन्यते तथा च वर्गीकरणस्य मानदण्डत्वेन विचार्य विध्याधारेण अनुसन्धानं निम्नलिखितेषु मुख्यत्रयभागेषु विभक्तुं शक्यते-

- **ऐतिहासिकानुसन्धानम्** - ऐतिहासिकानुसन्धाने पूर्वघटनानां वर्णनं, विश्लेषणं, व्याख्या च भवति येन समुचितसामान्यीकरणं कर्तुं शक्यते। एतादृशः सामान्यीकरणां न केवलं भूत-वर्तमान-क्रियाणां अवगमने सहायकः भवन्ति, अपि च ते प्रत्याशित-भविष्यस्य (anticipated future) अवगमने सहायकः भवन्ति। अतः एतत् वक्तुं शक्यते यत्

ऐतिहासिकानुसन्धाने मूलतः 'किं आसीत्' (what was) इति वर्णनं भवति।

- **वर्णनात्मकम्/विवरणात्मकानुसन्धानम्**- वर्णनात्मकानुसन्धाने वर्तमान-परिस्थितेः वर्णनं, विश्लेषणं, व्याख्या च भवति। एतादृश अनुसन्धानकार्येषु अविचलितचराणाम् (Non-manipulated variables) सम्बन्धस्य विश्लेषणं भवति। अनुसन्धानोऽयम् अप्रयोगात्मकं वा सहसंबंधात्मकानुसन्धानमपि (Non-experimental or correlational research) कथ्यते। एतादृशं अनुसन्धानं मूलतः 'किम् अस्ति' (what is) इति वर्णितम् अस्ति।
- **प्रयोगात्मकानुसन्धानम्**- प्रयोगात्मकानुसन्धाने चराणां नियन्त्रणेन वा परिवर्तनेन (manipulate)अन्यचरस्य उपरि तस्य प्रभावस्य अध्ययनं भवति। अतः एतादृशेषु अनुसन्धानकार्येषु मूलतः अध्ययनं भवति यत् ये चराः सन्ति तेषां नियन्त्रणस्य वा परिवर्तनेन (manipulate) किं प्रभावः भविष्यति। अतः अनुसन्धानेऽस्मिन् परिस्थितेः अनुमानं कृत्वा किं भविष्यति (what will be) इति प्रश्नस्य उत्तरं दातुं प्रयत्नः क्रियते।

## 2. अनुसन्धानस्य प्रकृत्याधारेण वर्गीकरणम्

- **वर्णनात्मकानुसन्धानम्**- वर्णनात्मकानुसन्धानस्य उद्देश्यं विषयस्य वा समस्यायाः विषये वास्तविकतथ्यानां संग्रहणं कृत्वा तेषां आधारेण व्याख्यानं प्रस्तुतं कर्तुं भवति। एतादृशेषु अनुसन्धानकार्येषु घटनानां वास्तविकरूपेण चित्रणं कर्तुं विशेषं बलं दियते। वर्णनात्मकमनुसन्धाने अनुसन्धानकर्तायाः भूमिका निष्पक्ष-अवलोकनकर्तायाः भवति। घटनोत्तर-अध्ययनं, व्यष्टि-अध्ययनं, सर्वेक्षणं च अस्य अनुसन्धानस्य केचन प्रकाराः सन्ति।
- **विश्लेषणात्मकानुसन्धानम्**- विश्लेषणात्मकानुसन्धाने अनुसन्धानकर्ता प्रथमं तत्सम्बद्धस्य विषयस्य वा घटनायाः विषये सूचनां संग्रहयति। ततः सूचनायाः एव आधारेण संकलितसामग्रीणाम् आलोचनात्मकं विश्लेषणम् उपस्थापयति। अनुसन्धानेऽस्मिन् प्रदत्तानां विश्लेषणे अनुसन्धानकर्तरि सूक्ष्मावलोकनं, अन्तर्दृष्टियुक्तं च अवगमनं आवश्यकम् अस्ति।
- **क्रियात्मकम् अनुसन्धानम्**- क्रियात्मकम् अनुसन्धानम् एका प्रक्रिया अस्ति यस्याः उद्देश्यं मौलिकसमस्यानां अध्ययनेन नूतनानां तथ्यानां आविष्कारः, जीवनसत्यस्य स्थापनं, नूतनसिद्धान्तानां निर्माणं च भवति।

क्रियात्मकस्यानुसन्धानस्य केन्द्रं तात्कालिकसमस्यानां शीघ्रमेव समाधानं भवति। इदमनुसन्धानकार्यं व्यवहारिकसमस्यानां समाधानार्थं तथा च विद्यमानानां परिस्थितीनाम् उन्नयनार्थं बलं प्रददाति।

### 3. अनुसन्धानोपागमनामाधारेण वर्गीकरणम्

- **गुणात्मकानुसन्धानम्**- गुणात्मकानुसन्धानस्य उपयोगः मानवव्यवहारस्य, अनुभवानां, मनोवृत्तीनाम्, अभिप्रायाणां, अभिप्रेरणानां च गहनतया अवगमनाय, अवलोकनाय, व्याख्यायै च भवति यत् जनानां चिन्तनस्य, भावस्य च अन्वेषणं भवति। अस्मिन् अनुसन्धानकर्त्ता प्रतिभागिनां मतानाम् अधिकं महत्त्वं ददति। दार्शनिकानुसंधानं, प्रजातिकानुसंधानं, केस-स्टडी, ऐतिहासिकानुसन्धानं घटनाशास्त्रीयानुसन्धानञ्च गुणात्मकानुसन्धानस्य प्रकाराः सन्ति।
- **मात्रात्मकानुसन्धानम्**- मात्रात्मकानुसन्धानं परिमाणात्मकं वा सांख्यिकीय-सूचनायाः आधारेण भवति। एतत् अनुसन्धानं सर्वेक्षणं, संरचनात्मक-साक्षात्कारम्, अवलोकनम्, अभिलेखानां समीक्षां, प्रतिवेदनानि च इत्यादीनाम् आधारितं भवति। गणितीयसांख्यिकीय-पद्धतीनां प्रयोगं कृत्वा द्वयोः चरयोः मध्ये कारणप्रभावसम्बन्धस्थापनमस्योद्देश्यं भवति। घटनोत्तर-अध्ययनं, प्रयोगात्मकमध्ययनं, सर्वेक्षणं च अस्य अनुसन्धानस्य केचन प्रकाराः सन्ति।

### 3. अनुसन्धानकर्त्र्याः आधारेण वर्गीकरणम्

- **वैयक्तिकानुसन्धानम्**- येषु अनुसन्धानकार्येषु एकाः एव व्यक्तिः अनुसन्धाने संलग्ना भवति तेन वैयक्तिकानुसन्धानं कथ्यते। उपाधिप्राप्त्यर्थं कृतमनु-सन्धानमेव व्यक्तिविशेषस्य नाम्ना आवंटितं प्रयोजनगतमनुसन्धानेऽस्मिन् वर्गे आगच्छति। अत्र सङ्केतोऽयमनिवार्यं यत् वैयक्तिकानुसन्धानेष्वपि आवश्यकव्यक्तीनां परामर्शः प्राप्तुं शक्यते।
- **सामूहिकानुसन्धानम्**- येषु अनुसन्धानकार्येषु बहवः जनाः सहयोगात्मक-रूपेण कार्यं कुर्वन्ति तत् सामूहिकानुसन्धानमस्ति। विविधासंस्थाः समूहान् वा आवंटितम् अथवा विशालव्यवसायिकसंस्था माध्यमेन कृतमनुसन्धानं प्रायः अस्मिन् वर्गे आयान्ति।

**4. प्रायोजकस्याधारेण वर्गीकरणम्**

- **राजकीयपोषितानुसन्धानम्**- येभ्यः अनुसन्धानकार्येभ्यः आवश्यकं धनं वित्तीयसंसाधनकेन्द्रं, राज्यसर्वकारेण अथवा अनुदानितमनुसन्धानं वा कथ्यते। विभिन्नेभ्यः मन्त्रालयेभ्यः विश्वविद्यालयानुदानायोगेन, आई. एस.एस.आर. माध्यमेन प्रदत्तानुदानेन चलायमानमनुसन्धानं वर्गेऽस्मिन् आयान्ति।
- **संस्थागत-पोषितानुसन्धानम्**- येभ्यः अनुसन्धानकार्येभ्यः वित्तीयसंसाधनानां उपलब्धिः संस्थामाध्यमेन संघटनमाध्यमेन वा स्वयमेव क्रियते। तेन संस्थागतवित्तपोषितमनुसन्धानमुच्यते। विभिन्नैः व्यावसायिकसंस्थानैः कृतमनुसन्धानम् अथवा तेन प्रयोजितमनुसन्धानं अस्यां श्रेण्याम् आयान्ति।
- **स्ववित्तपोषित-अनुसन्धानम्**- येभ्यः अनुसन्धानकार्येभ्यः आवश्यकस्य संसाधनस्य एकत्रीकरणमनुसन्धानकर्तुः स्वकीयमुत्तरदायित्वं भवति तेन स्ववित्त-पोषितानुसन्धानमुच्यते। स्वकीयेन अनुसन्धानकर्त्रा कृतमनुसन्धानं तथा डी.लिट., डी.एस.सी., पीएच.डी. इत्यादीनाम्ः उपलब्ध्यर्थं कृतमनुसन्धानं प्रायः अस्मिन् वर्गे एव यान्ति।

अनुसन्धानस्य प्रकारसम्बन्धिचर्चामध्ये सङ्केतोऽयं समीचनम् एव भविष्यति यद् अनुसंधानस्य उपर्युक्तवर्णितं वर्गीकरणं परस्परं पूर्णरूपेण भिन्नं नास्ति अपितु तेषु एकस्य प्रकारस्य अत्याच्छादता दृष्टिगोचरा भवति। इदमेवकारणमस्ति यत् एकस्य प्रकारस्यानुसन्धानं विभिन्नेषु वर्गीकरणेषु समावेशितो भवति। यदा कदा अनुसंधानमुपागमानामपि पृथक्रूपेण चर्चा क्रियते। अनुसंधानस्य उपर्युक्तवर्णितैः वर्गीकरणैः स्पष्टं भवति यत् अनुसन्धानस्य द्वौ प्रमुखौ उपागमौ गुणात्मकोपागमः मात्रात्मकोपागमश्च।

गुणात्मकोपागमे तत्र गुणात्मकप्रदत्तानां सङ्कलनं व्याख्याकार्यं वा निहितं भवति। तत्रैव मात्रात्मके उपागमे मात्रात्मकप्रदत्तानां सङ्कलनं साङ्ख्यिकीयकार्यं विश्लेषणम् अपेक्षितं भवति। गुणात्मकोपागमः सूचनानां विषयपरकपरीक्षणेन युक्तो भवति। यतोहि मात्रात्मकोपागमस्य सम्बन्धः वस्तुनिष्ठप्रकारेण प्राप्तप्रदत्तानां विश्लेषणे भवति। गुणात्मकोपागमे उपयोगिपत्राणाम्, अवशेषानां, केन्द्रितसमूह-विचारविमर्शानां प्रेक्षणीयप्रविधीनां गहनसाक्षात्काराणां वा इत्यादीनां साहाय्येन

सूचनाः सङ्कलिताः भवन्ति। यतोहि मात्रात्मकोपागमे प्रश्नावलीपरीक्षणं मापनयन्त्राणां वा प्रयोगः प्रदत्तसङ्कलनार्थं क्रियते। अत्र सङ्केतोऽयं समीचीनम् एव भविष्यति यत् मात्रात्मकोपागमः निष्कर्षात्मके प्रयोगात्मके तथा अनुरूपणात्मके वा त्रिधा विभाजनं कर्तुं शक्यते। निष्कर्षात्मकोपागमे प्रतिदर्शमाध्यमेन प्राप्तप्रदत्तानां विश्लेषणेन प्राप्तपरिणामानां जनसंख्यासमीकरणं क्रियते। प्रयोगात्मकोपागमे नियन्त्रित परिस्थितौ कस्यापि चरस्य अन्ये चरे प्रभावं दृष्ट्वा कार्यसम्बन्धस्य प्रतिपादनं क्रियते। अनुरूपणात्मकोपागमे कृत्रिमरूपे आरोपितौ परिस्थितौ विभिन्नसमयान्तरालेषु व्यवहारपरिवर्तनस्य प्रक्रियायाः अध्ययनं भवति। अनुरूपणात्मकोपागमः भविष्यार्थं व्यवहारपरिवर्तनस्य सम्बद्धीनिदर्शस्य विकासे सहायको भवति।

## 1.9 अनुसन्धानस्यौचित्यम्

शिक्षणप्रभावशीलतायाः तात्पर्यमस्ति शिक्षणकौशलेन व्यावसायिकयोग्यता-भिस्सहैव शिक्षणोद्देश्यस्य प्राप्तिः। बहुलत्वेनापेक्षितोद्देश्यप्राप्तये शिक्षकस्य छात्रैस्सह तदनुभूतिमुचितं व्यवहारस्य स्वव्यवसायञ्च प्रत्युचिताभिवृत्तेर्विशिष्टं महत्त्वमस्ति। अध्यापकः छात्राणां मानसिकस्वास्थ्यस्य वृद्ध्यर्थं सकारात्मकः रुचिः तेषु तादृशं विश्वासं च विकासयेत् येन मूल्यानां सर्जनात्मकतायाः अन्येषाम् अन्तर्निहित-क्षमतानाञ्च प्रस्फूटनं विकशनञ्च भवेत्। शिक्षणं शिक्षकस्य विद्वत्ताधारिता स्यात्, अथ च विद्वत्ता तावत् सार्थकं नास्ति यावत् सा छात्रेषु न सञ्चारिता भवेत्। अस्याः सञ्चारणसफलतायाः मात्र छात्रशिक्षकयोर्मध्ये अन्तःक्रियायाः प्रभावितायां निर्भरा भवति। अनया दृष्ट्या शिक्षके भावात्मकबुद्धेः महत्यावश्यकता। डेनियलगोलमैनमहोदयेन स्वपुस्तके स्पष्टं कृतं यत्- व्यक्तेः जीवने याः सफलताः प्राप्यन्ते तासां विंशतिप्रतिशतमेव बुद्धिलब्धिद्वारा भवति। शिष्टायाः अशीतिप्रतिशता- सफलतायाः कारणं भावात्मकबुद्धिरेव भवति। अनेकेषां अनुसन्धानकार्याणां माध्यमेन विद्वद्भिः अस्य सम्प्रत्ययस्य स्पष्टीकरणं प्रदत्तम्।

भावात्मकबुद्धेः विशेषतामवगन्तुमस्य ज्ञानं परमावश्यकम् यदुत्सर्गेण बुद्धिः यदर्थं स्वीक्रियते शैक्षिकक्षमतया संज्ञानात्मकक्षमतया सह च तस्य सम्बन्धो भवति, किन्तु अस्याः नूतनावधारणाया अन्तर्गते व्यक्तेः संवेगात्मकविलक्षणता अथ च तदाधारेण स्वजीवने व्यवसाये च कुशलताप्राप्तेः, प्रभावस्य सफलतायाश्च प्राप्तेः सम्भावनाभिः विशिष्टः सम्बन्धोभवति। केषाञ्चिन्मनोवैज्ञानिकानाम् इदमभिमतमस्ति यद् बुद्धेः प्रचलितास्ववधारणासु तेषां गुणानां प्रायशः पुरुषान्प्रति

विशिष्टं बलं ददाति, यथा- ऊर्जाया आधिक्यम्, अन्तर्नोदः, सम्प्राप्तिः, प्रतिद्वन्द्विता इत्यादयश्च। किन्तु अस्य विपरीतं भावात्मकबुद्धेः अन्तर्गते तेषु गुणेषु विशेषं च बलं प्रदीयते ये परम्परया प्रायशः स्त्रीभिः सम्बद्धाः क्रियन्ते। यथा तदनुभूतिः, आत्मनियन्त्रणम्, संवेगात्मकगुणादयः। एवं 'भावात्मकबुद्धौ' बुद्धेः सामान्यावधारणां परिलक्षितान् पुरुषप्रधानगुणान्प्रति विशेषाग्रहं सन्तुलीकुर्वन् उभयोः स्त्रीपुरुषयोः गुणानां समन्वयस्य प्रयासः कृतः, येनावधारणा स्वप्रकृतौ उभयलिङ्गतायाः (Andorogynous) परिसूचिका भवति।

भावात्मकबुद्धिः सा क्षमता अस्ति, या व्यक्तेः व्यवहारं निष्पादनं निर्णयं च प्रभावयति। भावात्मकबुद्ध्या वैशिष्ट्यानां अवबोधार्थम् इदं ज्ञानमावश्यकं यद् बुद्धेः अर्थो भवति शैक्षिकसंज्ञानात्मकक्षमता। एतद्विपरीतमस्य नवीनावधारणामन्तर्गते व्यक्तेः संवेगात्मकविलक्षणता तथा च अस्याधारेण स्वजीवने व्यवसाये च कुशलतां प्रभावितां सफलतां च प्राप्तुं सम्भावनायाः सम्बद्धं भवति। अत एव भावात्मकबुद्धिः विशेषरूपेण संवेगात्मकप्रगाढतया सह सम्बद्धास्ति। भावात्मकबुद्धिः व्यक्तेः स्वजीवने स्वस्य भवानात्मकपक्षानां व्यवस्थापने नियन्त्रणे च अन्येषां भावनात्मकपक्षाणाम् अवधेयानन्तरं तदनुसारव्यवहारसंपादने सहायिका भवति। व्यक्तेः जीवने भावात्मकबुद्धेः महत्त्वम् अधोवर्णितारेखमाध्यमेन (आरेखः-1. 12) तस्य स्पष्टीकरणाय प्रयासः विहितो विद्यते।

**आरेखः (1.12)**

**व्यवसायस्य विभिन्नक्षेत्रे भावात्मकबुद्धेरुपयोगिता**



प्रस्तुत-अनुसन्धानस्य आवश्यकतादृष्ट्या उल्लेखनीयमस्ति यत् शिक्षणाधिगमप्रक्रियायाः सफलता शिक्षकस्य योग्यतया सहैव छात्रैस्सह तस्यानुकूले उचिते च व्यवहारे वा क्रियायां निर्भरास्ति। शिक्षकस्य प्रभावशीलता तदैव सिद्धा भवति यदा सः छात्रैस्सहोचितं सम्बन्धं स्थापयन् छात्रभावनाञ्चाधिगच्छन् तदनुसारं व्यवहरति।

प्रस्तुता भावात्मकबुद्धिः एकाऽधिगम्या योग्यताऽस्ति। क्षमतायाः अस्याः प्रयोगः जीवनकौशलस्य विकासाय कर्तुं शक्यते। अस्याः अवधारणायाः महत्त्वं साम्प्रतिकस्य युगस्य व्यावसायिकं जीवनं नूतनपरिस्थितौ सामान्यरूपेणैव द्रष्टुं शक्यते। शिक्षायाः शिक्षणस्य प्रशिक्षणस्य च व्यवस्थासु अपेक्षितस्तरस्य प्रभावरुत्पादनदृष्ट्याऽपि सम्प्रत्ययोऽयमुपयोगी अस्ति। परिप्रेक्ष्येऽस्मिन् सेवापूर्व-शिक्षकेषु आत्माभिज्ञतायाः, आत्मसंयमस्य, अभिप्रेरणायाः, तदनुभूतिजन्यस्य सामर्थ्यस्य, सामाजिकदक्षतायाश्च सम्बर्द्धने बलप्रदानमावश्यकम् येन ते छात्रैस्सह समग्ररूपेण व्यवहरन् तैः सह सामञ्जस्यं स्थापयेयुः। अथ च तेष्वपि उक्तगुणान् संचार्य एकस्य समरससमाजस्य स्थापनां कुर्युः। भावात्मकबुद्धेः महत्त्वं अग्राङ्कितारेखे (1.13) वर्णितमस्ति।

आरेख (1.13)

**सामाजिकव्यवहारसम्पादने भावात्मकबुद्धेः महत्त्वम्**



टेनिस हेलिवेल (2001) अकथयत् यद् बुद्धेः प्रकारत्रयं वर्तते येन अस्माकं जीवने आंतरिकसफलतायाः बाह्यसफलतायाः वा निर्धारणं भवति। शैक्षिकबुद्धिः तार्किकबुद्धिर्वा बौद्धिकबुद्धिः भवति। सामान्यरूपेण एतादृशी बुद्धिः उच्चतार्किकगणितीयभाषासंबंद्धप्रतिभया सह सम्बद्धा भवति। समस्यायाः समाधाने सहायिका च भवति। भावात्मकबुद्धिश्च सफलतायाः निर्धारणे शैक्षिकबुद्धिरिव महत्त्वपूर्णा अस्ति। उच्चभावात्मकबुद्धियुक्तजनाः अन्यैः सह सुमधुरं संबंद्धं स्थापयन्ति, आत्मसम्मानमपि इच्छन्ति, विभिन्नासु परिस्थितिषु समुचितसमायोजनं च कुर्वन्ति। आध्यात्मिकबुद्धिः सर्वेषां कल्याणार्थं आवश्यकी भवति। एषा बुद्धिः अस्माकं जीवने सामाजिकोन्नयनाय योजयति। जीवने अर्थपूर्णोद्देश्यं प्रददाति। एषा बुद्धि अस्मान् नूतनसंभावनायाः निर्माणाय परिस्थितिम् उत्पादयति। आध्यात्मिकबुद्धिः अस्मिन् संसारे अस्माकं वैयक्तिकगुणानां प्रकटीकरणाय संयुक्तरूपेण अस्माकं शैक्षिकभावात्मकबुद्ध्योः प्रयोगस्य परिस्थितिं निर्माति, सा परिस्थितिः अस्माकं जीवनं सर्वेषां प्राणिभिः सह योजयति। आध्यात्मिकबुद्धिः वैश्विकबुद्धिः भवति।

अब्राहम-मॉस्लो (1954)महोदयेन स्वस्य 'हायरेरकी ऑफ नीड्स' (Hierarchy of Needs) पुस्तके उक्तं यत् यथा यथा व्यक्तिः आत्मभिज्ञतायाः (self actualization) श्रेष्ठतायाः (Transcendece) स्थितिं प्राप्नोति सः अधिकप्रौढः बुद्धिमान् च भवति। आत्माभिज्ञता आत्मसाक्षात्कारस्य सर्वोच्चस्थितिः अस्ति। अस्यां स्थितौ तत्प्राप्तये आध्यात्मिकबुद्धेः महत्त्वपूर्णं योगदानं भवति। डेनियल (2001) महोदयेन परामर्शः प्रदत्तो यत् मॉसलोमहोदयस्य अन्तिमो निष्कर्षो यत् आत्माभिज्ञता (Self-Actualization) व्यक्तेः व्यवहारे दृष्टिपथं भवति, मानवव्यवहारस्य अभिप्रेरणायाः अध्ययने तस्य एकं महत्त्वपूर्णं योगदानम् अस्ति। बुद्धिः व्यक्तेः व्यवहारस्यैव एकम् अङ्गं भवति अतः बुद्धेः अध्ययने अपि इमं सिद्धान्तं गण्यते। आत्मभिज्ञता (Self-Actualization) व्यक्तेः आन्तरिकयोग्यताभिः ज्ञान- अभिवृत्ति- कौशलप्रभृतिभिः सह सम्बद्धा भवति तदा श्रेष्ठता (Transcendence) अन्येषु दक्षतायाः योग्यतायाः विकासे सहयोगरूपेण अज्ञातेन सम्बन्धरूपेण च प्रकटितं भवति। आध्यात्मिकबुद्धि कस्यापि व्यक्तेः आत्मा अथवा स्वबुद्ध्या मानवीयमूल्यानां कृते उच्चस्तरीयविवेकशीलतया करुणया प्रतिबद्धतया सह जीवने सामाजिकरूपेण प्रासंगिकोद्देश्यस्थापनस्य क्षमतायाः रूपेण बोद्धुं शक्यते। इयं बुद्धिः व्यक्तेः शैक्षिकस्य भावात्मकबुद्धेश्च (ज्ञानम्,

प्रशंसा, जनसम्बन्धः, सहानुभूतिः प्रभृतादयः) विकासेन सह वर्धते। सामान्या शैक्षिकी वा बुद्धिः संवेगात्मिका च बुद्धिः यत्र आध्यात्मिकबुद्धे अस्तित्वरूपेण स्थापनस्य कारणं भवति। तत्र आध्यात्मिकबुद्ध्या शैक्षिकबुद्धेः संवेगात्मकबुद्धेश्च उचितविकासस्य कल्याणकारिप्रयोगहेतवे उचितमार्गं प्रशस्तयति। शैक्षिकबुद्धिः अस्मान् शीघ्रतया चिन्तने, भावात्मकबुद्धिः सम्बन्ध- निर्माणे, आध्यात्मिकबुद्धिः अनयोः द्वयोः कार्ययोः शीघ्रतया सम्पादने सामञ्जस्यं स्थापयति। आध्यात्मिकबुद्धिः आन्तरिकज्ञानं गभीरावबोधनम् च विकासयति। शिक्षायां मनोविज्ञाने च मानसिकशक्तीनां तासां मापनावधारणायां कोऽपि नवीनः विषयो नास्ति परन्तु आध्यात्मिकबुद्धिं शिक्षाजगते कतिपयनवीनसम्प्रत्ययरूपेण अवबोद्धुं शक्यते। उपरोक्तविवरणेन इदं स्पष्टं भवति यत् भावात्मकबुद्धिः सुमधुरसमायोजनस्य कृते प्रभावी अनुकूलनक्षमता अस्ति चेत् आध्यात्मिकबुद्धिः समस्यायाः अर्थस्य मूल्यस्य अन्तिममौलिकविचारेण च सहैव परिचयार्थं तत्समाधानहेतवे च अवगम्यते। शैक्षिक-भावात्मक-आध्यात्मिकबुद्धयः मानवबुद्धेः कठिनसमस्यां प्रस्तुवन्ति। बौद्धिक-शैक्षिकबुद्धी व्यक्तेः संज्ञानात्मकक्षमतानां मापनं क्रियते। परन्च दैनिकजीवने व्यक्तिः यासां समस्यानां परिस्थितीनां प्रत्यक्षं करोति, तासां भावात्मकपरिस्थितीनां कृते इयं बुद्धिः योग्यता वा व्यक्तिं न्यूनसज्जतां सम्पादयति। अतः यदि व्यक्तेः सम्पूर्णव्यक्तित्वस्य विकासस्य चर्चा भवति चेत् तदा केवलं शैक्षिकयोग्यतायाः बौद्धिकयोग्यतायाः (IQ) ज्ञानं पर्याप्तं नास्ति अपितु आसां त्रयाणां शैक्षिकबुद्धि-भावात्मकबुद्धि (EQ)-आध्यात्मिकबुद्धीनां (SQ) परिज्ञानम् उपयुक्तं भवेत्।

## सारिणी-1.2

## शैक्षिकभावात्मकाध्यात्मिकबुद्धेः पृथक्-पृथक्रूपेण विशेषता

| शैक्षिकबुद्धिः (IQ) | भावात्मकबुद्धिः (EQ) | आध्यात्मिकबुद्धिः (SQ) |
|---|---|---|
| तार्किकदृष्टिकोणम् | समायोजनपूर्ण दृष्टिकोणम् | परिमाणात्मकं दृष्टिकोणम् |
| शांतिप्रिय/न्यायपालनम् | सामंजस्यं सहयोगश्च | पुनः संदर्भीकरणम् |
| प्रायः नियंत्रणयोग्यम् | स्वभावबद्धः नियंत्रितश्च | अस्तव्यस्तता |
| एकाकीभावे बलम् | परस्परमिलनभावनायां बलम् | एकीकरण/समन्वयने |
| पूर्वकथनीयम् | अस्पष्टम् | बलम् |
| प्रभुत्वप्रियः | | अप्रत्याशितम् |

निष्कर्षरूपेण कथयितुं शक्यते यत् आध्यात्मिकबुद्ध्या जनाः दूरदृष्टिं प्राप्नुवन्ति। जनानां भावनाः तेषां बौद्धिकप्रक्रियां प्रभावयन्ति अथ च दूरदर्शिता उचितनिर्णयग्रहणे क्षमतां प्रददाति। सेवापूर्वशिक्षकाः भविष्यकालीनाः शिक्षकाः भवन्ति। भविष्ये ते कीदृशाः शिक्षकाः भवेयुः? एतत्सर्वं तेषां विषयविशेषज्ञतया शिक्षणकौशलस्य च ज्ञानेन सह तेषां, भावात्मकाध्यात्मिकबुद्ध्या प्रभावितं भवति। शैक्षिकबुद्धिः शिक्षणव्यवसायस्य सापेक्षितयोग्यताप्राप्तये सहायिका भवति सामर्थ्यं च प्रयच्छति। भावात्मिकाबुद्धिस्तावत् सामाजिकसम्बन्धे सुमधुरत्वं जनयति, आध्यात्मिकबुद्धिश्च कार्ययोजनायाम् अन्तःदृष्टिप्रदाने सहायिका भवति, अतः शिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः अध्ययनमावश्यकम्।

## 1.10 अनुसन्धानसमस्या

अनुसन्धानसमस्यायाः चयनम् एकं कठिनं कार्यमस्ति। सम्यक्-अनुसन्धान-समस्यायाः चयनार्थं अनुसन्धानकर्तरि चिन्तनं मननं विश्लेषणमिति विषये परिस्थित्यनुरूपं सम्यक् अवगमनस्य योग्यता आवश्यकी। तथापि अनुसन्धानकर्त्ता स्वानुभवेन स्वविषयक्षेत्रे पूर्वसंपादितानां अनुसन्धानकार्याणां समीक्षां कृत्वा अनुसन्धानसमस्यायाः निर्धारणं कर्त्तुं शक्यते। सामान्यतया अनुसन्धानसमस्या एतादृशी समस्या भवति यया द्वयोः वा ततोऽधिकचराणां मध्ये प्रश्नवाचक-संबंधस्याभिव्यक्तिः भवति। अर्थात् अनुसन्धानसमस्यायाः तात्पर्यं भवति द्वयोः ततोऽधिकानां चराणां मध्ये संबंधस्य प्रश्नरूपेण जिज्ञासारूपेण वा अभिव्यक्तिः। अनुसन्धानसमस्यायाः अभिव्यक्तिः कथनरूपेण अपि भवति। समस्यायाः लेखनं प्रश्नरूपेण कथनरूपेण वा भवेत्। उभयोः माध्यमेन प्रत्यक्षम् अप्रत्यक्षं वा द्वयोः ततोऽधिकानां चराणां संबंधस्य निरूपणं भवति।

अनुसन्धानसमस्यायाः विषये फ्रेड. एन. कारलिंगरमहोदयेन अकथयत्-समस्या एका प्रश्नवाचकरूपा कथनरूपा वा वचनं भवति, यः प्रश्नं करोति-द्वौ वा ततोधिकचराणां मध्ये कथं सम्बन्धं स्थापयति।

(A problem is an introgative sentence or statement that ask : What relation exits between two or more variable- Fred.N. Kerlinger)।

जॉन टाऊनसैण्डमहोदयेनोक्तम् यत् समस्या समाधानाय प्रस्तावितं प्रश्नमूलकम् अस्ति। ......समान्यतया समस्या तदा भवति यदा कस्यापि प्रश्नस्य कोऽपि उतरं न प्राप्यते।

(A problem is a question proposed for solution....generally speaking a problem exits where ther is no available answer to some question.-John C. Townsend)।

## 1.11 अनुसन्धानसमस्यायाः विशेषता

प्रायः कथ्यते यत् सुप्रस्तुतसमस्यायाः अर्ध समाधानं तदा एव भवति यदा अनुसन्धानकर्ता समस्यायाः विषये किञ्चित् सैद्धान्तिकं व्यावहारिकं च ज्ञानं प्राप्य समस्यायाः स्वरूपेण परिचितः भवति। अतः शोधकर्त्ता समस्यायाः लक्षणं ज्ञातव्यं येन समस्यायां द्वयोः वा ततोऽधिकचराणां मध्ये सम्बन्धः सम्यक् अभिव्यक्तुं शक्यते तथा च समस्यायाः समाधानं व्यावहारिकं सैद्धान्तिकरूपेण च उपयोगी भवति। अनुसन्धानसमस्यायाः काश्चन विशेषताः भवति। ऐताषां विशेषतानां ज्ञानं शोधकर्तुः कृते आवश्यकम् अस्ति।

- अनुसन्धानसमस्यायाः कथनस्याभिव्यक्तिः प्रश्नवाचकं भवति।
- अनुसन्धानसमस्याकथनेन द्वयोः वा ततोऽधिकचराणां मध्ये संबंधस्याभिव्यक्तिः भवति।
- अनुसन्धानसमस्या स्पष्टं मूर्तं च भवेत्।
- अनुसन्धानसमस्या समाधानयोग्या भवेत्।
- अनुसन्धानसमस्यायाः समाधानं सैद्धांतिकव्यवहारिकञ्च दृष्ट्या उपयोगी भवेत्।

अनुसन्धाने समस्याचयनं महत्त्वपूर्णं कार्यं भवति। अनुसन्धानकार्यस्य समारम्भं कस्यापि क्षेत्रस्य वा विषयस्य निर्धारणेन अवगमनेन वा भवति। तत्तत् क्षेत्रेषु विषयेषु वा विद्यमानसमस्यायाः परिज्ञानमेव अनुसन्धानस्य प्रथमसोपानं वर्तते। अत एव अनुसन्धानस्य सम्बन्धः कस्यापि क्षेत्रविशेषस्य समस्या, प्रश्नस्य स्पष्टं प्रत्यक्षीकरणे समाधाने च अस्ति। समस्याचयनं सृजनात्मकचिन्तनेन विश्लेषणेन च भवेत्। समस्यायाः क्षेत्रम् अधिकं व्यापकं वा संकुचितं न भवेत्। समस्यायाः प्रकृतिः गुणात्मकं परिमाणात्मकं भवेत्, परन्तु प्रश्नः कथनं वा स्पष्टम्, उद्देश्यपूर्णं, समस्याकेन्द्रितं च भवेत्। अस्या अभावेन अनुसन्धानकार्यस्य नियोजनं क्रियान्वयनञ्च सम्यग् रूपेण न भवितुं शक्यते। समस्यायाः समाधानार्थम् अनुसन्धानकर्तरि धैर्यस्य कर्मठतायाश्च आवश्यकता भवति। यस्य क्षेत्रविशेषस्य

समस्यायाः चयनं क्रियते तत्तत् क्षेत्रस्य ज्ञानमपि आवश्यकं वर्तते।

## 1.12 अनुसन्धानसमस्यायाः स्त्रोतांसि

अनुसन्धानकर्त्ता शिक्षाक्षेत्रे अनुभूतसमस्यानां, सामाजिक-वैज्ञानिक-तकनीकीक्षेत्रे जायमानानां परिवर्तनानां, पाठ्यपुस्तकम् अनुसन्धानजर्नल इत्यादीनाम्, अध्ययनं कृत्वा अनुसन्धानसमस्यायाः प्रतिपादनं कर्तुं शक्नोति। एकस्या वैज्ञानिका समस्यायाः प्रतिपादनं निश्चितरूपेण कस्यापि अनुसन्धानकर्तुः एकं दुष्करं कार्यं भवति। तथापि सः स्वीयं दुष्करं कार्यं सरलीकरणाय किञ्चद् स्त्रोतसाम् आश्रयं स्वीकरोति। येन माध्यमेन सः अनुसन्धानसमस्यायाः प्रतिपादनं कर्तुं शक्नोति। एतदतिरिच्य प्रायः वैयक्तिकानुभवः, परिस्थितिपरकावश्यकता, सामाजिक-परिवर्तनानि, साहित्यिकसमीक्षा, ऐतिहासिकाभिलेखाः, तकनीकीक्षेत्रस्य परिवर्तनानि, जिज्ञासुप्रवृत्ति अनुसन्धानसमस्यायाः प्रमुखस्त्रोतांसि सन्ति।

1. समाजे विद्यमानैः नूतनपरिवर्तनैः तथा शैक्षिकनवीनतया चापि अनुसन्धानकर्त्रा काचित् अनुसन्धानसमस्या प्राप्यते। यथा- आधुनिकयुगे शिक्षाक्षेत्रे प्रौद्योगिक्याः प्रयोगोऽधिकं भवति। अतः येन सम्बन्धितां काञ्चित् अनुसन्धानसमस्यां सरलतया अनुसन्धानकर्तारः प्राप्नुवन्ति।

2. अनुसन्धानकर्ता सामाजिकक्षेत्रे शिक्षाक्षेत्रे वा अनुभूतप्रमुखानां समस्यानाम् अध्ययनं कृत्वा शोधसमस्यायाः प्रतिपादनं कर्तुं शक्नोति। सम्प्रति विज्ञानस्य वर्तमानयुगे शिक्षाक्षेत्रे प्रौद्योगिक्याः अनुप्रयोगाय विशेषप्रयत्नाः क्रियन्ते। अस्यां परिस्थितौ विद्यालयस्य शिक्षकाः (विशेषतः ते शिक्षकाः ये सर्वकारस्य विद्यालयेषु सेवारताः सन्ति) कष्टमनुभवन्ति। अतः विषयोऽयम् अनुसन्धानस्य महत्त्वपूर्णमङ्गं निर्मातुं शक्यते। यथा सर्वकारः तथा च सर्वकारेतरविद्यालयेषु माध्यमिकस्तरस्य शिक्षणाधिगमप्रक्रियायां शिक्षकैः शिक्षिकाभिश्च प्रयुक्तेषु प्रौद्योगिक्योपागमेषु को भेदः अस्ति?

3. सफल-अनुसन्धानकर्ता एका वैज्ञानिकानुसन्धानसमस्यायाः प्रतिपादनं करणाय पाठ्यपुस्तकानां अनुसन्धानपत्रिकाणां चादीनां अध्ययनं सावधानतया करोति। बहूनि प्रकाशितानुसन्धानपत्राणि एतादृशानि भवन्ति येषु लेखकः सम्भावितानुसन्धानसमस्यां प्रति सङ्केतं करोति। एतदपि न कश्चित् पाठ्यपुस्तकेषु अनुसन्धानपत्रेषु च काचित् एवमेव प्रविधीनां कार्यविधीनां

चापि उल्लेखो भवति येन माध्यमेन अनुसन्धानस्य नूतनसमस्यायाः दर्शनं तु प्राप्यते परं सहैव तेषां निवारणाय अनुसन्धानकर्तृणां विशेषसहायतां प्राप्यते।

4. अनुसन्धानकर्तारः काश्चन वैज्ञानिकानुसन्धानसमस्यां प्रतिपादनाय अनुसन्धानाचार्येण विशेषज्ञेन च सह परामर्शं कुर्वन्ति।

5. यदा कदा कस्यापि अध्ययन-विषयस्य कानिचन् क्षेत्राणि एतादृशानि भवन्ति येषां विषये वैज्ञानिकज्ञानस्य पूर्णरूपेण न्यूनताऽस्ति। सामान्यतः एतादृशानि क्षेत्राणि तानि भवन्ति यस्मिन् सम्बन्धे यावत्पर्यन्तं कस्यापि प्रकारस्य अनुसन्धानं न जातम्। सम्प्रति येषां क्षेत्राणां ज्ञानाय अनुसन्धानकर्तृणां मनसि काश्चित् जिज्ञासाः उत्पद्यन्ते तदा स काञ्चन् प्रश्नान् स्वसमक्षे उपस्थापयति तदा अनुसन्धानसमस्यायाः उत्पत्तिर्भवति। मनोविज्ञानस्य क्षेत्रे परामनोविज्ञानं एकमस्याः श्रेण्याः क्षेत्रं तत्र अनुसन्धानकार्यं अधुनाऽपि न्यूनम्। अतीन्द्रियप्रत्यक्षमपि मनोविज्ञानस्य एकमेतादृशं क्षेत्रम्, अस्मिन् क्षेत्रे अद्यपर्यन्तं न्यूनानि अनुसन्धानकार्याण्यभवन्। अतः क्षेत्रेऽस्मिन् अनेकप्रकाराणां अनुसन्धानसमस्याः समुपस्थिताः।

6. अनुसन्धानसमस्याया उत्पत्तिः परस्पर विरोधीनां अनुसन्धानोपलब्धिनां परिस्थितिमाध्यमेनाऽपि प्राप्ता। यदा कदा इत्थं भवति यत् एकस्मिन् अनुसन्धानसमस्यायां परिस्थितिमाध्यमेनाऽपि पृथक्-पृथक् अनुसन्धान-परिणामः परस्परं भिन्नं भवति। अनुसन्धानकर्ता एतादृशीपरिस्थितौ इयं समस्या उत्पाद्यते यत् तेन कश्चन परिणामः सत्यमिति श्रूयते। अस्य निराकरणाय तेन समक्षे एकं नूतनं अनुसन्धानकार्यमागच्छति।

वेस्टमहोदयेन अथ च काहन्महोदयेन अनुसन्धानसमस्याया उत्पत्तेः षष्टिस्रोतसां वर्णनं कृतम्। येषु प्रमुखानि स्रोतांसि निम्नाङ्कितानि-

1. कार्यक्रमितनिर्देशः
2. चलचित्रस्य निर्देशः
3. समूहप्रशिक्षणम्
4. गृहकार्यम् अभ्यासश्च
5. पाठ्येतरकार्यक्रमः

6. आवृतवर्गम्
7. पाठ्यपुस्तकम्
8. स्वतन्त्राध्ययनकार्यक्रमः
9. यौनशिक्षणम्
10. विशेषशिक्षणम्
11. अधिकाराणामध्ययनम्
12. सामाजिकार्थिकाध्ययनम् शैक्षिकोपलब्धिश्च
13. विशेषप्रभावः उपलब्धिश्च
14. प्रशासनिकनेतृत्वम्
15. आत्म-प्रतिमा
16. छात्राणां व्यावसायिकोद्देश्यम्।

उपर्युक्तेषु केषाञ्चित् एतादृशानां सामान्यस्त्रोतसां वर्णनं कृतम्। येषु अनुसन्धानसमस्यानामन्वेषणं कर्तुं शक्यते। यंगमहोदयः अनुसन्धानसमस्यायाः उत्पत्तेः निम्नांकितं त्रयाणां स्त्रोतसां महत्वपूर्णतां स्वीकरोति।

1. **प्रलेखीस्त्रोतः**:- अस्मिन् स्त्रोते पदीयानामेव अपदीयानां सांख्यकीनां निरीक्षणविश्लेषणञ्च स्थानीयसमाचारपत्रेषु तथा जनगणनाप्रकाशनेषु तत्र वर्णात्मिकसामग्री सरलतया उपलब्धा भवति। स्त्रोतेऽस्मिन् एतादृशाविषयाः सम्मिलिताः सन्ति।

2. **पुस्तकालयस्त्रोतः**:- स्त्रोतेऽस्मिन् विभिन्नप्रकारानि पाठ्यपुस्तकानि, अनुसन्धानपत्राणि, मोनोग्राफम्, समाचारविश्लेषणञ्चादयः आयान्ति। येन स्त्रोतसा सैद्धान्तिक-व्यवहारिकाभ्याञ्च उभयोः ज्ञानसंग्रहः क्रियते। यस्मिन् आधारे अनुसन्धानसमस्यायाः विषये कञ्चित् निर्णयं कर्तुं शक्यते।

3. **वैयक्तिकस्त्रोतः**:- स्त्रोतेऽस्मिन् भिन्न-भिन्नव्यावसायिकजनैः सह वार्ता कृत्वा समस्या अन्वेषणाय प्रयासं क्रियते ये उपयोगी प्रमाणविषये सम्यक् ज्ञानं प्रददाति।

कस्यापि अनुसन्धानकार्यस्य प्रारम्भं इत्थं कर्तुं शक्यते येन वैज्ञानिकानुसन्धान-समस्यायाः परिचयो भवेत्। समस्यायाः समुद्घाटने मुख्यं कारणं भवति-

ज्ञानस्यापूर्णता, परस्परं विरोधीभूतपरिणामः, कस्मिन्नपि विषये च असमीचीना व्याख्या इत्यादिकम्। कापि समस्या समुचिता, उपयोगी, वैज्ञानिकी च भवति तत्र तस्याः ज्ञानार्थं विभिन्नानां प्रश्नानाम् अवधारणमावश्यकम्। उपर्युक्तविवरणेन इत्थं स्पष्टं भवति यत् अनुसन्धानसमस्यायाः उत्पत्तेः एकं नापितु अनेकानि स्रोतांसि भवन्ति यथा वैयक्तिकानुभवः, साहित्यसमीक्षा, ऐतिहासिकाभिलेखाः, परिस्थितिजन्यावश्यकता, सामाजिकपरिवर्तनानि, तकनीकीक्षेत्रस्य परिवर्तनानि, जिज्ञासुप्रवृत्त्यादयः, येन माध्यमेन अनुसन्धानकर्ता एकस्य वैज्ञानिकानुसन्धानस्य समस्यायाः सर्जनं करोति।

## 1.13 अनुसन्धानप्राक्कल्पना-अनुसन्धानसमस्ययोर्मध्ये विभेदाः

अनुसन्धानसमस्या द्वयोः द्वयाधिकचराणां वा मध्ये एकं प्रश्नात्मकं वाक्यं कथनं वा भवति। प्राक्कल्पना द्वयोः द्वयाधिकचराणां वा मध्ये व्यक्तस्य प्रश्नात्मककथनस्य एकमस्थायी समाधानं भवति। उभयोः बहुधा समानता दृश्यते यथा- उभयोर्माध्यमेन द्वयोः द्वयाधिकचराणां मध्ये एकस्य प्रस्तुतप्रकारस्य सम्बन्धस्य अभिव्यक्तिः दरीदृश्यते। द्वितीया समानता यत् याभ्यामुभयाभ्यां अनुसन्धानस्य दिशानिर्देशं प्राप्नोति, परञ्च उभयोर्मध्ये महत् अन्तरमस्ति।

1. प्राक्कल्पना द्वयोः द्वयाधिकचराणां वा मध्ये सम्भावितसम्बन्धस्य एकं परीक्षणीयं कथनं भवति प्रत्युत अनुसन्धानसमस्या तादृशः प्रस्तावितः प्रश्नः भवति यस्य समाधानं शोधकर्त्रेण कर्तव्यम् अस्ति। एषा समस्या आनुभाविकविधिमाध्यमेन परीक्षणीया भवति। एतत् उदाहरणद्वारा अवगन्तुं शक्यते। किं शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्याः एकीकरणेन अधिगमे वृद्धि भवति? दत्तोदाहरणे या अनुसन्धानसमस्या अस्ति तस्याः परीक्षणं कर्तुं न शक्यते। प्राक्कल्पना शोधसमस्यायाः समाधानस्य विषये अनुमानं प्रयच्छति। अतैव यदा शोधकर्ता शोधसमस्यायाः समाधानं कर्तुं प्रयतमानोऽपि अस्थायीप्रस्तावस्य निर्माणं करोति तदा एषः प्रस्तावः प्राक्कल्पना इति उच्यते, यस्य परीक्षणं कर्तुं शक्यते। यथा शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्याः एकीकरणेन प्रभावी अधिगमः भवति। एतत् एकस्याः प्राक्कल्पनायाः उदाहरणमस्ति यस्याः परीक्षणम् अनुसन्धानकर्ता अनुसन्धानद्वारा करोति।
2. अनुसन्धानसमस्यायाः अभिव्यक्तिः प्रश्नात्मककथनरूपेण भवति यतो हि प्राक्कल्पनायाः अभिव्यक्तिः घोषणात्मकथनरूपेण भवति। यथा किं

शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्या: एकीकरणेन अधिगमे वृद्धि भवति? प्रश्नात्मकं कथनम् अनुसन्धानसमस्याया: उदाहरणमस्ति। परञ्च 'शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्या: एकीकरणेन प्रभावी अधिगम: भवति', 'शिक्षण-कौशलं ज्ञातुं सूक्ष्मशिक्षणं सहायकं भवति' इमानि घोषणात्मककथनानि सन्ति तथा च प्राक्कल्पनाया: एकमुदाहरणमस्ति।

3. अनुसन्धानसमस्यामाध्यमेन ज्ञायते यत् चराणां मध्ये सम्बन्धस्य मुख्यसमस्या का अस्तीति? एतेन समस्यासमाधानास्य य: कोऽपि सङ्केत: न प्राप्यते। प्रत्युत प्राक्कल्पनाद्वारा चराणां मध्ये सम्बन्धस्य समस्या विषये सम्भावितसमाधानस्य ज्ञानं भवति।

अनेन प्रकारेण स्पष्टमस्ति यत् अनुसन्धानसमस्यायां प्राक्कल्पनायां च समानतया सहैव काचित् विभिन्नताऽपि दरीदृश्यते।

## 1.14 अनुसन्धानसमस्याकथनम्

अनुसन्धानकार्ये समस्याचयनानन्तरं समस्याकथनमपि एकं महत्त्वपूर्णं कार्यमस्ति। समस्याकथनम् एकं तकनीकीचरणं भवत्यनुसन्धाने, येन अनुसन्धाता स्व लक्ष्यं प्रति अग्रेसरं भवति। अनुसन्धाने किं किं करणीयम् एतद् विषये बारं बारं ध्यानाकर्षणं समस्याकथनेनैव भवति। अनुसन्धाने अनुसन्धानसमस्याया: स्पष्टीकरणाय नानार्थकभ्रमात्मकशब्दानां प्रयोग: न करणीय:। अनुसन्धानप्रबन्धे समस्याकथनन्नाम उपात्तविषयाणां वास्तविकं स्वरूपावबोधकं तत्त्वम्। अत्र चराणां संकेतो भवति, यथा प्रकृताध्ययने शीर्षकमासीत्-

''परम्परागताधुनिकधाराया: सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिक-बुद्धेस्तुलनात्मकमध्ययनम्।''

## 1.15 पारिभाषिकशब्दावली

समस्याचयनानन्तरं तदुद्देश्यपूर्तये अनुसन्धानशीर्षके सन्निविष्टप्रत्ययानां व्याख्या आवश्यकी। प्रवृत्तानुसन्धाने तकनीकीशब्दानां स्पष्टीकरणमावश्यकं भवति, येन प्रयुक्ततकनीकीशब्दानां भावावबोधो भवति। यथा- ''परम्परागताधुनिकधाराया: सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकमाध्यात्मिकबुद्धे: तुलनात्मकमध्ययनम्।'' अत्र तकनीकीशब्दा: अध: प्रदत्ता:।

**परम्परागतधारायाः शिक्षकाः** – ते सेवापूर्वशिक्षकाः, येः परम्परागतधारायाः शिक्षकप्रशिक्षणमहाविद्यालयेषु विश्वविद्यालयेषु वा शिक्षाशास्त्रीपाठ्यक्रमे प्रशिक्षणरताः सन्ति।

**आधुनिकधारायाः शिक्षकाः** – ते सेवापूर्वशिक्षकाः येः आधुनिकधारायाः शिक्षकप्रशिक्षणमहाविद्यालयेषु विश्वविद्यालयेषु वा बी.एड. इति पाठ्यक्रमे प्रशिक्षणरताः सन्ति।

**बुद्धिः** – अनुसन्धानकार्येऽस्मिन् ''बुद्धिः मानवस्य एका योग्यताऽस्ति'' इति सर्वथा ग्रहणीया।

**शैक्षिकबुद्धिः** – शैक्षिकबुद्धेः तात्पर्यमस्ति यद् व्यक्तेः सा संज्ञानात्मक-योग्यता, यया समस्या-समाधानं, तर्कयुक्तम् अमूर्तचिन्तनं क्रियते। इयं तात्कालिकाधिगममाध्यमेन समायोजनक्षमतामाध्यमेन च परिलक्षिता भवति।

**भावात्मकबुद्धिः** – भावात्मकबुद्धेः तात्पर्यं व्यक्तेः संवेगात्मकयोग्यताऽस्ति। गोलमैनमहोदयेन प्रतिपादितायाः अवधारणायाः इयं बुद्धिः आत्माभिज्ञतया, आत्मप्रबन्धनेन, आत्माभिप्रेरणया तदनुभूत्या च प्रकटिता भवति। सामाजिकदक्षता-माध्यमेनापीयं ज्ञायते।

**आध्यात्मिकबुद्धिः** – आध्यात्मिकबुद्धिः सा भवति यया माध्यमेन वयं मूल्यस्य अर्थस्य च समस्याभिः सह समन्वयं स्थापयामः। एवञ्च तासां समाधानान्वेषणाय प्रयासं कुर्मः।

## 1.16 अनुसन्धानचराः

चरः एतादृशः गुणोऽस्ति येषु परिस्थित्यानुसारं परिवर्तनं भवति। कस्यापि वस्तुव्यक्तेः मापनयोग्यगुणः चरः इति कथ्यते। मापनेन वस्तूनां, व्यक्तीनां वा स्थानानां समूहस्य विभिन्नानां विशेषतानां वा गुणानाम् अध्ययनं क्रियते। अत एव एतासां विशेषतानां वा गुणानां चरः इति कथ्यते। मापनस्य तात्पर्यम् अत्र मात्रात्मकं न अस्ति अपि तु चराणां मापनं परिमाणात्मकं गुणात्मकम् उभयोः प्रकारयोः कर्तुं शक्यते। चरस्य अनेकाः प्रकाराः सन्ति यथा शैक्षिकानुसन्धाने बुद्धिः, उपलब्धिः, पाठ्यक्रमस्य प्रभावादयः परिमाणात्मकरूपेण मापनयोग्यचराः सन्ति। परन्तु प्रजातिः, लिंगं, धर्मः, भाषा, समूह इत्यादयः गुणात्मकरूपेण मापनयोग्यचराः सन्ति। अत एव मापनस्याधारेण चरद्वयं भवति यथा गुणात्मकचरः

(Qualitative Variables) मात्रात्मकचरश्च (Quantitative Variables)। मात्रात्मकचरोऽपि प्रकारद्वयं भवति। तथाहि- सतत्-चर: (Continuous Variables) असतत्-चरश्च (Discrete Variables)। सामान्यत: चरानां वर्गीकरणं अधोलिखितरूपेण कर्तुं शक्यते

1. **स्वतन्त्रचर: (Independent Variable)**- चरोऽयम् आगम: उद्दीपक: वा कथ्यते। स्वतंत्रचर: व्यक्ते: वा तस्य वातावरणे क्रियाशीलं भवति व्यवहारं च प्रभावयति। अस्मिन् चरे परिवर्तनं कृत्वा अनुसन्धानकर्ता आश्रितचरै: तस्य प्रभावस्य अध्ययनं करोति।

2. **आश्रितचर: (Dependent Variable)**- कस्यापि स्वतंत्रचरस्य प्रभावस्य अध्ययनं येन क्रियते स आश्रितचर: कथ्यते। हिल (Hill, 1980) महोदयेन उक्तवन्त: यत् - स: आश्रितचर: अस्ति यस्य विषये वयं पूर्वकथनं कुर्म:। वक्तुं शक्यते यत् स च आश्रितचरो भवति यत: अत्र यत् परिवर्तनं भवति तत् स्वतन्त्रचरे कृतसंयोजनवियोजनादिषु समाश्रितो भवति।

3. **नियन्त्रितचरा: (Controlled Variable)**- यस्य प्रभाव: प्रयोगकर्ता आश्रितचरस्य प्रभावं कर्तुं निवारयति स: चर: नियन्त्रित: चर: इति उच्यते। वस्तुत: नियन्त्रितचरा: स्वतन्त्रचरवर्गस्य सन्ति, परञ्च प्रयोगकर्ता तस्य प्रभावस्य अध्ययनं कर्तुं न इच्छति, अत: तत् नियन्त्रणे स्थापयति।

4. **मध्यस्थचरा: (Intervening Variable)**- शैक्षिकानुसन्धाने मध्यस्थचरा: अधिका: महत्त्वपूर्णा: भवन्ति यतोहि प्रतिदर्शरूपेण अत्र मानव: अधिगमकर्ता वा भवति। मध्यस्थचरस्य स्वरूपम् अमूर्तम् भवति। एतेन आश्रितचरे परिवर्तनं भवति।

**प्रस्तुतानुसन्धानकार्यहेतो: चयनितसमस्याया: चरा: आसन्-**

- **आश्रितचरा:**- प्रस्तुतअनुसन्धानकार्ये शैक्षिकभावात्मकाध्यात्मिक-बुद्धिरित्येते आश्रितचरा: आसन्।
- **स्वतंत्रचरा:**- लिङ्गपरम्परागताधुनिकधाराया: शिक्षकाश्च स्वतंत्रचरा: आसन्।

## 1.17 अनुसन्धानस्योद्देश्यानि

न किमपि कार्यमुद्देश्यं विना साफल्यमेति अथ न किमपि कार्यमुद्देश्यं विना आरभ्यते। उक्तमपि महाभाष्ये- "प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते।"

उद्देश्यं विना कस्यचित् विवेकशीलस्य का कथा कोऽपि मन्दमतिरपि किमपि कर्तुं न काङ्क्षति। अर्थात् कारणं विना कार्यस्योत्पत्तिः न सम्भवति। उद् उपसर्गपूर्वकं 'दिश्' धातोः यत् प्रत्ययं प्रातिपादिकत्वे उद्देश्यमिति शब्दस्य निर्माणं भवति, कार्यात् पूर्वं तस्य मनसि एकं सुनिश्चितमुद्देश्यं भवति। यदुद्देश्यम् अनुसन्धानार्थिनः मनसि संस्थाप्य रुचिना सोत्साहेनं च कार्यं सम्पादयन्ति।

मानवः अनुसन्धानेन मूलतथ्यतः नूतनं ज्ञानम् उपस्थापयति। केवलं ज्ञातपूर्वस्य परिचयमात्रं न क्रियते अपितु प्राप्तस्य तथ्यस्य तदुत्तरं सम्प्राप्तेन तथ्येन सह परिशील्य निर्णयः उपस्थाप्यते। अनुसन्धानस्य उद्देश्यं तु कस्यापि समस्यायाः सुव्यवस्थितं वैज्ञानिकमाध्यमेन वास्तविकतायाः अध्ययनं कृत्वा तस्याः समस्यायाः समुचितसमाधानस्य प्राप्तिः। उद्देश्यनिर्धारणेन कार्यस्य सीमानिर्धारणं भवति। एतेन अनुसन्धानकार्यस्य अस्पष्टता कठिनता च दूरीभवति। अनुसन्धानकर्त्ता स्पष्टनिर्देशनं प्राप्यते यत् अनुसन्धानस्य कार्यं कस्मिन्मार्गे करणीयं वर्तते। अतः अनुसन्धाने उद्देश्यानां निर्धारणमावश्यकं कार्यमस्ति। प्रस्तुतानुसन्धानसमस्यायाः प्रकृत्यानुसारं निम्नलिखितोद्देश्यानां निर्माणं कृतम्। तानि यथा–

- परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः अध्ययनम्।
- परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः अध्ययनम्।
- परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणामाध्यात्मिकबुद्धेः अध्ययनम्।
- लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः तुलनात्मकमध्ययनम्।
- लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः तुलनात्मकमध्ययनम्।
- लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः तुलनात्मकमध्ययनम्।
- परम्परागताधुनिक धारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मका-ध्यात्मिकबुद्धेः तुलनात्मकमध्ययनम्।
- लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मका-ध्यात्मिकबुद्धेः तुलनात्मकमध्ययनम्।

## 1.18 अनुसन्धानप्राक्कल्पना

यदा मानवस्य पुरतः काऽपि समस्या आयाति तदा सः तस्याः समस्यायाः सम्भावितसमाधानान्वेषणे तत्परो भवति। कोऽपि अनुसन्धानकार्यं विना प्राक्कल्पनायाः परिणतिर्भवितुं नार्हति। अनुसन्धानविषये समस्तप्रक्रियायाः प्राक्कल्पनाकेन्द्रिताः भवन्ति। प्राक्कल्पनायाः पुष्टिकरणेनैव अनुसन्धानस्य निष्कर्ष सम्यक् निष्पद्यते। एतत्तु एकस्य अनुसन्धानकर्तुः कृते प्राक्कल्पनायाः अर्थप्रकृतिञ्चाधिगमः आवश्यकं भवति।

प्राक्कल्पना शब्दः आंग्लभाषयां हाइपोथीसिस (Hypothesis) इति कथ्यते। अत्र Hypo + Thesis शब्दद्वयं विद्यते। Hypo इति शब्दस्य सम्भावितः इत्यर्थः। Thesis इति शब्दस्य कथनमिति कथ्यते। अनेन ज्ञायते यत् Hypothesis इति शब्दस्य शाब्दिकः अर्थो भवति यत् सम्भावित-कथनेन समस्यायाः समाधानस्य प्रस्तुतीकरणम् इति। प्रसिद्धवैज्ञानिकवेकनमहोदयानुसारं समस्या-चयनानन्तरं झटिति प्राक्कल्पनायाः निर्माणं भवेत्। (Hypothesis should be suggested as soon as the existence of a problem is discovered.)

जॉनडब्ल्यूबेस्टमहोदयानुसारम्- प्राक्कल्पना काचित् बुद्धिमत्तापूर्णानुमानमिति यत्र अवलोकितानां तथ्यानां नियमानाञ्च विवरणाय तथा च अवलोकनात्मकशोध-मार्गदर्शनाय क्रियमाणं तत्कालीनम् आकलनमिति

(It is a shrewd guess or inference that is formulated and provisionally adopted to explain observed facts or conditions and to guide in a observed investigations. John W. Best)

फ्रेड.एन.कारलिंगरमहोदयानुसारेण - ''प्राक्कल्पना द्वयोः द्वयाधिकचराणां वा मध्ये सम्बन्धस्य अनुमानितकथनं भवति।''

(A hypothesis is conjectural statement of the relation between two or more variable. Fred. N. Kerlinger)

जी.ए.लुन्डबर्गमहोदस्य मतानुसारेण- प्राक्कल्पना एका अस्थायी-सामान्यीकरणं भवति यस्याः वैधतायाः परीक्षणमवशिष्टं भवति। स्वप्रारंभिकावस्थायां प्राक्कल्पना एकं काल्पनिकम् अनुमानितविचारं वा भवितुमर्हति यः भाव्यध्ययनस्य आधारः भवति।

(A Hypothesis is a tentative generalisation, the validity of which remains to be tested. In its most elementry stage, the hypothesis may be any hunch, guess, imaginative idea which becomes the basis for the further investigation. G.A. Lundberg)

मैकग्यूगनमहोदयानुसारेण–द्वयो: ततोऽधिकानां चराणां मध्ये संभावितसंबंधस्य विषये निर्मितं परीक्षणीयकथनं प्राक्कल्पना कथ्यते।

(A testable statemente of a potential relationalship between two or more variable is called hypothesis. F.J.Mc. Guigan)

जार्ज जी.मूलैमहोदयेन उक्तवन्त: यत्– प्राक्कल्पना एका अवधारणा वा प्रतिज्ञप्ति भवति यस्य औचित्यस्य/स्वीकार्यताया: परीक्षणं निहितार्थाम् अनुभाविकसाक्ष्यानां वा पूर्वज्ञानस्य अनुरूपताया: आधारेण क्रियते।

(Hypothesis is an assumpation or proposition whose tenability is to be tested on the basis of competibility of its implications with empirical evidence and with previous knowledge. George G. Mouly)

उक्तपरिभाषाणां विश्लेषणमनन्तरम् इदं स्पष्टं जातं यत् प्राक्कल्पनाम् अनुसन्धानसमस्याया: विषये एकमनुमानं भवति यस्य आनुभाविकसाक्ष्याणामाधारेण परीक्षणं क्रियते। प्राक्कल्पनाया: स्पष्टीकरणं समस्याया: संभावितसमाधानरूपेण, परिगणितानुमानरूपेण वा घोषणात्मकप्रस्तावरूपेण अपि कर्तुं शक्यते। चराणां मध्ये सामान्यविशिष्टं वा सम्बन्धस्य वर्णनं कर्तुं शक्यते। यासां परिभाषानां विश्लेषणे कश्चित् एतादृशं तथ्यं प्राप्यते येन माध्यमेन प्राक्कल्पनाया: स्वरूप: स्पष्टं भवति कश्चित् एतादृशानि तथ्यानि निम्नांकितानि सन्ति।

1. अध्ययने क्रियमाणाया: समस्याया: शोधप्राक्कल्पनैव प्रस्तावितम् उत्तरम् भवति।

2. प्राक्कल्पना अनुसन्धानकार्याय दिशां ददाति तथा च शोधकार्यस्य व्यवस्थितां निश्चितां च योजनां कर्तुं सहायकं भवति।

3. प्राक्कल्पना द्वयो: द्वयाधिकचराणां वा मध्ये एकं कल्पितं सम्बन्धं वर्णयति। यथा शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्या: प्रयोगेन शिक्षणं प्रभावी भवति। अस्यां प्राक्कल्पनायां प्रौद्योगिक्या: अनुप्रयोग: शिक्षणं च द्वौ चरौ स्त:, येषां मध्ये सम्बन्ध: सम्प्राप्यते।

4. प्राक्कल्पना द्वयोः द्वयाधिकचराणां वा मध्ये सम्भाव्यसम्बन्धस्य परीक्षणीय-कथनरूपेण अभिव्यक्तः भवति। तात्पर्यमिदमस्ति द्वौ द्वयाधिकाः एतादृशाः चराः भवन्ति तेन मापनं सम्भवमस्ति। यथा उपर्युक्तोदाहरणे प्रौद्योगिक्याः अनुप्रयोगः तथा च शिक्षणमुभयोरेव एतादृशः चरः येषां सरलतया मापनं कर्तुं शक्यते।

येन तथ्येन इदं स्पष्टं भवति यद् प्राक्कल्पनायाः काचित् स्वकीया विशेषता भवति येन माध्यमेन यस्याः स्वरूपस्य स्पष्टं दर्शनं भवति।

### 1.18.1 अनुसन्धानप्राक्कल्पनायाः विशेषताः

प्राक्कल्पना अनुसंधानस्य केन्द्रबिन्दु इति मन्यते यस्याधारेण अनुसन्धान-प्रक्रियायाः संपादनं क्रियते। यद्यपि प्राक्कल्पना इयं अस्थायीसमाधानमनुमानं वा भवति तथापि एषा प्राक्कल्पना तर्कानां, तथ्यानां साक्ष्याणामुपरि आधारिता सन्ति। एतस्मात् कारणात् प्राक्कल्पना बौद्धिकतार्किकनुमानं वा कथ्यते। अनुसन्धानसमस्यायाः समाधानरूपेण अनुसन्धानकर्तुः समक्षे बहुविकल्पाः भवन्ति। एतेषु विकल्पेषु उचितविकल्पस्य चयनम् अनुसन्धानकर्तॄणां कृते कठिना समस्या भवति। अतैव प्राक्कल्पनायां कस्यापि विशेषतायाः ज्ञानमावश्यकं यस्याधारेण सम्यक् प्राक्कल्पनायाः चयनम् अभिव्यक्तिं वा कर्तुं शक्यते।

1. प्राक्कल्पनायाः शाब्दिककथनरूपेण अभिव्यक्तिः घोषणात्मकं भवति।
2. प्राक्कल्पना परीक्षणयोग्यकथनं भवति अर्थात् आनुभाविकरूपेण यस्या परीक्षणं कर्तुं शक्यते।
3. सम्यक्प्राक्कल्पनायां वर्णितचराणां मध्ये संबंधस्य स्पष्टता भवति।
4. समुचितप्राक्कल्पनयाः समस्यायाः उचितसमाधानम् अवश्यमेव भवेत्।
5. तार्किकदृष्ट्या प्राक्कल्पनायां संबंधितसमस्यायाः चराणां, तेषां संबंधानां सम्यक् समावेशम् आवश्यकं भवति।
6. अनुसन्धानप्राक्कल्पना समस्यायाः सरलतं संभावितोत्तरं भवेत् येन तस्य परीक्षणे कापि समस्या न भवेत्।
7. प्राक्कल्पना सीमितक्षेत्रविशेषेण संबंधिता भवेत् यतोहि विस्तृतक्षेत्रेण सह संबंधितप्राक्कल्पनायाः परिक्षणे प्रायः समस्या भवति।

8. अल्पसमये अल्पसश्रमेण अल्पव्यये च यदि प्राक्कल्पनायाः परिक्षणं भवति तर्हि प्राक्कल्पना उत्तमा भवति।

9. प्राक्कल्पनायां गुणवत्तायाः विश्वसनीयतायाः ध्यानमपि अपेक्षितं वर्तते।

### 1.18.2 अनुसन्धानप्राक्कल्पनायाः महत्त्वम्

प्राक्कल्पना अनुसन्धानस्य केन्द्रबिन्दु भवति यस्याधारेण अनुसन्धानकार्यस्य संपादनं भवति। प्राक्कल्पना अनुसन्धानस्य प्रकृत्यनुसारम् उपकरणानाम् अनुसन्धानविधिनाम् अवचयने सहाय्यं विदधाति येन अज्ञाततथ्यानां ज्ञानं भवति। अनुसन्धानकार्ये प्राक्कल्पनायाः महती आवश्कता भवति।

1. अनुसन्धानकार्यार्थं निर्मितेषु अनेकेषु संभावितोत्तरेषु प्राक्कल्पना एकम् अनुमानितं परन्तु वास्तविकसमाधानं भवति। अतः प्राक्कल्पना अनुसन्धानसमस्यायाः एकमनुमानं भवति यस्य आनुभाविकसाक्ष्याणामाधारेण परीक्षणं क्रियते। प्राक्कल्पना समस्यासमाधाने मध्यस्थतां करोति। इयमपि वक्तुं शक्यते यत् प्राक्कल्पना समस्यायाः समाधानं करोति। गुड स्केट्समहोदयोः मतानुसारेण-प्राक्कल्पना एका सुनिश्चितानुमानं वा निष्कर्षं भवति यस्या निर्माणं अवलोकितानां तथ्यानां दिशानां वा स्पष्टीकरणाय अनुसन्धानकार्यं मार्गनिर्देशाय च क्रियते। (A hypothesis is a shrewd guess or interference that is formulated and provisionally adopted to explain observed facts a condition and to guide further investigation. - C.V. Good, D. E. Scates)

2. प्राक्कल्पना एका परीक्षणयोग्य कथनं भवति यस्य आनुभाविकसाक्ष्यानुसारेण वा प्रमाणाधारेण पुष्टिः क्रियते।

3. प्राक्कल्पना ज्ञानस्य अद्यतनकृतौ एकं प्रमुखसाधनं भवति। एतादृशं ज्ञानम् अनुसन्धानकार्यार्थं दिक्प्रदानं करोति। अतः नवीनज्ञानस्य संयोजनं सारल्यं भवति। कारलिङ्गरमहोदयः तं संपोषयति। संपोषणावसरे कथयति प्राक्कल्पना इति मनुष्येण विश्वसनीयज्ञानप्राप्त्यर्थं आविष्कृतं सर्वाधिकं शक्तिशाली उपकरणमस्ति। (Hypothesis is the most powerful tool man has invented to achieve dependable knowledge. Fred N Karlinger)

4. अनुसंधाने अध्ययनक्षेत्रस्य सीमाङ्कनदृष्ट्या प्राक्कल्पनायाः महत्त्वं वर्तते। अनया अनुसन्धानकार्यस्य सीमाङ्कनम् अपि भवति।

5. प्राक्कल्पना अनुसन्धानकार्यार्थं दिशिं प्रददाति। अनुसन्धानस्य प्रस्तावितायाः समस्यायाः समाधानं कस्या अनुसन्धानविधिं सहाय्येन करणीयम् इदम् अनुसन्धानप्राक्कल्पनया आधारिताऽस्ति।

6. प्राक्कल्पनायाः निर्माणानन्तरं अनुसन्धानकार्यस्य दिशासुनिश्चितं भवति, अनुसन्धानकर्तारः निश्चितदिशानुसारं स्वकार्यस्य संपादनं कुर्वन्ति। अत एव यदा ऊहापोहार्थस्य स्थितिः न भवति तदा कार्यस्य संपादने कुशलतायाः प्रभावितायोश्च वृद्धिः भवति।

7. प्राक्कल्पना अनुसन्धानकर्तरि प्रदत्तसंकलनाय आधारं प्रस्तौति, यतः अनुसन्धानविषयकविधीनां, युक्तीनां, साक्ष्याणां, उपकरणानां, परीक्षणं वा आवश्यकाः सन्ति। एतेषां निर्धारणे प्राक्कल्पना सहायिका भवति।

8. प्राक्कल्पना नवीनानुसन्धानकर्तृणां प्रोत्साहनं प्रयच्छति, यतोहि कृतानुसन्धान-कार्यस्य अवलोकनेन तत्र भाव्यानुसन्धानार्थं प्रदत्त परामर्शाधारेण अनुसन्धानकर्ता मार्गदर्शनं प्राप्नोति। तस्याधारेण स्वविषयक्षेत्रे कस्याः समस्यायाः चयनमपेक्षितं विषयेऽस्मिन् प्राक्कल्पना सहायिका भवति।

9. सिद्धान्तानां निर्माणे प्राक्कल्पना सहायिका भवति। प्राक्कल्पनायाः पुष्टेः अनन्तरमेव सिद्धान्तानां निर्माणं भवति। प्राक्कल्पनां विना सिद्धांतस्य निर्माणं सम्भवं नास्ति। अत एव कथयितुं शक्यते यत् सिद्धांतस्य निर्माणं प्राक्कल्पनायाः परिक्षणेन भवति।

10. प्राक्कल्पना निष्कर्षाय आधारभूता भवति, यतः प्राक्कल्पनायाः आधारेणैव अनुसन्धानप्रक्रिया प्रचलति, प्राप्तप्रदत्तानां विश्लेषणं क्रियते तस्याधारेण प्राक्कल्पनायाः पुष्टिः भवति तदनन्तरं सामान्यीकरणं क्रियते। अत एव प्राक्कल्पना निष्कर्षेभ्यः आधारं प्रददाति।

अनुसन्धानकर्त्ता अनुसन्धानकार्यं सम्यक् सम्पादनाय, समस्यायाः समुचित-समाधानं प्राप्तुं समस्यायाः विश्लेषणात्परं प्राक्चिन्तनं च करोति। प्राक्कल्पनाविहीनं अनुसन्धानकार्यं सन्चालनयन्त्ररहितयानमिव भवति। प्राक्कल्पनाः प्रकाशस्तम्भ इव विभाति। अनुसन्धानकर्तुः मार्गदर्शकस्य कार्यं करोति।

### 1.18.3 अनुसन्धानप्राक्कल्पनायाः प्रकाराः

अनुसंधानप्रकारविषये सर्वेशिक्षाविदांसः मध्ये मतैक्यं नास्ति। अतः प्राक्कल्पनायाः अपि भिन्नानिवर्गीकरणानि दृश्यन्ते। मैक्यूगनमहोदयेनस्वस्य अनुभवस्य आधारेण प्राक्कल्पनायाः अस्तित्वप्राक्कल्पना (Existential Hypothesis) अथ च सार्वभौमप्राक्कल्पना (Universal Hypothesis) इति द्वयोः भागयोः विभक्तम् कृतम् अस्ति। प्रो.एस.पी.गुप्ताः तान् पञ्चधा वर्गीकृतवान् अस्ति, प्रथमे भेदप्राक्कल्पना (अन्तरप्राक्कल्पना) सहसंबन्धप्राक्कल्पना च, द्वितीयेदिशात्मकं, अदिशात्मकं, शून्यं च प्राक्कल्पना, तृतीयेसकारात्मकं नकारात्मकं च प्राक्कल्पना, चतुर्थेवर्गीकरणे, पूर्वोक्तम्, उपरोक्तम्। अथ च वर्णितप्राक्कल्पनायाः पञ्चमे वर्गीकरणे च अनुसन्धाननस्य सांख्यिकीयपरिकल्पनस्य च स्थानं दत्तवन्तः। हेजमहोदयेन प्राक्कल्पनाद्वयं स्वीकृतं सरलप्राक्कल्पना (Simple Hypothesis), जटिलप्राक्कल्पना (Complex Hypothesis)। केचन् विद्वांसः प्राक्कल्पनायाः विभाजनम् अनुसंधानप्राक्कल्पना (Research Hypothesis) अथ च सांख्यिकीय प्राक्कल्पना (Statistical Hypothesis) रूपेणकृतम् अन्येकेचन विद्वांसः प्रायोगिक (Experimental) अप्रायोगिक (Non Experimental) प्राक्कल्पना च स्वीकृतवन्तः।

उपरोक्तविवरणेन् इदं स्पष्टं यत् प्रकृतेः चरसङ्ख्यायाः, विशिष्टप्रयोजनस्य, नवीनतायाः च आधारेण प्राक्कल्पनानां वर्गीकरणं भिन्नरूपेण कर्तुं शक्यते इति। उपरोक्तवर्णितानां प्राक्कल्पनानां वर्गीकरणं इत्थं रूपेणकर्तुं शक्यते–

1. **चराणां संख्याधारेण**– प्राक्कल्पनायां निहित चराणामाधारेण वर्गीकरणमिदं क्रियते। अस्य प्रकारद्वयं वर्तते–

क ) **साधारणप्राक्कल्पना (Simple Hypothesis)**– अत्र चराणां संख्या द्वयं भवति। उभयोः द्वयोः चरयोः मध्ये संबंधस्य निरूपणाधारेण अनुसन्धानसमस्यायाः अनुमानितोत्तरं प्रदीयते।

ख ) **जटिल प्राक्कल्पना (Complex Hypothesis)** – अस्यां प्राक्कल्पनायां चराणां संख्या द्वयोः ततोऽधिकं वा भवति। एतेषां चराणां मध्ये संबंधनिरूपणेन समस्यायाः संभावितोत्तर प्रदीयते।

2. **चरेषु संबंधानामाधारेण**– केचन विद्वांसः प्राक्कल्पनायाः वर्गीकरणं चराणां विशिष्टसम्बन्धाधारेण कुर्वन्ति। मैकग्यूगन (Mcguigan, 1990) महोदयैः उपर्युक्ताधारेण चरस्य प्रकारद्वयं प्रतिपादितम्। तथाहि–

क ) **सार्वभौमिकप्राक्कल्पना (Universal Hypothesis)** –प्रत्येके क्षेत्रे सर्वदा च समानरूपेण प्रचलिता प्राक्कल्पना अर्थात् प्रत्येकं परिस्थितौ सर्वदा निहितानाम् सर्वप्रकारस्य मूल्यानां चरानाम् मध्ये सम्बन्धं निर्वाहयति।

ख) **अस्तित्वप्राक्कल्पना (Existential Hypothesis)** एतादृशी प्राक्कल्पना न्यूनातिन्यूनम् एकस्य व्यक्तेः वा परिस्थितेः वा निश्चितरूपेण सत्यं भवति, यदि सर्वेषां वा परिस्थितीनां वा कृतेन भवति। यथा प्रौद्योगिक्याः अनुप्रयोगेन अधिगमः प्रभावी भवति, तादृशी प्राक्कल्पना अस्तित्व प्राक्कल्पना एव।

### 3. विशिष्टोद्देश्यानामाधारेण

क ) **अनुसन्धानप्राक्कल्पना (Research Hypothesis)** – प्राक्कल्पना इयं कार्यात्मकप्राक्कल्पना अपि कथ्यते। इयं प्राक्कल्पना केनचित् सिद्धांतेन आधारिता वा प्रेरिता भवति। अनुसन्धानकर्त्ता एतां प्राक्कल्पनाम् अतीवविश्वासेन घोषयति। तस्य इच्छा अस्ति यत् प्राक्कल्पना इयं सत्यं सिद्धं भवेत। अनुसन्धानप्राक्कल्पना द्विविधा भवति– दिशात्मका अदिशात्मका च। दिशात्मकप्राक्कल्पना एकां दिशं वा स्थितिं दर्शयति, अदिशात्मके तु न दर्शयति।

ख ) **शून्यप्राक्कल्पना (Null Hypothesis)** – शून्यप्राक्कल्पना अनुसन्धान–प्राक्कल्पनायाः विपरीतं भवति। या प्राक्कल्पना द्वयोः चरयोः मध्ये शून्यभेदः अस्ति वा नास्ति वा इति घोषयति सा शून्यप्राक्कल्पना उच्यते। अतः यत् द्वयोः चरयोः मध्ये भेदः सम्बन्धः वा नास्ति। एतत् चिह्नेन प्रतिपादनं क्रियते।

ग ) **सांख्यिकीयप्राक्कल्पना (Statistical Hypothesis)** – यदा अनुसन्धान– प्राक्कल्पना शून्यप्राक्कल्पना वा सांख्यिकीय पदेषु व्यक्ता भवति तदा एतादृशी प्राक्कल्पना सांख्यिकीय प्राक्कल्पना इति उच्यते। अनुसन्धानप्राक्कल्पनाम् अथवा सांख्यिकीयप्राक्कल्पनां सांख्यिकीय पदेषु व्यक्तं कर्तुं विशेषचिह्नानाम् उपयोगः भवति। अनुसन्धानप्राक्कल्पनायाः कृते $H_1$, शून्यप्राक्कल्पनायाः कृते HO तथा च माध्य कृते X इत्यस्य उपयोगः भवति।

अत एव प्रस्तुतानुसन्धानकार्यार्थं द्वयोः मुख्यपरिकल्पनयोः निर्माणं कृत्वा, तयोः आधारेण कस्याश्चन शून्यप्राक्कल्पनायाः निर्माणं कृतं विद्यते।

**मुख्यप्राक्कल्पना**-1 परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिकबुद्धेः भेदो वर्तते।

**मुख्यप्राक्कल्पना**-2 लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः भेदो वर्तते।

**शून्यप्राक्कल्पना**

N.H.- 1 परम्परागताधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मका-ध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।

N.H.- 2 आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मका-ध्यात्मिकबुद्धिषु विशेषोभेदो नास्ति।

N.H.- 3 परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।

N.H.- 4 लिङ्गाधारेण परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।

N.H.- 5 लिङ्गाधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।

N.H.- 6 लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।

## 1.19 अनुसन्धानसीमाङ्कनम्

शिक्षा जन्मतः मृत्युपर्यन्तं प्रचलमाना प्रक्रिया अस्ति। अतः तस्याः समस्यायाः अपि क्षेत्रं व्यापकमस्ति। परन्तु कस्यापि कार्यस्य निर्दिष्टसीमा वर्तते। तस्मिन् कार्यक्षेत्रे सीमितक्षेत्रे वा स्वकार्यं सम्पादितव्यम्। प्रायशः अनुसन्धानकार्यस्य क्षेत्रमतीव सुविस्तृतं वर्तते। समस्यायाः परिसीमनमिति शब्दस्य तात्पर्यं भवति, यत् समस्यायाः परिधिनिर्धारणम् येनानुसन्धानस्य सम्यक् समाधानं भवेत्। स्वल्पसमये सीमितसंसाधनैः अनुसन्धानकार्ये व्यापकक्षेत्रस्य प्रकृतीत्यादीनां परिसीमनमत्यावश्यकम् भवति। अनुसन्धानकार्ये स्वयोग्यतायाः समयस्य शक्तेश्च

सम्यगुपयोगं करोति। अत्र अनुसन्धानकार्ये स्वविषयस्य सम्यक् समाधानार्थं समस्यायाः सीमाङ्कनमकल्पयत्।

- अध्ययनेऽस्मिन् सुविधाचयनविधिमाध्यमेन भारतस्य उत्तरक्षेत्रस्य एतेषां परम्परागतधारायाः महाविद्यालयानां/विश्वविद्यालयानां चयनं कृतं येषां शिक्षाशास्त्रीपाठ्यक्रमे छात्राः प्रशिक्षणरताः आसन्। यस्यान्तर्गते श्रीलाल-बहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य राष्ट्रीयसंस्कृतसंस्थानस्य तथा च संपूर्णानन्दसंस्कृतविश्वविद्यालयस्य चयनं कृत्वा तत्र शिक्षाशास्त्रीपाठ्यक्रमे प्रशिक्षणरताः परम्परागतधारायाः सेवापूर्वशिक्षकाः गृहीतवन्तः।
- अध्ययनेऽस्मिन् देहल्यां अथ च राष्ट्रीयराजधानीक्षेत्रे (NCR) स्थितेषु शिक्षकप्रशिक्षणमहाविद्यालयेषु बी. एड. पाठ्यक्रमे प्रशिक्षणरतानाम् आधुनिकधारायाः शिक्षकाणां चयनं कृतम्।

♦♦♦

## द्वितीयोऽध्याय:

# सम्बन्धितसाहित्यस्याध्ययनम्

### 2.1 भूमिका

सम्बन्धितसाहित्यस्य सर्वेक्षणं कस्यापि अनुसन्धानकार्यस्य महत्वपूर्णः आधारस्तम्भो भवति। यथा समुद्रमन्थने विविधलक्षणानामुत्पादनं बभूव तथैव अनुसन्धानविषयकसाहित्यमन्थने विविधनूतनसारगर्भिततथ्यानां प्रकाशनं भवति। ज्ञानस्य पौनः पुन्येनानुशीलनेन निश्चितं नवीनज्ञानस्य प्राप्तिर्भवति। अनुसन्धानकर्त्ता स्वकीयानुसन्धानसमस्यायाः समाधानार्थं यावत् पूर्वविहितानुसन्धानानामध्ययनं न करोति तावत् सः स्वशोधकार्यस्य पृष्ठभूमिं तस्मिन् क्षेत्रे कृतं कार्याणां च ज्ञानं न प्राप्नोति। कस्मिन् अपि विषये अनुसन्धानस्य कृते पूर्वकृतानुसन्धानस्य पुनरावलोकनम् आवश्यकं भवति। साहित्यसमीक्षाद्वारा गृहीत अनुसन्धानकार्यं बहु सुलभं भवति। अनुसन्धानकर्ता स्वशोधकार्यार्थं लघु बिन्दवः चिन्तयितुं दिशां प्राप्नुवन्ति। यस्मिन् विषये सम्प्रति अनुसन्धानकार्यं क्रियते तस्मिन् विषये कृतकार्यस्य अध्ययनं कर्तव्यं यतः ते वर्तमान अध्ययने अग्रे गच्छतु उन्नतयितुं च साहाय्यं करोति।

अनुसन्धानसमस्यायाः चयने, परिभाषीकरणे सीमाङ्कने परिकल्पनानिर्माणे अभिकल्पनिर्माणे च अयमध्यायः महत्त्वपूर्णं योगदानं ददाति। अतः अयं निष्कर्षात्मकः खण्डः वर्तते। यः अनुसन्धानकर्तुः कृते तिमिराच्छादितसमस्तमार्गाणां दीपप्रकाशनस्य ज्योतिशलाका वर्तते। अद्यतनं यत् किमपि ज्ञानं वर्तते तस्य मूलं परम्परा एवास्ति। परम्परया एव अतीतकालिकं ज्ञानं जनाः प्राप्नुवन्ति। अतीतकालिकज्ञानप्राप्तये प्राप्तस्रोतेषु सम्बद्धसाहित्यस्य परम्परा सोपयुक्ता प्रमाणयुक्ता च भवति। कस्मैश्चिदपि अनुसन्धानाय बहुविधाः सहायक-सामग्र्यः तथ्यानि चापेक्षन्ते। एतेषु सम्बन्धितसाहित्यमित्युक्ते तादृशानां पुस्तकानां, ज्ञानकोशानां, पत्र-पत्रिकाणां, प्रकाशिताप्रकाशितानुसन्धानप्रबन्धानामाभिः लेखनाञ्चसंग्रहः येषां

सम्यक् अध्ययनेन अनुसन्धानकर्त्ता समस्यानां चयने अध्ययनस्य प्रारूपनिर्माणे, कार्यस्य प्रगतौ च सहायतां प्राप्नोति। एतेषामध्ययनं विना अनुसन्धानकर्त्ता व्यर्थमेव स्व समयस्य, श्रमस्य साधनाञ्च दुरूपयोगमेव करोति। यदि अनुसन्धानकर्त्ता स्वानुसन्धानकार्यस्य निर्दिष्टविषयं प्रति सावधानं न भवति तर्हि अनुसन्धानकार्यं निर्दिष्टलक्ष्यविहीनं सत् सफलं न भवति। तस्मात् अनुसन्धानस्य कश्चित् विषयः निर्णेतव्यः। अतः सम्बद्धसाहित्यस्याध्ययनम् आवश्यकम्। सम्बद्धसाहित्यस्य अध्ययनेन वयं दिशानिर्देशं प्राप्नुमः। स्वीकृतानुसन्धानक्षेत्रे कियत् कार्यं कृतमस्ति, कियदवशिष्टं वर्तते, अस्य ज्ञानं भवति। अनुसन्धानविधिनामुपकरणानाम् अपि ज्ञानं सम्बद्धसाहित्येनैव भवति। विदुषामनुभवानां ज्ञानमपि सम्बद्धसाहित्यस्य परिशीलनेनैव भवति। एतदर्थं स्वसमस्यायाः सम्बद्धानां पूर्वं निर्वर्तितानां अनुसन्धानकर्मणां ज्ञानं नितरामावश्यकं भवति।

## 2.2 सम्बन्धितसाहित्यस्य अध्ययनस्य महत्त्वम्

अनुसन्धानकार्येषु साहित्यसर्वेक्षणस्य महत्त्वं स्वयं सिद्धमस्ति। अनुसन्धानक्षेत्रे सम्बन्धितसाहित्यस्य अध्ययनं विना अनुसन्धानकार्यं तमसि बाणप्रक्षेपणमिव भवति। सम्बन्धितसाहित्यस्य अध्ययनम् अनुसन्धानकार्ये सम्यक् योजना रूपरेखा वा निर्माणे सहायकं भवति। बहवः विद्वांसः शिक्षाशास्त्रिणः अनुसन्धानकार्ये सम्बद्धसाहित्यस्य महत्त्वस्य विवेचनं कृतवन्तः।

जॉन डब्ल्यू. बेस्टमहोदयः एवमुक्तवान्–''वस्तुतः मानवीयाभिज्ञानं सर्वमपि पुस्तकेषु ग्रन्थालयेषु द्रष्टुं शक्यते। मनुष्याद्भिन्नाः इतरप्राणिनः सर्वमपि स्वस्तरादेव प्रारभन्ते। मानवस्तु पूर्वसञ्चितज्ञानादेव नूतनं ज्ञानं निर्माति। एतादृशानि लक्षणानि सम्बद्धसाहित्यस्य महत्त्वं प्रकटयन्ति।''

(Practically all human knowledge can be found in books and libraries. Unlike other animals that must start a new with each generation man build upon the accumulated and recorded knowledge of the past. His constant adding to the vast store of knowledge makes possible progress in all the areas of human endeavor.)

गुडबारस्केट्समहोदयानुसारम्– ''यथा एकस्य कुशलचिकित्सकस्य कृते आवश्यकम् अस्ति यत् औषधिसम्बद्धाधुनिकतमान्वेषणैः परिचितो भवेत्। तथैव शिक्षायाः जिज्ञासवः छात्रः अनुसन्धानकर्तारश्चापि स्वाध्ययनक्षेत्रे सम्बद्धसूचनाभिः

अन्वेषणैश्च परिचिता: भवेयु:।''

सी.वी. गुडमहोदयानुसारेण- ''प्रकाशितसाहित्यस्य विशालभण्डारस्य कुञ्जिका: महत्त्वपूर्णसमस्यानां व्याख्यात्मकपरिकल्पनानाञ्च स्रोतसां द्वार-मुद्घाटयन्ति। सर्वेक्षणेन समस्याया: परिभाषीकरणम् अध्ययनविधिचयनं, परिणामानां व्याख्यानं तुलनात्मकप्रदत्तेषु सहायकमधिगमनञ्च भवति।''

(The keys to the vast storehouse of published literature may open doors to sources of significant problems and explanatory hypothesis and provide helpfull orientation for defination of the problem, background for selection of procedure and comparative data for interpretation of the result. In order to be creative and original, one must read extensively and critically as a stimulus to thinking.- C.V. Good)

डब्ल्यू.आर.बोर्गमहोदयानुसारेण- ''कस्यचनाऽपि क्षेत्रस्य साहित्यं सैव/तत् आधारशीला, यस्याम् आधारशीलायां भावीकार्यस्य निमार्णं भवति।'' (Literature in any field forms the foundation upon which all future work will be built.- Walter R.Borg)

उक्तविश्लेषणेन इदं स्पष्टं यत् सम्बन्धितसाहित्यस्य अध्ययनम् अनुसन्धानकार्यस्य अभिन्नाङ्गं, भवति। सम्बन्धितसाहित्येन कृतकार्यस्य औचित्यस्पष्टीकरणे, रूपरेखानिर्माणे प्रदत्तानां संकलने व्याख्याने च सहाय्यं प्राप्यते। सम्बन्धितसाहित्यस्य अध्ययनस्य महत्त्वविषये सम्यक् ज्ञानस्याभावे प्राय: अनुसन्धानकर्तार: सम्बन्धितसाहित्यस्य गभीरावलोकनं न कुर्वन्ति। अनुसन्धानकार्ये अस्य महत्त्वस्य उचितज्ञानम् आवश्यकमस्ति। विदुषां मतानुसारेण अनुसन्धानकार्ये सम्बन्धितसाहित्यसर्वेक्षणस्य महत्वं अधोलिखितं वर्तते-

1. इदम् अनुसन्धानसमस्यानां चयने सहायकानां सिद्धान्तानां व्याख्यानं परिकल्पनाञ्च ज्ञाने सहायतां करोति।
2. सम्बन्धितसाहित्यस्याध्ययनम् अनुसन्धानकर्तरि समुपयुक्तसमस्याया: चयने सहायकं भवति।
3. इदम् अनुसन्धानसमस्याया: सीमांकने, परिभाषिकरणे, परिकल्पनानिरूपणे, अनुसन्धानाभिकल्पनिर्माणे सहायकं भवति।

4. सम्बन्धितसाहित्यस्याध्ययनम् अध्ययनक्षेत्रे क्रियमाणकार्यस्य ज्ञानं प्रदाय अनुसन्धानकार्यस्य रेखांकनं करोति। अनेन पूर्वविहितानुसन्धानकार्याणां पुनरावृत्तिः अवरोध्यते अत एव अनुसन्धानकर्त्ता पूर्वस्थापितसिद्धान्तानां पुनरावृत्तिं न करोति।

5. इदम् चयनितसमस्यायाः सार्थकतां महत्त्वञ्च सुस्पष्टं करोति तथा च अपेक्षितपरिणामानां निहितार्थान् प्रकटीकरोति।

6. सम्बन्धितसाहित्यस्याध्ययनेन सम्बद्धप्रत्ययानामभिधारणानां सिद्धांतानां स्पष्टीकरणं भवति।

7. परिमाणात्मकं गुणात्मकञ्च अनुसन्धानस्य अध्ययनं वा सर्वेक्षणं सामान्यरूपेण अनुसन्धानकर्तारं समुचितदिशायाः संकेतं प्रददाति।

8. इदमनुसन्धानकार्यस्य रूपरेखानिर्माणे विस्तृतकार्ययोजनानिर्माणे च सहायतां करोति।

9. इदम् अनुसन्धानकार्येण प्राप्तपरिणामानां व्याख्याने तदनुसारञ्च निष्कर्षनिर्धारणे नवीनज्ञानसर्जने सहायकं भवति।

10. इदं सम्बन्धिताध्ययनक्षेत्रे भावि-अध्ययनकृते महत्त्वपूर्णसमस्याः जिज्ञासाः काठिन्यताश्च प्रति संकेतं करोति।

11. सम्बन्धितसाहित्यस्य अध्ययनं प्राप्तनिष्कर्षणां व्यावहारिकोपयोगितायाः रेखांकनं कृत्वा अनुसन्धानस्य आवश्यकतां महत्त्वञ्च स्पष्टीकरणं करोति।

12. सम्बन्धितसाहित्यस्याध्ययनेन सर्वेक्षणेन च तुलनात्मकाध्ययने विश्लेषणे च सहाय्यं प्राप्यते।

13. सम्बन्धितसाहित्यस्याध्ययनेन अनुसन्धानकार्ये प्रयुज्यमानानां सम्भावितोपयुक्तोपकरणानां ज्ञानं भवति।

14. सम्बन्धितसाहित्यस्याध्ययनेन समस्यायाः अध्ययनाय सम्भावितप्रविधिनां ज्ञानं प्राप्यते।

15. सम्बन्धिसाहित्यस्याध्ययनेन सर्वेक्षणेन च अनुसन्धानकर्तुः ज्ञानाकाशे वृद्धिर्भवति।

16. सम्बन्धितसाहित्याध्ययनेन सर्वेक्षणेन सांख्यिकीयविधिना ज्ञानं भवति। येन परिणामस्य वैधतायाः बोधो भवति।

17. सम्बन्धितसाहित्यस्याध्ययनम् अनुसन्धानकर्तारं स्व-अनुसन्धानकार्ये परिष्कारस्य दृष्टिं प्रददाति।

18. अनेन अनुसन्धानकार्यं समय-श्रम-व्ययदृष्ट्या मितव्ययि भवति।

## 2.3 सम्बन्धितसाहित्याध्ययनस्योद्देश्यानि

अनुसन्धानविशेषज्ञैः सम्बद्धसाहित्यस्य पुनरावलोकनस्य केषाञ्चनोद्देश्यानां व्याख्यां कृतवन्तः तेषु प्रमुखानि उद्देश्यानि सन्ति-

1. सम्बन्धितसाहित्यस्य अध्ययनं महत्त्वपूर्णचराणामन्वेषणे सहायकं भवति।
2. अस्मिन् अनुसन्धानकार्यार्थं सिद्धान्ताः, विचाराः, व्याख्याः, परिकल्पनाः च प्रदत्ताः सन्ति ये नूतनसमस्यायाः चयनार्थं, अनुसन्धानपरिकल्पनायाः निर्माणे पूर्वपरीक्षितपरिकल्पनानां च विषये ज्ञानं विस्तारयति।
3. चयनितसमस्यायाः कृते का विधिः प्रक्रिया च उपयुक्ता भविष्यति? किं किम् उपकरणम् आनेतुं युक्तं स्यात्, किं सांख्यिकीयप्रयोगः भविष्यति? एतेषां सर्वेषां विषये सूचनां ददाति। अतैव कथितुं शक्यते यत् सम्बन्धितसाहित्यस्य अध्ययनम् अनुसन्धानोपकरणस्य अभिकल्पस्य च निर्माणे सहायकं भवति।
4. प्रदत्तानां सङ्कलने प्रदत्तानां विश्लेषणे च सहायकं भवति तथा च तुलनात्मकतथ्यानि प्रस्तूय प्राप्तपरिणामस्य सामान्यीकरणे सहयोगं करोति।
5. सम्बन्धितसाहित्यस्याध्ययनम् अनुसन्धानानां पुनरावृत्तिम् अवरोधयति।
6. अनुसन्धानविषयकनूतनसमस्यानां चयने सहयोगं ददाति।
7. पूर्वविहितानुसन्धानानां विषये अन्तःदृष्टिं प्रददाति।
8. यत्कृतमस्ति यच्च करिष्यते इत्यनयोर्मध्ये पृथक्करणं करोति।
9. अनुसन्धानकर्तुः ज्ञानकोषं वर्धयति।

## 2.4 सम्बन्धितसाहित्याध्ययनस्य स्रोतांसि

अनुसन्धानसमस्यायाः समाधानार्थं सम्बन्धितसाहित्यसर्वेक्षणम् आवश्यकं भवति। एतदर्थं तस्य सामग्र्याः अवबोधमपि आवश्यकं भवति यस्याध्ययनं अनुसन्धानसमस्यायाः समाधानार्थं महत्त्वपूर्णं वर्तते। सम्बन्धितसाहित्यस्यान्तर्गते

सूचनानां स्त्रोतांसि द्वाभ्यां वर्गाभ्यां विभाजिताः सन्ति- प्राथमिकस्त्रोतः एवञ्च द्वितीयस्त्रोतः। साररूपेण अनुसन्धानकार्येन सह सम्बद्धितसाहित्यस्य अधोलिखित-प्रकाराः सन्ति-

- अनुसन्धानग्रन्थाः (Thesis)
- लघ्वनुसन्धानप्रबन्धाः (Dissertations)
- शिक्षायाः मनोविज्ञानस्य च लेखसारांशाः (Educational and PsychologicalAbstract)
- विश्वकोषः (Encyclopedias)
- पत्रिका संदर्भपुस्तकानि च (Magazines and Reference)
- समसामयिकप्रकाशनानि (Periodicals)
- अनुसन्धानपत्रिका (Research Journal)
- परियोजनाप्रतिवेदनम् (Project Report)
- समाचारपत्राणि (Newspapers)
- कोषाः (Dictionary)

कस्मैचन् अपि अनुसन्धानकार्याय संबंधितसाहित्यस्य विस्तृतरूपेण अध्ययनं भवति। यानि अधीत्य अनुसन्धानकर्त्री स्व-अनुसन्धानकार्य सम्यग्रूपेण सम्पादयितुं समर्था भविष्यति। सम्बन्धितसाहित्यध्ययनस्य कतिपयानि उदाहरणानि इमानि सन्ति-

वाह्युनिंगशि इन्वि, सूर्यादि नंदाः (2018); पेकानबारूइस्लामिक-विश्वविद्यालये लेखा (Accounting) विषयस्य छात्राणां नैतिकदृष्टिकोणे बुद्धिलब्धेः, भावात्मकलब्धेः आध्यात्मिकलब्धेश्च प्रभावः (The Effect of Intelligence Quotient, Emotional Quotient, and Spiritual Quotient on The Ethical Attitude of Accounting Students at Islamic Universities in Pekanbaru (Empirical Study on Riau Islamic University and State Islamic University Sultan Syarif Kasim). प्रस्तुतानुसन्धानस्योद्देश्यानि सन्ति- लेखाछात्राणां नैतिकदृष्टिकोणे बौद्धिकभावात्मकाध्यात्मिकबुद्धेः प्रभावस्य परीक्षणम्। आंशिकरूपेण परीक्षणं कस्य चरस्य प्रमुखः प्रभावः। अनुसन्धानकार्ये उद्देश्यपूर्णस्य प्रतिदर्शचयन-

विधेः प्रयोगः अभवत्। प्रदत्तानां संकलनं प्रश्नावल्याः प्रलेखनस्य साहाय्येन अभवत्। अनुसन्धानस्य परिणामेन इदं ज्ञायते यत् विश्वविद्यालयीयलेखाछात्राणां नैतिक- दृष्टिकोणे बौद्धिकभावात्मकाध्यात्मिकलब्धेः महत्त्वपूर्णः प्रभावः अस्ति। आंशिकरूपेण नैतिकदृष्टिकोणे बौद्धिकलब्धेः महत्त्वपूर्णः प्रभावः अस्ति।

देवी सलोनी; (2016); कर्मचारिणां कार्यस्योपरि आध्यात्मिकता-भावात्मकबुद्धे प्रभावः (Impact of spirituality and emotional intelligence on employee engagement), अस्य अनुसन्धानस्य निष्कर्षाः सन्ति- योग्यकर्मचारी कस्यापि संघटनस्य बृहत्संपत्तिर्भवति। कर्मचारिणां प्रवीणता संघटनस्य समक्षे जायमानानां समस्यानां संदर्भे महतीं भूमिकां निर्वहति। स्वक्षमतानां संस्थानाय संवर्द्धनाय च आध्यात्मिकता भावात्मकबुद्धिश्च अपेक्षिता भवति। स्वक्षमताः संस्थापयितुं संवर्द्धयितुं च कर्मचारिषु भावात्मकाध्यात्मिकबुद्धीं प्रति दूरदृष्टिः अपेक्षिता। भावात्मकाध्यात्मिकबुद्धिविषये पर्याप्तज्ञानप्रदाय अथ च संस्थायां कर्मचारिणां दायित्वकृते सहयोगात्मक-सहायकवातावरणनिर्माणाय प्रोत्साहनं प्रदाय च कर्मचारिषु अभिप्रेरणं, सक्रियदृष्टिकोणं च उत्पादयितुं शक्यते। कर्मचारिणां योग्यता व्यावसायिक-एककः (Business units) इत्यस्य अस्तित्वस्य कृते प्रमुखाः समस्याः वर्तन्ते। अत एव कर्मचारिणां कार्यव्यस्ततायाः हेतोः सततप्रयासः अपेक्षितः यतोहि कार्यव्यस्ततामाध्यमेन व्यवहारपरिवर्तने सौविध्यं प्राप्यते येन कार्यसंपादने परिष्कारः संभवति। अत एव, कार्यरतकर्मचारिणां कौशलज्ञानविकासाय आध्यात्मिकता भावात्मकबुद्धिश्च आवश्यकी।

वाधवानी प्रीति; (2015); मनोवैज्ञानिकसङ्कटपरिवर्तनस्य संभावनायाः च पूर्वानुमानकृते बुद्धेः महत्त्वपूर्णायाम इत्यस्य अनुसंधानम्। (Searching the Most Crucial Dimension of Intelligence as a Predictor of Psychological Risk and Change Proneness), प्रस्तुतानुसन्धानपत्रस्य उद्देश्यमस्ति शिक्षकेषु मनोवैज्ञानिकविपत्तिविषये पूर्वकथनं परिवर्तनशीलतायाः च परीक्षणम्। भोपालप्रदेशस्य विद्यालयानां महाविद्यालयानां चयनं कृत्वा तत्रत्यप्रतिदर्शरूपेण 373 विभिन्नविषयानां शिक्षकाणां चयनं यादृच्छिकप्रतिदर्शचयनविधिद्वारा कृतम्। प्रदत्तानां चयनार्थं मानकीकृत-उपकरणानां प्रयोगः कृतः। प्राप्तपरिणामेन इदं स्पष्टं यत् पूर्वकथने बौद्धिकभावात्मकाध्यात्मिकलब्धेः व्यक्तिगत-संयुक्तरूपेण च महत् योगदानं

भवति। अनुसन्धानेऽस्मिन् एनसीटीईप्रदत्त दिशानिर्देशानुसारेण शैक्षिकनिहितार्थ इत्यस्य चर्चा कृता वर्तते।

कोटनाला सुषमा; (2015); स्नातकछात्राणाम् आध्यात्मिकबुद्धेः अध्ययनम् (A Study of Spiritual Intelligence among Graduate Students). अनुसन्धानस्य मुख्योद्देश्यं स्नातकछात्राणाम् आध्यात्मिकबुद्धेः ज्ञानम् अस्ति। अनुसन्धानस्य प्रतिदर्शे त्रिंशत् पुरुषछात्राणां त्रिंशत् महिलाछात्राणां च चयनम् असंभाव्यताप्रतिदर्शचयनविधिमाध्यमेन कृतम्। एवं प्रकारेण समग्ररूपेण प्रतिदर्शे षष्टिः छात्राणां चयनम् जातम्। प्रस्तुतानुसन्धानस्य अध्ययनेन ज्ञायते यत् पुरुषमहिलाछात्राणां चतुरायामेषु समीक्षात्मकास्तित्ववादीचिन्तनम्, व्यक्तिगतार्थोत्पादनम्, परात्पराभिज्ञता, चेतनादशाविस्तारः इत्येतेषु किमपि अन्तरं नास्ति। अध्ययनेन निष्कर्ष प्राप्यते यत् आध्यात्मिकबुद्धौ जेंडर (लिङ्ग) इत्यस्य कोऽपि प्रभावः न भवति।

मिश्रा प्रतिमा, वशिष्ट कमला, च; (2014); 21वीं शताब्द्यां किशोराणां आध्यात्मिकबुद्धेः मानसिकदुःश्चिन्तायाः स्वास्थस्य च समीक्षात्मकमध्ययनम् (A Review study of Spiritual Intelligence, Stress and Well-Being of Adolescents in 21st Century), प्रस्तुताध्ययनस्योद्देश्यमासीत्-एकविंशतिशताब्द्यां किशोराणां आध्यात्मिकबुद्धेः मानसिकदुःश्चिन्तायाः स्वास्थस्य च समीक्षात्मकम् अध्ययनम्। पूर्वकृतानुसन्धानानामवलोकनेन ज्ञायते यत् मानसिकक्लेशं स्वास्थ्यं उभावपि चरौ परस्परं नकारात्मकरूपेण सम्बद्धौ स्तः। अथ च इमे शैक्षिकबुद्ध्या (IQ), भावात्मकबुद्ध्या (EQ), आध्यात्मिकबुद्ध्या (SQ) च प्रभाविता भवन्ति। साहित्यसमीक्षयेदं स्पष्टं भवति यत् आध्यात्मिकबुद्धौ प्रशिक्षणेन परिमार्जनं सम्भवति। बुद्धेः प्रकाररूपेण आध्यात्मिकता मनोवैज्ञानिकानां आध्यात्मिकसम्प्रत्ययं विस्तारयति तथा च तर्कयुक्ताः संज्ञानात्मिकाः प्रक्रियाः यथा लक्ष्यप्राप्तौ समस्यासमाधाने च स्वसहयोगमपि स्वीकृतम्। आध्यात्मिकबुद्धिः व्यक्तिं एकः सामान्यः आधारः प्रददाति। यदि जीवने लक्ष्याणाम् अर्थस्य च संदर्भे विचारयितुं वैयक्तिकरूपेण सार्थकलक्ष्यं प्रति नेतुं सहायको भवति। इयं बुद्धिः व्यक्तेः विचारक्षेत्रं व्यापकं करोति तथा च सावधानमनसा तस्याः गतिविधिषु विस्तृतपरिप्रेक्ष्ये अवधानं प्रददाति।

एम. सुब्रमण्यम् एन. पंचनाथन् च; (2014); प्रबन्धनकार्यकारी-अधिकारिणां भावात्मकाध्यात्मिकबुद्धेः स्वास्थ्ये च संबंधः। (Relationship

between Emotional Intelligence, Spiritual Intelligence and well being of Management Executives), प्रस्तुतानुसन्धानस्य अनुसन्धानप्रश्नाः सन्ति- किं भावात्मकबुद्धेः स्वास्थ्यस्य च मध्ये अंतरमस्ति? किं आध्यात्मिकबुद्धेः स्वास्थ्यस्य च मध्ये अन्तरमस्ति? किं भावात्मक-आध्यात्मिकबुद्धि मध्ये अंतरमस्ति? प्राप्तनिष्कर्षेण ज्ञायते यत् भावात्मकाध्यात्मिक-बुद्धिः स्वास्थ्यस्य च मध्ये महत्त्वपूर्णं संबंधः अस्ति। परिकल्पना अपि अध्ययनानुकूला अस्ति। इदमपि ज्ञायते यत् भावात्मकाध्यात्मिकबुद्धीपरस्परपूरिका स्तः। एताभ्यां बुद्धिभ्यां उच्चस्वास्थ्यसंभावना अधिकं वर्तते। एतदतिरिच्य इदमपि ज्ञायते यत् भावात्मकाध्यात्मिकबुद्धौ विकासं संवर्द्धनं केवलं प्रबंधनाधिकारिणां स्वास्थ्याय न अपितु संस्थायाः सम्यक् विकासाय एकं विधिरूपेण स्वीक्रियते।

शाहिन इब्राहिमी कूनबनानी, रेजा दस्तजेरबी, ताधी वाहिदी मोहम्मद, हसन घानी फार; (2013); बिरजैंड गिफ्टेड फीमेल हाईस्कूल इत्यस्य छात्रासु आध्यात्मिकसंतुष्ट्या साकं आध्यात्मिकभावात्मकबुद्धयोः मध्ये संबंधः। (The Relationship Between Spiritual Intelligence and Emotional Intelligence with Life Satisfaction Among Birjand Gifted Female High School Students), अनुसन्धानस्य मुख्योद्देश्यमस्ति- ईरान, बिरजैंड प्रदेशस्य गीफ्टेड हाईस्कूलछात्रासु आध्यात्मिक-भावात्मकबुद्धयोः मध्ये संबंधस्य जीवनसंतुष्टिश्च परिज्ञानं। अन्योद्देश्यानि सन्ति-गीफ्टेड हाईस्कूलछात्रासु आध्यात्मिकबुद्धिः जीवन-संतुष्टि मध्ये संबंधस्य परिज्ञानं अथ च भावात्मकबुद्धि-जीवनसंतुष्टयोः मध्ये संबंधस्य परिज्ञानम्। निष्कर्षः- सहसंबंधगुणांकाधारेण निष्कर्षम् इदं प्राप्तं यत् जीवनसंतुष्टिम् उपरि आध्यात्मिकबुद्धेः घटकानां तुलनायां भावात्मकबुद्धेः घटकानां प्रभावः अधिकः। अध्ययने अयं निष्कर्षः प्राप्तो यत् आध्यात्मिकबुद्धेः (सामान्यरूपेण) जीवनसंतुष्टेश्च मध्ये कोऽपि सकारात्मकः अर्थपूर्णञ्च संबंधो नास्ति।

कौर गुरकीरत, सिंह रविन्द्र च; (2012); भावी अभियन्तानां अध्यापकानाञ्च आध्यात्मिकबुद्धेः तेषां लिङ्ग-परिवेश-पारिवारिकस्थित्तिनां सम्बन्धेः अध्ययनम् (Spiritual Intelligence of Prospective Engineers and Teachers in Relation to their Gender, Locality and Family Status), प्रस्तुताध्ययनस्योद्देश्यमासीत् संभाविताभियंतानाम् अध्यापकानां च आध्यात्मिकबुद्धेः तां बुद्धिं प्रभावितानां कारकानामध्ययनम्। प्रस्तुताध्ययनं पंजाबप्रदेशस्य महाविद्यालयेषु अथ च

शिक्षकप्रशिक्षणविद्यालेषु अध्ययनरता: 92 अध्यापकानामभियन्तानाञ्च यादृच्छिकविधे: चयनं कृत्वा कृतमस्ति। अनुसन्धानेऽस्मिन् बुद्धे: मापनार्थं वाल्मनमहोदयेन (2001) निर्मितं "Selfreporting Four point Likert-type psychomatrix Spirituality Inventory" इति उपकरणस्य प्रयोगम् अभूत्। प्रस्तुतअनुसन्धानस्य उद्देश्यानि सन्ति- भावी अभियंतानां शिक्षकाणाञ्च आध्यात्मिकबुद्धि: तस्या: कारकानाञ्च अध्ययनम्, भावी अभियंतानां शिक्षकाणाञ्च आध्यात्मिकबुद्धि: तस्या: कारकानाञ्च संरचनाया:, पर्यावरणस्य, पारिवारिकस्तरस्य अथ च तेषां लिङ्गम् (जेंडर) इत्यादिविषये अध्ययनम्। अध्ययनेन ज्ञायते यत् प्रतिभागिषु उच्चाध्यात्मिकबुद्धि: अस्ति। इदमपि ज्ञायते यत् लैंगिकसमता (जेंडर), पारिवारिकस्तरस्य स्थित्या: च आध्यात्मिकबुद्ध्यां एतस्यां कारकानामुपरि च कोऽपि सार्थकप्रभावं न भवति। अध्ययनस्य निष्कर्ष: अस्ति यत् उन्नते: परोपकाराय च छात्राणां आध्यात्मिकबुद्धे: विकासस्य प्रयासम् अवश्वमेव कर्त्तव्यम्।

क्वाजोटे एफ., मोरेनो वी., हिकमान एम. च; (2012); रूपान्तरणीयनेतृत्वे अथ च प्रबन्धकीयनिष्पादने नेतृत्वबुद्धि:, व्यक्तित्वं एवञ्च भावात्मकबुद्धे: प्रभाव:। (Effects of leader intelligence, personality and emotional intelligence on transformational leadership and managerial performance.), अनुसन्धानकार्यमिदं ब्राजील इति देशस्य ऊर्जाक्षेत्रस्य संस्थायां कार्यरत: चर्तुत्रिंशतोत्तरएकशतम् (134) मध्यस्तरीय प्रबन्धकानां बुद्धि-व्यक्तित्वगुण-संवेगात्मकबुद्धिनामुपरि च आधारितम् अस्ति। बुद्धि- व्यक्तित्वगुण-संवेगात्मकबुद्धौ मापनार्थं WLEIS-वांग तथा च लॉ भावात्मकबुद्धिमापिनी (Wong and Law Emotional Intelligence Scale) इति मापिन्या: प्रयोग: कृत:। कार्यसंपादनस्य मापनं वार्षिककार्यसंपादननिर्धारणमापिन्या (Annual Performance Ratnigs) कृतम्। निष्कर्षरूपेण ज्ञायते यत् कार्यसंपादने भावात्मककबुद्धीनां सम्बन्धो भवति। व्यक्तित्वस्य बुद्धेश्च चराणां नियंत्रणे सम्बन्धोऽयं असार्थक इति ज्ञायते।

इलियासी घासिम, इस्माइल सोनिया, मीर हामिद च; (2012); शारीरिक-क्रीडकानां शारीरिकक्रीडकेतराणाम् आध्यात्मिकबुद्धौ मानसिकस्वास्थ्यसम्बन्ध-स्याध्ययनम् (The relationship between spiritual intelligence and mental health among athletes and non-athletes, Pelagia Research Library, European Journal of Experimental Biology), अनुसन्धानस्य मुख्यं लक्ष्यं शारीरिकक्रीडकानां शारीरिकक्रीडकेतराणां आध्यात्मिकबुद्धौ मानसिक-

स्वास्थ्यसम्बन्धस्याध्ययनमस्ति। प्राप्तनिष्कर्षैः ज्ञायते यत् निपुणशारीरिकक्रीडकानां नूतन शारीरिकक्रीडकानां विभिन्नक्रीडासु शारीरिकक्रीडकेतराणाञ्च आध्यात्मिकबुद्धौ न कोऽपि सम्बन्धोऽस्ति। निपुणक्रीडकानां नूतनक्रीडकानां तथा च वैयक्तिक-शारीरिकक्रीडकानां मानसिकस्वास्थ्ये न कोऽपि सार्थको भेदो प्राप्ताः। अनुसन्धान-परिणामं प्रदर्शयति यत् बौद्धिकेषु शारीरिकक्रीडकेषु शारीरिकक्रीडकेतरेषु च प्रतिकूलसार्थकसम्बन्धः प्राप्तोऽभवत्।

राय सविता; (2012); सेवापूर्वशिक्षकाणां भावात्मकप्रज्ञायाः शिक्षण-व्यवसायाभिवृत्तेश्च तुलनात्मकमध्ययनम्, प्रस्तुतानुसन्धानस्य उद्देश्यमेवं प्रकारेण विद्यते शिक्षकाणां भावात्मकप्रज्ञायाः अध्ययनम्, शिक्षकाणां शिक्षणव्यवसायाभिवृत्तेः अध्ययनम्, लिङ्गाधारेण शिक्षकाणां भावात्मकप्रज्ञायाः तुलनात्मकमध्ययनम्, लिङ्गाधारेण शिक्षकाणां शिक्षणव्यवसायाभिवृत्तेः तुलनात्मकम् अध्ययनम्। शिक्षकाणां भावात्मकप्रज्ञा शिक्षणव्यवसायाभिवृत्त्योर्मध्येसम्बन्धस्य अध्ययनम्। अस्य अनुसन्धान-कार्यस्य निष्कर्षाः सन्ति – अधिकांशतः सेवापूर्वशिक्षकेषु उच्चस्तरस्य भावात्मकप्रज्ञा आसीत। सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च भावात्मकप्रज्ञायां अतिन्यूनभेदो प्राप्ता। भावात्मकप्रज्ञा शिक्षणव्यवसायाभिवृत्त्योर्मध्ये उच्चपारस्परिकनिर्भरता भवति।

सिंह अजेंदर, तीरथ च; (2010); किशोराणाम् आध्यात्किबुद्धिसन्दर्भे मानसिकस्वास्थ्यस्याध्ययनम्, अनुसन्धानस्य परिणामस्वरूपं ज्ञायते यत् छात्राणामाध्यात्मिकबुद्ध्यासार्धं मानसिकस्वास्थ्यस्य सार्थकसहसम्बन्धं विद्यते।

कलासुआ मनीषा; (2010); भाषाशिक्षकाणां शैक्षिकसंवेगात्मकबुद्धेः तुलनात्मकमध्ययनम्, प्रस्तुतानुसन्धानस्योद्देश्यमेवं प्रकारेण विद्यते-भाषाशिक्षकेषु शैक्षिकबुद्धेः तुलनात्मकमध्ययनम्, भाषाशिक्षकेषु भावात्मकबुद्धेः तुलनात्मक-मध्ययनम्, भाषाशिक्षकेषु शैक्षिकभावात्मकबुद्धेः तुलनात्मकमध्ययनम्। अस्य अनुसन्धानकार्यस्य निष्कर्षाः सन्ति- संस्कृतभाषाशिक्षकाणां शैक्षिकबुद्धि हिन्दीभाषाशिक्षकाणाम् अंग्रेजीभाषाशिक्षकाणाञ्च तुलनायां किञ्चिद् अधिकं प्राप्ता। हिन्दीभाषाशिक्षकाणां भावात्मकबुद्धि संस्कृतभाषाशिक्षकाणाम् अथ च अंग्रेजीभाषाशिक्षकाणां तुलनायां किञ्चिद् अधिकं प्राप्ता। शैक्षिकभावात्मकबुद्धेः तुलनात्मकं विश्लेषणस्याधारेण निष्कर्षोऽयं प्राप्यते यत् संस्कृत-हिन्दी-अंग्रेजीशिक्षकाणां भावात्मकबुद्धि शैक्षिकबुद्ध्याः तुलनायां किञ्चिद् अधिकमस्ति। संस्कृतभाषाशिक्षकाणां हिन्दीभाषाशिक्षकाणां अथ च अंग्रेजीभाषाशिक्षकाणां

तुलनात्मकविश्लेषणे हिन्दीभाषाशिक्षकाणां भावात्मकबुद्धि किञ्चिद् अधिकं प्राप्ता।

पाण्डेय मनीषकुमार:; (2010); परंपरागताधुनिकपद्धत्याम् अध्ययनरत–छात्राणां सांवेगिकबुद्धेः अध्ययनम्, प्रस्तुतानुसन्धानस्य उद्देश्यमेवं प्रकारेण विद्यते– परंपरागत अथ च आधुनिक पद्धत्याम् अध्ययनरत विद्यार्थिनां सांवेगिकबुद्धेः अध्ययनम्, परंपरागतपद्धत्याम् अध्ययनरतछात्राणां एवं आधुनिकपद्धत्याम् अध्ययनरतछात्राणां सांवेगिकबुद्धेः अध्ययनम्, आधुनिकपद्धतयाम् अध्ययनरत छात्र–छात्राणां सांवेगिकबुद्धेः अध्ययनम्, परंपरागतपद्धत्याम् अध्ययनरत-छात्र-छात्राणां सांवेगिकबुद्धेः अध्ययनम्। अस्य अनुसन्धानकार्यस्य निष्कर्षः आसीत्– परंपरागताधुनिकपद्धत्यां च अध्ययनरतविद्यार्थिनां सांवेगिकबुद्धेः किमपि अन्तरं नास्ति। परंपरागतपद्धत्याम् अध्ययनरतछात्राणाम् आधुनिकपद्धत्या अध्ययनरतछात्राणां सांवेगिकबुद्धौ किमपि अन्तरं नास्ति।

कौर बलविन्दर; (2010); व्यावसायिकमहाविद्यालयानां अध्यापकानां मानसिकस्वास्थ्यस्य भावात्मकबुद्धेश्च अध्ययनम् (A Study of the Mental Health and Emotional Intelligence of Professional College Teachers), प्रस्तुतानुसन्धानकार्यस्योद्देश्यमस्ति संवेगात्मकबुद्ध्याः मानसिकस्वास्थ्यस्य च तुलनात्मकमध्ययनम्। अस्य अनुसन्धानकार्यस्य निष्कर्षाः सन्ति– पुरुषमहिलयोः संवेगात्मकबुद्ध्यां सार्थकमन्तरं न प्राप्तम्। पुरुषमहिलयोः मानसिकस्वास्थ्ये अन्तरं प्राप्तम्। चरेण सह सम्बन्धस्य सन्दर्भे अपि अन्तरं प्राप्तम्।

किंग डेविड बी.; (2008); आध्यात्मिकबुद्धिलक्षणे पुनर्विचारः –एका परिभाषा, प्रतिरूपोपायश्च (Rethinking claims of Spiritual Intelligence: A Definition , Modal and Measure", A thesis for the degree of Master of Science), अनुसन्धानेऽस्मिन् आध्यात्मिकबुद्धिः मानसिकक्षमतायाः समूहरूपेण स्वीकृता। चतसृणां तत्त्वानाम्– समीक्षात्मकास्तित्ववादिचिन्तनम् (Critical Existential Thinking), व्यक्तिगतार्थोत्पादनम् (Personal Meaning Production), परात्पराभिज्ञता (TranscendentalAwarreness) एचेतनदशाविस्तारः (Conscious State Expansion) एतेषाम् अध्ययनस्याधारेण आध्यात्मिकबुद्धेः मापनार्थं 'आध्यात्मिकबुद्धि आत्मप्रतिवेदन अभिसूची' (The Spiritual Intelligence Self Report Inventory) इत्यस्य निर्माणं कृतम्।

जोशी अमिता; (2008); लैङ्गिक-सामाजिकार्थिककारकानां च आधारेण छात्राध्यापकानां भावात्मकाध्यात्मिकबुद्धेः संबंधितानां योग्यतानाम् अध्ययनम् (Study of Spiritual Intelligence and Emotional Intelligence Related abilities of Teacher Trainees in relation to their Gender and some socio-educational factors), अनुसन्धानप्रबंधम्, प्रस्तुतानुसन्धानस्य मुख्योद्देश्यानि सन्ति-जेंडर-आधारित- समूहाधारेषु छात्राध्यापकानाम् आध्यात्मिकबुद्धेः अन्तरज्ञानम्, जाति- आधारितसमूहाधारेषु छात्राध्यापकानाम् आध्यात्मिकबुद्धेः अन्तरज्ञानम्, शैक्षिकोपलब्धि-आधारितसमूहाधारेषु छात्राध्यापकानाम् आध्यात्मिकबुद्धेः अन्तरज्ञानम्, शैक्षिकधाराधारितसमूहाधारेषु छात्राध्यापकानाम् आध्यात्मिकबुद्धेः अन्तरज्ञानम्, जेंडर-आधारितसमूहाधारेषु छात्राध्यापकानां भावात्मकबुद्धेः अन्तरज्ञानम्, जाति-आधारितसमूहाधारेषु छात्राध्यापकानां भावात्मकबुद्धेः अन्तरज्ञानम्, शैक्षिकोपलब्धि- आधारितसमूहाधारेषु छात्राध्यापकानां भावात्मकबुद्धेः अन्तरज्ञानम्, शैक्षिकधाराधारितसमूहाधारेषु छात्राध्यापकानाम् भावात्मकबुद्धेः अन्तरज्ञानम्, छात्राध्यापकानां भावात्मकाध्यात्मिकबुद्धयोर्मध्ये सीमाप्रकृत्तेश्च ज्ञानम्। अध्ययनेन ज्ञायते यत् भावात्मकबुद्धौ आध्यात्मिक प्रज्ञया सह संबद्ध मापन्याम् आध्यात्मिकबुद्धौ च कोऽपि संबंधो नास्ति। उभयोः योग्यतयोः आधारेण छात्राध्यापक-छात्राध्यापिकाश्च समाना सन्ति। इदमपि ज्ञायते यत् भावात्मकबुद्ध्या संबंधितभावात्मकसाक्षरता आध्यात्मिकबुद्धेः सह संबंद्धो भवति।

यंग के-पींग; (2006); ताइवानदेशस्य परिचारिकानां आध्यात्मिकबुद्धेः अध्ययनम् (The Spiritual Intelligence of Nurses in Taiwan), प्रस्तुतानुसन्धानस्य उद्देश्यमेवं प्रकारेण विद्यते-परिचारिकाणाम् आध्यात्मिकबुद्धेः रूपरेखायाः परिभाषिकरणम्, ताषाम् आध्यात्मिकबुद्धेः जनसांख्यिकीयविशिष्टतायाः (Demographic characterstics) मध्ये सम्बन्धस्य अध्ययनम्, तासाम् आध्यात्मिकबुद्धिः अथ च तया सम्बन्धितकारकानां विश्लेषणम्। अध्ययनार्थं वूलमेनमहोदयेन निर्मितायाः आध्यात्मिकाभिसूच्याः प्रयोगः कृतः। निष्कर्षरूपेण 61.4% प्रसरण इत्यनेन इदं ज्ञायते यद् अवस्थाविशेषं बाल्यावस्थायाश्च आध्यात्मिकता परिचारिकाणाम् आध्यात्मिकबुद्धिं प्रभावितयोः महत्त्वपूर्णचरयोः स्तः।

काल्याल एस., अवस्थी इ. च; (2005); चण्डीगढ़प्रदेशस्य किशोराणां भावात्मकबुद्धेः लिङ्गभेदः (Gender Differences in Emotional Intelligence

Among Adolescents of Chandigarh), प्रस्तुतानुसन्धानस्य उद्देश्यमासीत्- लिङ्गभेदाधारेण चण्डीगढ़प्रदेशस्य बालकानां बालिकानाञ्च भावात्मकबुद्धेः अध्ययनम्। भावात्मकबुद्धेः सन्दर्भे बालकानां अथ च बालिकानां माध्यप्राप्तांकेषु भिन्नतायाः आधारे बालकानां तुलनायां बालिकासु उच्चभावात्मकबुद्धिः अस्ति। यद्यपि इदमन्तरं केवलं 0.01 स्तरपर्यन्तमेव प्राप्यते। उपरोक्त उपपत्ति निश्चितरूपेण निर्णायकं नास्ति परञ्च विचाराणां प्रवृत्तेः समर्थकमस्ति। अनेकेषु अध्ययनेषु अस्य परिणामस्य प्राप्तिः अभवत् यथा भोंसले (1999), किंग (1999), सुतारसो (1999), विंग तथा च लव (2001), सिंह (2002)। एतेषां सर्वेषाम् अध्ययनस्यानुसारेण इदं स्पष्टं जातं यत् बालकानां तुलनायां बालिकानां भावात्मकबुद्धिः उच्चतमा भवति।

गुप्ता बी. डी. ; (1989); विज्ञानम् अथ च कलाविषये प्रभाव-शाल्यध्यापकानां बुद्धेः, समायोजनं व्यक्तित्वावश्यकताश्च (Intelligence, Adjustment and Personality needs of Effective Teachers in Science and Arts), अस्मिन् अनुसन्धाने निष्कर्षरूपेण ज्ञायते यत् कलाशिक्षिकाणाम् अपेक्षया विज्ञानशिक्षिकाः अधिकमेव बुद्धिमत्यः सन्ति। कलाशिक्षिकासु विज्ञानशिक्षिकाणाम् अपेक्षया समायोजनक्षमता अधिका वर्तते। शिक्षकाणां शिक्षणप्रभावितायाः लैङ्गिकेन (जेंडर) सह सम्बद्धं नास्ति।

कोहली ओमप्रकाशः; (1989); व्यक्तित्वविशेषतानां बुद्धेः सामाजिकार्थिक-स्तरस्य च सम्बन्धे धर्मं प्रति छात्राणाम् अभिवृत्तेः अध्ययनम् (A study of Attitude of Students towards Religion in relation to Personality Characteristics, Intelligence and Socio – Economic Status.), अनुसन्धानस्य निष्कर्षाः सन्ति- निम्नबुद्धिमतां छात्राणां तुलनायाम् उच्चबुद्धिमत्सु छात्रेषु धार्मिकप्रवृत्तिः अधिका प्राप्ता। सामाजिकार्थिकस्थितिः छात्राणां धार्मिकाभिवृत्तिं न प्रभावयति। बालकानां बालिकानाञ्च मध्यमानप्राप्ताङ्केषु सार्थकभेदेन इदं ज्ञायते यद् बालकानां तुलनायां बालिकासु धार्मिकाभिवृतिः अधिका वर्तते। बालकबालिकयोः व्यक्तित्वगुणेषु सार्थकमन्तरं प्राप्यते।

उपर्युक्तानां सम्बन्धिछात्राणां तस्य अवबोधञ्च भवेत्। एतदर्थं शिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः ज्ञानं परमावश्यकमस्ति। कारणमेतत् अध्यापकः पाठं पाठयति एवं कक्षानिरीक्षणमपि करोति। बालकानाम् अधिगमक्षमताविषये अध्यापको हि अधिकं ज्ञातुं पारयति। एवं च अधिगमसमस्यायाः समाधानमपि

करोति। छात्रैः सह अनुकूलां प्रतिक्रियां करणार्थं स्वसंवेगान् सम्यकरूपेण नियंत्रणं कृत्वा छात्रैः सह तद्नुभूतिं स्थापनार्थं विषयविशेषज्ञतया सह भावात्मकबुद्धेः अथ च आध्यात्मिकबुद्धेः महती आवश्यकता वरीवर्ती। भारतीयपरिप्रेक्ष्ये सेवापूर्व-शिक्षकाणां शैक्षिकबुद्धेः सम्बन्धितकार्यं तु अभवत् परन्तु भावात्मकाध्यात्मिकबुद्ध्या सम्बन्धिताध्ययनं नास्ति। अपि च पाश्चात्यदेशे सेवारताध्यापकैः छात्रछात्राणाञ्च शिक्षणकार्ये भावात्मकाध्यात्मिकबुद्ध्याधारितानि बहुनि अनुसन्धानकार्याणि कृतानि। परञ्च भारतीयपरिप्रेक्ष्ये सेवारतानां वा सेवापूर्वशिक्षकाणां भावात्मकाध्यात्मिक-क्षमतासम्बन्धिताध्ययनम् अधिकं नास्ति। एतदर्थं अस्य अनुसन्धानकार्यस्य आवश्यकता वर्तते। येन माध्यमेन भारतेऽपि रुचिपूर्णकक्षाशिक्षणं तथा च तस्य आवश्यकतायाः अवबोधः अध्यापकः छात्रः ज्ञातुं पारयति। छात्राणां अधिगमक्षेत्रे समस्यानां समाधानम् अध्यापकः कर्तुं पारयति। एतदर्थं अध्यापकः स्वव्यवसाये साफल्यं जनयति।

♦♦♦

तृतीयोऽध्यायः

# अनुसन्धानाभिकल्पः

## 3.1 भूमिका

शिक्षाक्षेत्रे अनुसन्धानार्थं चयनितसमस्यायाः समाधानं विभिन्नप्रकारेण भवितुं शक्यते। समस्यायाः समाधानं प्राप्तुं विभिन्नप्रणाल्यां क्रियमाणं शैक्षिकानुसन्धानस्य विधिः इति कथ्यते। एकस्य सामाजिकानुसंधानस्य उद्देश्यानां पूरणार्थम् अनेकानां विधीनां प्रयोगः क्रियते। कस्यापि अनुसन्धानकार्यस्य प्रारंभपूर्वमेव अनुसन्धानकर्ता स्वानुसन्धानसमस्याः तस्याः संभावितसमाधानञ्च मनसि निधाय सर्वेषां तेषां पक्षाणामुपरि चिन्तयति। तदनन्तरं समस्यायाः सन्दर्भस्य तस्य प्रकृत्या च अनुरूपम् अनुसन्धानविधेः चयनं करोति। अनुसन्धानकर्त्री प्रविधिमाध्यमेन अनुसन्धानतथ्यान् तार्किकविश्लेषणेन-सांख्यिकीयविश्लेषणेन वा प्राक् एकत्रीकरणं कृत्वा क्रमबद्धरूपेण स्थापयति। अस्य प्रविधेः अनुसन्धानाभिकल्पान्तर्गते वा प्रतिदर्शचयनं, प्रदत्तानां सङ्कलनम्, उपकरणानां निर्माणं, परीक्षणविधयः, प्रदत्तानां संग्रहः एवं च विभिन्नसांख्यिकीयविधीनां प्रयोगाः सम्मिलिताः सन्ति। ब्राउडी-महोदयानुसारम्- विधिः कार्याणां अनुक्रमस्य नियमितसंरचनानां निर्देशं प्रददाति। विधयेरन्तर्गते प्रविधयः अपि आगच्छन्ति। अनुसंन्धान-प्रविधयः विधीनां पूरणार्थं रीतयस्सन्ति। अनुसन्धानविधीनां चयनम् अनुसन्धानोद्देश्यानाम् अनुसन्धान-स्वरूपानाञ्चाधारेण क्रियते।''

## 3.2 अनुसन्धानविधिः -

शैक्षिकानुसंधाने समस्यायाः समाधानं विभिन्नप्रकारेण भवति। समस्यायाः समाधानं प्राप्त्यर्थं विभिन्नप्रणालीनां माध्यमानां च नाम भवति शैक्षिकानुसंधानविधिः। विधीनां विषये गुडहॉटमहोदयौः उक्तवन्तौ यत्- ''प्रविधिनामन्तर्गते ते विशिष्टप्रकाराः विलसन्ति यैः समाजशास्त्री शिक्षाशास्त्री च स्वतथ्यानां तेषां तार्किकं वा सांख्यिकीयविश्लेषणात् पूर्वमेकत्रीकरणं क्रमबद्धं वा करोति।'' अनुसंधानविधीनां चयनम् अनुसन्धानसमस्यायाः प्रकृत्यानुरूपेण भवति। नानाविधीनां

प्रयोगः शैक्षिकानुसंधाने दरीदृश्यते। यथा-ऐतिहासिकविधिः, दार्शनिकविधिः, प्रजातिकविधिः, व्यष्ट्यध्ययनविधिः, प्रयोगात्मकविधिः, कार्योत्तरविधिः, सर्वेक्षणविधिः इत्यादयः। ऐतिहासिकविधेः अन्तर्गते ऐतिहासिकतथ्यानां संचयनं कृत्वा समालोचना- विश्लेषणोपरान्तप्राप्तसाक्ष्यानां व्याख्या भवति। दार्शनिकविधौ विचाराणां तथ्यानाञ्च विश्लेषणं संश्लेषणं मूल्यांकनञ्च भवति। प्रजातिकविधिः मूलरूपेण प्रजातिकविज्ञानेन (Ethnography) सह सम्बद्धोऽस्ति। अस्मिन् विधौ मानवव्यवहारस्य तेषां स्वसमूहे अथ च अन्यसमूहानां परिप्रेक्ष्येषु अध्ययनं भवति। व्यष्ट्यध्ययनविधिः गुणात्मकनुसन्धानस्य एकः प्रकारः अस्ति तत्र कस्यापि इकाई इत्यस्य गहनध्ययनम् क्रियते। अध्ययनस्य इकाई इयं व्यक्तिः, परिवारः, समाजं, संस्था कश्चिद् अपि भवितुं शक्यते। प्रयोगात्मकविधेः अन्तर्गते कार्यकारणसम्बन्द्धस्य स्थापना क्रियते। अनुसन्धाने प्रश्नानां सुव्यस्थित-वस्तुनिष्ठोत्तरं प्राप्त्यार्थं प्रयासः येन इदं ज्ञातुं शक्यते यत् यदि 'Y' इति चर मध्ये परिवर्तनं क्रियते तर्हि तस्य परिवर्तनस्य 'X' चर इत्स्योपरि किं प्रभावं भवति, प्रयोगात्मकविधेः नाम्ना अभिधीयते। विधावस्मिन् चरद्वयम्- आश्रितचरं स्वतन्त्रचरञ्च भवतः। कार्योत्तरविधेः तात्पर्यमस्ति- इन्द्रियानुभाविकं वस्तुनिष्ठ-सत्यापनस्य च प्रणाली, यस्यान्तर्गते चराणां स्वरूपे तेषां सम्बद्धितघटनायां अनुसन्धानकर्तुः नियन्त्रणं न भवति। एतासां विधीनां विस्तृतरूपेण वर्णनम् अधोलिखितं वर्तते-

### 3.2.1 ऐतिहासिकविधिः

विधिरयमतीतस्याधारेण नवीनं तत्त्वम् उद्घाटयति। अतीततत्त्वानामन्वेषणं, विश्लेषणं, व्याख्यानञ्च ऐतिहासिकविधेः प्रयोजनानि। एतेषां तत्त्वानां वर्तमानपरिप्रेक्ष्ये कीदृशी प्रासंगिकता भवितमर्हति विषयेऽस्मिन् विवेचना क्रियते। अस्मिन् विधौ प्रदत्तानां संकलनं, परीक्षणं, वर्गीकरणं मूल्यांकनञ्च कृत्वा स्तरानुगुणं तत्त्वानां प्रकटीकरणं क्रियते।

आधुनिककाले विधिः सम्प्रवर्धितः वर्तते। विधिः समीक्षणपूर्वकं सत्यान्वेषणं करोति। यद्यपि शैक्षिकानुसन्धाता ऐतिहासिकविधिः न प्रयुज्यते तथापि तत्रत्यानां प्रामाणिकतत्त्वानां स्वीकृतसमस्यानां समाधानार्थमुपकरणानि भवितुर्महति। अतः अस्य विधेः ज्ञानं सर्वेषामनुसन्धातृणां कृते आवश्यकम् अस्ति। वॉनडलेनमहोदयानु-सारेण अस्मिन् विधौ पञ्चसोपानानि भवन्ति-

1. समस्यायाः निरूपणम्
2. स्रोत-सामग्रीणां सङ्कलनम्
3. स्रोत-सामग्रीणां समीक्षणम्
4. चराणां वा परिस्थितिनां व्याख्यार्थं परिकल्पनायाः निर्माणम्
5. अनुसन्धानोपलब्धीनां विश्लेषणं निर्वचनं सारांशप्रदर्शनञ्च।

### 3.2.2 प्रयोगात्मविधिः

अयं विधिः सर्वाधिकं व्यावहारिकः वैज्ञानिकश्च मन्यते। अत्र प्रश्नस्याध्ययनावसरे विविधानि तत्त्वानि सन्नियन्त्र्य तत्त्वान्वेषणं क्रियते। अत्र कार्यकारणसंबंधस्य स्थापना भवति। नवीनतथ्यानां, सिद्धान्तानां नियमानां च प्रतिपादने विधिरयं परिष्कृतं, यथार्थपरकः प्रभावशाली च मन्यते। व्यावहारिक-सामाजिकविज्ञाने च विधिरयं प्रयोगशालायां प्रयुक्तविधिरूपेण स्वीक्रियते। वैज्ञानिकप्रयोगशालायां घटनायाः अध्ययनं संपादनं वा नियंत्रितरूपेण भवति तथा च तस्योपरि विभिन्नकारकानां प्रभावस्य अध्ययनं क्रियते। अस्मिन् विधौ प्रयोगचरं परिवर्त्य नियंत्रितपरिस्थितिषु कश्चन परिवेशः काचन् घटना वा कथं किमर्थं च वर्तते यस्य प्रमाणीकरणं क्रियते। घटनानामुपपत्तेः कारणमपि निगद्यन्ते।

### 3.2.3 तुलनात्मककार्य-कारणविधिः

घटनोत्तरानुसन्धानम् एकम् एतादृशानुसन्धानमस्ति यस्मिन् स्वतन्त्रचरः वा एकेनाधिकः स्वतन्त्रचरः पूर्वमेव घटितः आसीत् तथा च संयुक्तप्रेक्षणकार्यम् एकाश्रितचरस्य एकस्य परतन्त्रचरस्य अथवा एकेनाधिकाश्रितचरेषु भवतः सम्भाव्यसम्बन्ध-प्रभावयोश्च अध्ययनं तीव्रगतिना करोति।

### 3.2.4 सह-संबंधप्रविधिः

सह-संबंधप्रविधिः अनुसन्धानस्य महत्त्वपूर्णः विधिः अस्ति। अनेन विधिना कारक-कारणयोश्च अध्ययनं सम्भवति। सह-संबंधविधिः एकः सांख्यिकीयविधिः अस्ति यस्मिन् एकस्य चरस्य प्रभावः अन्येषु चरेषु दृश्यते।

### 3.2.5 एकलाध्ययनविधिः

एकलाध्ययनं एका एतादृशी प्रक्रिया वर्तते यत् सामाजिकजीवनस्य

विभिन्नपक्षाणां विभाजनं तथा च अन्वेषणं करोति। यस्मिन् वैयक्तिकः पारिवारिकः सांस्कृतिकः सार्वभौमिकसामुदायिकविषये वा गहनाध्ययनं भवति।

### 3.2.6 वर्णनात्मकविधिः

वर्णनात्मकानुसन्धाने वर्णनात्मकविधेः प्रयोगो भवति वर्णनात्मकानुसन्धानं यथार्थरूपेण वर्तमानसमये विद्यमानानां परिस्थितीनामध्ययनं कृत्वा 'किमस्ति'? प्रश्नस्यास्य उत्तरं प्रदत्तम्। सर्वेक्षणं घटनोत्तरमध्ययनम्, इकाई-अध्ययनम् इति कस्यचित् प्रमुखस्य वर्णनात्मकमनुसन्धानस्य विधयः सन्ति। अध्ययनस्यास्य विषय-वस्तु वर्तमानपरिस्थित्यनुकूलतया तस्याः प्राप्ता सूचनाऽपि भवति।

### 3.2.7 सर्वेक्षणविधिः

अयं वर्णनात्मकानुसंधानस्य एकः प्रचलितः प्रकारोऽस्ति। अत्र तु अनुसंधात्र्या स्व-अनुसन्धानविषयस्य प्रकृतेः, अनुसंधानस्य प्रकारस्य, क्षेत्रस्य चावश्यकतानुसारं सर्वेक्षणविधेः प्रयोगः विहितः। अयं वर्णनात्मकानुसंधानस्य एकः प्रचलितः प्रकारोऽस्ति। यद्यपि अनुसंधाने सर्वे प्रविधयः स्वमहत्त्वपूर्णं स्थानं प्राप्नुवन्ति, यतोहि अनुसन्धानविषयस्य प्रकृति-क्षेत्रेषु वैविध्यं भवति तथापि शैक्षिकानुसन्धानेषु सर्वेक्षणविधेः प्रयोगमधिकतया भवति। विधेरस्य नार्मेटिवः (Normative), डिस्क्रिप्टिव (Discriptive), सर्वे (Survey) स्टेटस (Status), ट्रेन्ड्स (Trends) इत्यादिनामभिः अभिधीयते।

सामाजिकसर्वेक्षणस्य सम्बन्धे विद्वान्सः मतैक्यं न स्थापयन्ति। सर्वेक्षणं सम्यक् अवलोकनमस्ति, यः वर्तमानेन सम्बन्धितसाक्ष्यान् एकत्रीकरणं प्रति सङ्केतमादधाति। सामान्यसर्वेक्षणविधिः वर्तमाने घटितघटनानां वा परिस्थितिना सह सम्बद्धा भवति। अत एव अस्य स्वरूपं व्यापकं भवति। विधेरस्य प्रमुख-लक्षणं तथ्यस्य विविधपक्षाणां विवरणप्रदानमस्ति। एतादृशस्य अध्ययनस्य पूर्त्यर्थं निहितोद्देश्यम् उपलब्धदशानां प्रकृते अन्वेषणं तात्कालिकदशानां तुलनात्मकाध्ययनं दृष्ट्या मानकानां निर्धारणं विशिष्टघटनयोर्मध्ये विद्यमानसम्बन्धानां निर्धारणं वा। सर्वेक्षणविधिना तत्कालस्थितेः ज्ञानं तत्कालस्थितेः निणर्यं च भवति। सर्वेक्षणविधेः प्रदत्तानां सङ्कलनार्थं समग्रात् सङ्कलितप्रतिदर्शस्याकारः विस्तृतं भवति। व्यक्तेः तुलनां तथ्यानां, परिस्थितीनां गणनानां च प्राथमिकता दीयते। सर्वेक्षणविधिः कस्यापि क्षेत्रस्य, समूहस्य वा संस्थायाः वर्तमानस्थितिज्ञानार्थं, विश्लेषणार्थं,

व्याख्यार्थं वा प्रतिवेदनार्थम् एकः सुनियोजितप्रयासः अस्ति यस्यां प्रश्नावल्यां साक्षात्कारस्य परीक्षणस्य वा माध्यमेन मानवेभ्यः प्रदत्तानां संकलनं क्रियते।

**करलिंगरमहोदयानुसारम्**– 'सर्वेक्षणानुसन्धानः वैज्ञानिकान्वेषणस्य विधिः अस्ति। यस्यान्तर्गते बृहद् वा अल्पाकारस्य समग्रात् चयनितप्रतिदर्शानामाधारेण एतद् प्रायोजनेनेदमध्ययनं क्रियते यत् यस्मात् चराणां विघटनस्यावृत्तिः, तेषां वितरणं, पारस्परिकसम्बद्धानां च निर्धारणं कर्तुं शक्यते।' अनेन महोदयेन अन्यत्र उक्तवान्– ''सर्वेक्षणविधीनां सामाजिकविज्ञानरीतिविधानाय अनेकमहत्त्वपूर्णं योगदानं प्रदत्तम्। अस्य महत्त्वपूर्णयोगदानानि सन्ति। व्यापकरूपेणाध्ययनाय, अनुसन्धानसमस्यायाः विशेषीकरणाय उचितरूपेण पारिभाषीकरणाय तथा च सुचारुरूपेण परिचालनाय योजनानिर्माणम्।'' इमाः घटनाः वस्तुनिष्ठदशा–मान्यता–अभिमता–अभिवृत्ति–मूल्येभ्यः सम्बन्धिताः सन्ति। अस्यां सामान्यरूपेण प्रश्नावल्याः, साक्षात्कारेण, परीक्षणेन, प्रेक्षणमाध्यमेन च विश्लेषणं क्रियते।

**शब्दकोषानुसारेण**– सर्वेक्षणं नाम आलोचनात्मकं परीक्षणम्। यस्योद्देश्यं क्षेत्रविशेषस्य सम्बन्धे यथार्थसूचना प्रदानमस्ति।

**ट्रेवरमहोदयानुसारेण**– सर्वेक्षणविधौ विषयस्य वर्तमानव्यवस्थायाः परिशीलनं विशेषज्ञानसंकलनार्थं क्रियते।

**फेयनचाइन्डमहोदयानुसारेण**– कस्यचित् समुदायस्य संपूर्णजीवनस्य विषये वा जीवनस्य कस्यचित् पक्षस्य विषयं व्यवस्थितं तथ्यसंकलनं तथ्यविश्लेषणञ्च सर्वेक्षणमस्ति।

सर्वेक्षणविधिः समस्यायाः समाधानार्थम् उपयोगभूतानां सूचनानां प्रदानं करोति, वर्तमाने समस्यानां स्वरूपं स्पष्टं करोति, वर्तमाननीतीनां निर्धारणं करोति। विधिरेषः भविष्यस्य विकासक्रमविषये सूचयति अनुसन्धानमुपकरणानां निर्माणे सहायतां करोति तथा च प्रतिदर्शस्योचितचयने सहायतां करोति। अस्मिन् विधौ एकस्मिन् एव समये बहुजनान् प्रति प्रदत्तसङ्कलनं कर्तुं शक्यते।

## 3.3 अनुसन्धानप्रतिदर्शः

अनुसन्धानस्यान्तर्गते 'समग्र' (Whole) व्यक्तिनां, घटनानां, वस्तूनां वा केषांचिद् एतेषां समूहेन सह सम्बद्धं क्रियते यस्मिन् तस्य समूहस्य सर्वे सदस्याः सम्मिलिताः सन्ति। एतद् रूपेण पूर्णगणनाविधि (Complete enumeration

methods or Census) माध्यमेन एकस्मिन् वर्गे समागतानां सर्वेषां घटकानाम् उपघटकानां (इकाईनां) ज्ञानं क्रियते वा ज्ञानाय प्रयासः क्रियते। समग्रस्य एतदवधारणायाः मुख्यः गुणः भवति यद् अध्ययने अस्मिन् प्राप्तपरिणामाः प्रतिनिधिकाः, विशुद्धाः विश्वसनीयाः अपि भवन्ति। अत एवं समग्रात् सम्बन्धिताऽध्ययने त्रुटेः संभावना न भवति। अध्ययनेऽस्मिन् परम्परागतधारायाः अन्तर्गते भारतस्य उत्तरक्षेत्रीयपरम्परागतविश्वविद्यालयनां वा महाविद्यालयानां तथा च आधुनिकधारायाः अन्तर्गते देहल्यां अथ च राष्ट्रीयराजधानीक्षेत्रे (NCR) स्थितस्य आधुनिकमहाविद्यालयानां समग्ररूपेण चयनं कृतम्।

### 3.3.1 अनुसन्धानप्रतिदर्शस्य अवधारणा

संपूर्णसमग्रस्य उपरि अनुसन्धानकार्यस्य संपादनं कठिनकार्यमस्ति। अत एव अनुसन्धानकर्त्ता स्वकीयानुसन्धाने समग्रस्य निश्चितसंख्यायाः केषाञ्चनसदस्यानां वा तत्त्वानां चयनं करोति। एवं प्रकारेण चयनितसंख्यैव प्रतिदर्शः, न्यादर्शः, प्रतिचयनं, निदर्शनं वा नाम्ना अभिधीयते।

गुडहॉटमहोदयानुसारेण– ''एकः प्रतिदर्शः यथानाम्ना एव स्पष्टमस्ति यत् कश्चित् विशालसमग्रस्य एकः लघुप्रतिनिधिः वर्तते।''

करलिंगरमहोदयानुसारम्– ''प्रतिदर्शः अनुसंधानप्रक्रियायां सञ्चालनाय निष्कर्षाणां प्रतिपादनाय च आधारभूतः स्यात्। यः अनुसन्धानकार्यं मितव्ययी अनुसन्धानपरिणामानां शुद्धं च करोति। अतः प्रतिचयनमिदं सम्पूर्णतया प्रणाल्याः पद्धत्याश्चैकमत्यधिकं मूलभूतपक्षमस्ति। यस्मिन् जनसंख्यायाः कियत् केन प्रकारेण च तत्त्वानां चयनं करणीयमस्ति इत्यस्य निर्धारणं क्रियते।''

अतः इदं स्पष्टं यत् प्रतिदर्शचयनं विना अनुसन्धानकार्यस्य सम्यक् सम्पादनं कर्तुं न शक्यते। उक्तपरिभाषाणां विश्लेषणानन्तरं इदं स्पष्टं यत् प्रतिदर्शः संपूर्णसमूहस्य वा समष्टेः गुणानां विशेषतानाञ्च सम्यक् प्रतिनिधित्वं करोति तथा च समष्टि वा संपूर्णजनसंख्याविषये सामान्यीकरणस्याधारं प्रददाति।

### 3.3.2 अनुसन्धानप्रतिदर्शस्य विशेषता

अध्ययनस्य निष्कर्षाः प्रतिदर्शस्योपरि एव आधारिताः सन्ति। प्रतिदर्शाधारित–निष्कर्षाणाम् आधारेण उद्देश्यानुसारं जनसंख्यायाः विषये सामान्यीकरणं क्रियते।

सामान्यीकरणं विश्वसनीयं सम्यक् वा भवेत् एतदर्थं प्रतिदर्शचयनात् पूर्वं प्रतिदर्शस्य निम्नलिखिताः विशेषताः मनसि स्थापनीयम्।

1. समग्रात् ऐकिकानां चयने पक्षपातस्याभावः
2. समग्रस्य विशेषतानां वा गुणानां प्रतिनिधित्वम्।
3. समग्रस्य गुणानां समाहृत्यकरणस्य दृष्ट्या पर्याप्तता।
4. प्रतिदर्शस्य उचिताकारः।
5. ऐकिकानां चयनस्य समानसंभावना।
6. अनुसन्धानस्य उद्देश्यानुरूपम्।

पक्षपातस्याभावस्य तात्पर्यमस्ति अनुसन्धानकर्तुः व्यक्तिगतरुचिः, तस्य पूर्वाग्रहं, व्यक्तिगताकर्षणानां प्रभावेन विना ऐकिकानां वस्तुनिष्ठरूपेण चयनम्। प्रतिनिधित्वसम्बद्धविशेषतायाः तात्पर्यमस्ति समग्रस्य सर्वेषां विशेषतानां वा गुणानां प्रतिदर्शे प्रस्तुतिकरणम्। प्रतिदर्शस्य पर्याप्ततायाः सम्बद्धं तस्याकारेण वर्तते। यदा समग्रं विजातीयकमिति भवति तदा पर्याप्ततादृष्ट्या प्रतिदर्शस्याकारः बृहद् भवति। प्रत्युतः यदा समग्रं सजातीयं भवति तदा प्रतिदर्शस्याकारः लघ्वेव भवति।

### 3.3.3 अनुसन्धानप्रतिदर्शचयनस्य विधयः

प्रतिदर्शचयनस्य अनेकाः विधयः सन्ति। तान् द्वयो वर्गयोः मध्ये विभाजनं कर्तुं शक्यते। प्रथमं सम्भाव्यताधारितविधिः, यस्यान्तर्गते सर्वेषां ऐकिकानां प्रतिदर्शरूपेण चयनस्य सम्भावना भवति। अस्य प्रतिचयनविधेः प्रतिदर्शस्य चयनं यादृच्छिकरूपेण भवति। सम्भाव्यता आधारितप्रतिदर्शचयनस्य विधयः सन्ति– यादृच्छिकप्रतिदर्श-चयनविधिः, स्तरितप्रतिदर्शचयनविधिः, व्यवस्थितप्रतिदर्शचयनविधिः, गुच्छप्रतिदर्श-चयनविधिश्च। द्वितीयः असम्भाव्यताधारितविधिः, यस्यान्तर्गते अनुसन्धानकर्त्ता ऐकिकानां चयनं स्वसौविध्यानुसारं करोति। असम्भाव्यताधारितप्रतिदर्शचयनविधयः सन्ति, अवस्थाप्रतिदर्शचयनविधिः, सुविधा प्रतिदर्शचयनविधिः, सोद्देश्यप्रतिदर्शचयन-विधिः, आनुपातिकप्रतिदर्शचयनविधिः, विमात्मकप्रतिदर्शचयनविधिः, हिमकन्दुक-प्रतिदर्शचयनविधिश्च।

## आरेख ( 3.1 )

### प्रतिदर्शचयनस्य विधयः




### सम्भाव्यप्रतिदर्शचयनविधेः

**1. साधारणयादृच्छिकप्रतिदर्शचयनविधिः**
**(Simple Randon Sampling)**

यस्यान्तर्गते सर्वेषां ऐकिकानां प्रतिदर्शरूपेण चयनस्य सम्भावना समानमेव भवति। अस्मिन् विधौ कस्मादपि भागात् प्रदत्तानां चयनं क्रियते। अस्मिन् कस्यापि भागस्य चयनं भवितुं शक्यते अतः संयोगप्राधान्यमयं विधिः परं ध्यातव्यं यत् चयनितभागः सम्पूर्णभागस्य प्रतिनिधिपूर्णः स्यात्। अस्यान्तर्गते प्रतिदर्शचयनार्थं अधोवर्णितविधीनां प्रयोगः कर्त्तुं शक्यते।

**( क ) लाटरीविधिः (Lottery Method)**- अस्यान्तर्गते समग्रस्य सर्वेषां ऐकिकानां लेखन समानाकारस्य लघुकर्गदखण्डेषु पृथग्रूपेण क्रियते।

सर्वेषां कर्गदखण्डानां मिश्रित्य कमपि व्यक्तिः नेत्रं निमिल्य एकमेकं कृत्वा तेषां कर्गदखण्डानां चयनार्थं प्रयतते। एवं प्रकारेण चयनस्य प्रक्रिया तावत् पर्यन्तं प्रचलति यावत् पर्यन्तं वांछितप्रतिदर्शस्य चयनं न भवति।

**( ख ) यादृच्छसंख्यासारिणीविधिः (Table of Random Number Method)**- विधिरयं वस्तुनिष्ठं व्यवस्थितञ्च प्रतिदर्श चयनस्य समीचीनं माध्यममस्ति। अस्यां सारिण्यां शून्यतः(0) नवपर्यन्तं(९) अङ्कानां कासुचन पंक्तिषु स्तम्भेषु च एतत्प्रकारेण बारम्बारं प्रस्तुतिकरणं भवति यत् विभिन्नेषु पंक्तिषु स्तम्भेषु च दशाणां अङ्कानां आवृत्तिः प्रायः समानेव भवति। अस्यान्तर्गते टिपटमहोदयेन, येट्समहोदयेन, कैण्डलमहोदयेन फिशरमहोदयेन च निर्मितसारिण्याः यथानुसारं प्रयोगः क्रियते। अत्र अयं ध्यातव्यं यत् प्रतिदर्शस्याकारः पूर्वमेव निश्चितं भवेत्।

## 2. स्तरितयादृच्छिकप्रतिदर्शचयनविधिः (Stratified Randon Sampling)

अस्यान्तर्गते समग्रस्य सुस्पष्टेषु स्तरेषु वा उपसमूहेषु विभाजनं कर्तुं शक्यते तथा च सर्वेषु उपसमूहेषु वा स्तरेषु ऐकिकानां (इकाई) चयनस्य समानसंभावनायाः सुनिश्चियमावश्यकं तदा अनुसन्धानकर्त्ता स्तरितयादृच्छिक-प्रतिदर्शयचयनविधयस्य प्रयोगः क्रियते। अस्यां विधौ समग्रस्य आकारः बृहत् भवति। सर्वप्रथमं समग्रं विभिन्नस्तरेषु विभज्यते तद्नन्तरं प्रत्येकस्मात् स्तरात् यादृच्छिकरूपेण पृथक्-पृथक् प्रतिदर्शस्य चयनं क्रियते। समग्रस्य विभिन्नस्तरेषु विभाजनस्याधाराः बहुकारकाः भवन्ति यथा लिंगभेदः, जातिभेदः आर्थिकस्थितिः, सामाजिकस्थितिः, शिक्षा, बौद्धिकस्तरः भौगोलिकस्थितिः इत्यादयश्च। उपयुक्तस्तरस्य समूहस्य वा पारिभाषिकरणनन्तरं प्रतिदर्शे सदस्यानां चयनम् आनुपातिकरूपेण क्रियते। विधिरियम् आनुपातिकप्रतिदर्शचयनविधिः अपि कथ्यते।

## 3. व्यवस्थितप्रतिदर्शचयनविधिः (Systematic Randon Sampling)

व्यवस्थितक्रमबद्धप्रतिदर्शचयनविधिः एतादृशः विधिः अस्ति अस्मिन् यादृच्छिकप्रतिदर्शचयनस्य गुणाः तथा च असंभाव्यताप्रतिदर्शचयनस्य गुणाः अपि भवन्ति। अस्मिन् विधौ समग्रस्य सूचेः निर्माणं क्रियते। निर्मितासु सूचीषु पञ्चम सप्तमो वा संख्यायाः यादृच्छिकरूपेण चयनं कर्तुं शक्यते। ब्लैकचैम्पियन-

महोदयै (1977) उक्तवन्तः यत् एतादृशी प्रतिदर्शचयनपरियोजना विद्यते यत्र यादृच्छिकगुणेन सह असम्भाविता शीलगुणाः भवेयुः, ताः क्रमबद्धप्रतिदर्शचयन-परियोजनाः भवतीति। क्रमबद्धमेव तादृशी प्रक्रिया भवति। अस्यान्तर्गते ऐकिकानां (इकाई) समग्रस्य आकृत्यामानुपातिक-संबन्धः निश्चितो भवति।

## 4. गुच्छप्रतिदर्शचयनविधिः (Cluster Sampling)

सर्वेक्षणानुसन्धाने अस्य प्रयोगः सर्वाधिकं भवति यत्र जनसंख्या बृहदाकारा भवति तस्याः प्रसारः अपरिमितश्च भवति। सर्वप्रथमं गुणं वा विशेषताधारेण समग्रात् केषाञ्चित् ऐकिकानां समूहेन वा गुच्छरूपेण यादृच्छिकतया चयनं क्रियते। पुनश्च तादृश-'इकाई' मध्ये तदतिरिक्त-इकाई-उप-इकाई इत्येषां सङ्केतानाम् आवश्यकतानुसारं चयनं क्रियते। कारलिंगरमहोदयानुसारं गुच्छप्रतिदर्शचयनं यस्य प्रयोगः 'सर्वे' (Survey) इत्यस्मिन् क्षेत्रे क्रियते। 'इकाई' इत्येषां क्रमिक-यादृच्छिक-प्रतिदर्श भवति।

## असम्भाव्यप्रतिदर्शचयनविधेः

1. **अवस्थाप्रतिदर्शचयनविधिः (Stage Sampling)**- विधिरयं गुच्छप्रतिदर्श- चयनविधेः समानमेव अस्ति। अस्यान्तर्गते प्रतिदर्शचयनं विभिन्नावस्थासु क्रियते।

2. **सुविधाप्रतिदर्शचयनविधिः (Convenience Sampling)**- एषा आकस्मिकप्रतिदर्शचयनविधिः (Accidental or Incidental Sampling) अपि उच्यते। अस्मिन् विधेः अनुसन्धानकर्त्ता तान् सर्वान् व्यक्तिन् (एकिकान्) चयनं कृत्वा स्वस्य प्रतिदर्शे समावेशनं करोति ये सुलभतया सरलतया च उपलभ्यन्ते।

3. **नियतांशप्रतिदर्शचयनविधिः (Quota Sampling)**- अस्य अन्तर्गतं अनुसन्धानार्थं चिह्निता जनसंख्या तस्य लक्षणानाम् आधारेण अनेकस्तरयोः विभक्ता भवति अनेकस्तरयोः चिह्निता भवति वा। अनया पद्धत्या समुच्चयस्य केचन लक्षणानि मनसि कृत्वा अनुपातः कोटानिर्णयः वा क्रियते। अनुसन्धानकर्ताः स्वविवेकेन प्रत्येकं स्तरात् अपेक्षितप्रमाणेन एककानां चयनं करोति। एषा पद्धतिः स्तरितनमूनाकरणविधिना सह अत्यन्तं सदृशी अस्ति।

4. **उद्देश्यपूर्णप्रतिदर्शचयनविधिः (Purposive Sampling)**- अस्मिन् प्रतिदर्शे अनुसन्धानकर्ताः प्रतिदर्शरूपेण तान् व्यक्तिं (एकिकान्) चयनं करोति ये जनसंख्यायाः इति सः मन्यते। अस्मिन् अनुसन्धाने समग्रस्य लक्षणस्य सम्पूर्णज्ञानम् आवश्यकं यत् सः स्वविवेकेन तादृशानि ऐकिकानि चयनं कर्तुं शक्नोति ये समग्रस्य प्रतिनिधित्वं कुर्वन्ति येन अनुसन्धानस्य उद्देश्याः पूर्णाः भवितुम् अर्हन्ति।

5. **तुषारपिंडीय/हिमगोलकप्रतिदर्शचयनविधिः (Snowball Sampling)**- इदं प्रतिदर्शचयनं एकः असम्भाविताप्रतिदर्शचयनस्य विधिः अस्ति यस्य उपयोगः अनुसन्धानकर्त्ता व्यक्तिनां मध्ये अनौपचारिक-सामाजिकसम्बन्धानाम् अध्ययनाय करोति। अस्मिन् अनुसन्धानकर्ता प्रथमं तादृशं व्यक्तिं चिनोति यः स्वाध्ययनार्थं योग्यः अस्ति मापदण्डान् पूरयति तथा च अस्य व्यक्तेः साहाय्येन सः अन्येषां तादृशानां व्यक्तीनां चिह्नयति येषां इष्टगुणाः सन्ति ये अनुसन्धानकार्यस्य आवश्यकमापदण्डान् पूरयन्ति। एवं प्रकारेण अनुसन्धानकर्तुः पुरतः एतादृशः समूहः उद्भवति, यस्मात् सः तस्य समूहस्य पूर्वसामाजिकप्रतिमानानाम् (विधिनाम्/ प्रतिमानस्य) विषयेज्ञानम् अधिगच्छति। मूलतः अस्य प्रतिदर्शचयनस्य प्रकृतिः समाजमिति आधारेण भवति। किञ्चित् कठिनं जनसंख्यां प्राप्तुं विशेषतया एषा पद्धतिः उपयोगी भवति।

प्रस्तुताध्ययने परम्परागतधारायाः शिक्षकाणां प्रतिदर्शरूपेण चयनार्थं भारतस्य उत्तरक्षेत्रे स्थितस्थ परम्परागतधारायाः विश्वविद्यालयानां/महाविद्यालयानां चयनं सुविधाचयनविधिमाध्यमेन कृतम्। यस्यान्तर्गते वाराणसीस्थ संपूर्णानन्दसंस्कृत-विश्वविद्यालयस्य, राष्ट्रियसंस्कृतसंस्थानस्य, नवदेहलीस्थश्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्य च चयनं कृतं वर्तते। त्रिषु विश्वविद्यालयेषु शिक्षाशास्त्रीपाठ्यक्रमस्य क्रमशः 50 सेवापूर्वशिक्षकाणां चयनं कृतम्। अस्मिन्नेव प्रकारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां चयनार्थं सुविधाचयनविधिमाध्यमेन देहल्याम् अथ च राष्ट्रीयराजधानीक्षेत्रे स्थितस्थ सम्बन्धितसंस्थायाः चयनं कृतम्। आधुनिकधारायाः सेवापूर्वशिक्षकाणां चयनं पलवलस्थितस्थ जागृति-उच्चशिक्षण-संस्थानम्, पलवलस्थितस्थ एडवांसशिक्षणसंस्थानम् तथा च बल्लभगढ़स्थितस्थ बालाजीशिक्षणसंस्थानम् इत्येषु महाविद्यालयेषु कृतं वर्तते। त्रयाणां महाविद्यालयाणां

चयनं कृत्वा प्रत्येकमहाविद्यालयेषु बी.एड. इति पाठ्यक्रमात् क्रमशः 50 सेवापूर्वशिक्षकाणां चयनं कृतम्। अनेन प्रकारेण परम्परागताधुनिकधारयोः क्रमशः 150 सेवापूर्वशिक्षकाणां चयनं कृतम्। एतस्य विस्तृतवर्णनम् अधोलिखितसारिण्यां (3.1) कृतं वर्तते।

## सारिणी (3.1)

### प्रतिदर्शः

| धारा | विश्वविद्यालयः/महाविद्यालयः | सेवापूर्वशिक्षकानां संख्या |
|---|---|---|
| परंपरागतधारा | I) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली | 50 |
| | II) श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विद्यापीठम् नवदेहली | 50 |
| | III) संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी | 50 |
| आधुनिकधारा | I) बालाजीशिक्षणसंस्थानम्, बल्लभगढ़ | 50 |
| | II) एडवांसशिक्षणसंस्थानम्, पलवल | 50 |
| | III) जागृतिउच्चशिक्षणसंस्थानम्, पलवल | 50 |

परंपरागताधुनिकधारायाः सेवापूर्वशिक्षकाणां चयनार्थं सम्बन्धित-संस्थायाः चयनं कृत्वा एतया संस्थया प्रतिदर्शस्य चयनं सामान्ययादृच्छिकविधिमाध्यमेन कृतम्। अनेन विधिना 150 परम्परागतधारायाः 150 आधुनिकधारायाः शिक्षकाणां शिक्षिकाणाञ्च चयनं कृतं वर्तते। अस्यान्तर्गते शैक्षिकभावात्मकाध्यात्मिकबुद्धेः मापनार्थं परंपरागतधारायाः त्रयस्त्रिंशत्

(33) शिक्षिकाणां सप्तदशाधिकशतम् (117) शिक्षकाणां तथा च आधुनिकधारायाः पञ्चनवति (95) शिक्षिकाणां पञ्चपञ्चाशत् (55) शिक्षकाणां चयनं यादृच्छिकविधेः प्रयोगं कृत्वा अभवत्। प्रतिदर्शस्य आंकिकस्वरूपम् अधोलिखितसारिण्यां (3.2) वर्णितमस्ति।

**सारिणी ( 3.2 )**

**प्रतिदर्शस्य आकार:**

| धारा \ लिङ्ग | स्त्री | पुरुष: | योग: |
|---|---|---|---|
| परंपरागतधाराया: सेवापूर्वशिक्षका: | 33 | 117 | 150 |
| आधुनिकधाराया: सेवापूर्वशिक्षका: | 95 | 55 | 150 |
| **सम्पूर्णयोग:** | | | **300** |

## 3.4 अनुसन्धानोपकरणम्

प्रतिदर्शमाध्यमेन प्रदत्तसङ्कलनार्थं येषां साधनानाम् उपयोगं भवति तानि अनुसन्धानोपकरणानि इत्युच्यते। अध्ययने प्रयुक्तचरानां प्रकृति: प्रतिदर्शस्य विशेषत्वं च चित्ते निधाय प्रदत्तानां संग्रहणार्थमुपकरणानां चयनं क्रियते। प्रस्तुताध्ययने प्रदत्तानां सङ्कलनार्थं येषां साधनानाम् उपयोगम् अभवत् तेषां विस्तृतवर्णनम् अधोलिखितमस्ति।

शैक्षिकबुद्धे: मापनार्थम् एस. के. पाल, के. एस. मिश्रमहोदयाभ्याम् निर्मितोपकरणं प्रयोगो विहितम्। यस्यान्तर्गते षड् उप-परीक्षणानि सन्ति। प्रथमं उप-परीक्षणं शब्दानाम् अर्थनिर्धारणयोग्यतया सह, द्वितीयं उप-परीक्षणं विश्लेषणात्मकचिन्तनेन सह, तृतीयम् उप-परीक्षणं वर्गीकरण-योग्यतया सह, चतुर्थम् उप-परीक्षणं संख्यायोग्यतया सह, पञ्चमे उप-परीक्षणे प्रदत्ता: प्रश्ना: प्रतीकरूपान्तरयोग्यतया सह सम्बद्धा: सन्ति। षष्ठे च उप-परीक्षणे प्रत्येकप्रश्नेषु कथनद्वयं 'क', 'ख' इति एको निष्कर्षश्चेति प्रदत्त: विद्यते। प्रदत्तानामङ्कनञ्च कुन्जी-अनुसारेण कृतम्। अत्र निष्कर्षस्याधारेणैव मूल्याङ्कनं कृतमस्ति। अस्योपकरणस्य विश्वसनीयताया: ज्ञानम् अर्द्ध-विभाजनम् (Split-half) अथ च परीक्षण-पुन:परीक्षणविधि (test-retest) माध्यमेन अभवत्। अर्द्ध-विभाजनं परीक्षणमाध्यमेन विश्वसनीयताया: मानं .95 अथ च परीक्षण-पुन:परीक्षणविधि: माध्यमेन विश्वसनीयतामानं .81 प्राप्तम्। वैधताया: परीक्षणस्य अन्तर्गते निकषसंदर्भितवैधताया: (Criterion related Validity) गणना सामान्यबुद्धि: परीक्षणस्य (TGI) अथ च कैटलमहोदयस्य कल्चरलफेयरबुद्धिपरीक्षणस्य

प्रदत्तानां मध्ये गुणनफल-आघूर्णसह-सम्बन्धगुणांक इत्यस्य ज्ञानस्य च कृते वर्तते। सहसम्बन्धस्य मानं .68 (N=36इत्यार्थं) प्राप्तम्। अस्मिन्नेव विधेः प्रयोगं कृत्वा सर्वेषाम् उप-परीक्षणानां सहसम्बन्धस्य ज्ञानम् अभवत्।

भावात्मकबुद्धेः मापनार्थं स्वनिर्मितमापिन्याः प्रयोगो जातम्। डेनियल-गोलमैनमहोदयेन प्रतिपादितं भावात्मकबुद्धेः पञ्चानाम् आयामानाम् आधारेण भावात्मकबुद्धेः मापनार्थ 'मापिनी' इत्यस्य निर्माणं कृतम्। ते आयामाः सन्ति- आत्माभिज्ञताः, आत्मप्रबन्धनम्, आत्माभिप्रेरणा, तदनुभूतिः, समाजिकदक्षताश्च। प्रत्येकायामस्य मापनार्थ 10-10 कथनानां निर्माणं कृतम्। तदनन्तरं विषयविशेषज्ञानां साहाय्येन सर्वेषामायामानां मापनार्थं क्रमशः 6-6 सार्थककथनानां चयनं कृतम्। एवं प्रकारेण अस्मिन् उपकरणे त्रिंशत् (30) कथनानि समाहृत्य बिन्दुत्रयाणामाधारेण (आम्, नैव, अनिश्चितम्) मापिनी इत्यस्य निर्माणं कृतम्। भावात्मकबुद्धेः मापनार्थं स्वनिर्मितमापिन्याः विश्वसनीयतायाः ज्ञानं परीक्षण-पुनःपरीक्षणविधिमाध्यमेन कृतं वर्तते। एतस्य मानं 0.72 प्राप्तं जातम्। अत एव सहसंबंधः (Co-relation) सार्थकः वर्तते। मापिन्याः वैधतायाः ज्ञानं तार्किकवैधतापरीक्षणमाध्यमेन विषयविशेज्ञानां साहाय्येन च कृतं वर्तते।

आध्यात्मिकबुद्धेः मापनार्थं स्वनिर्मितमापिन्याः प्रयोगो जातः। डेविड बी. किंगमहोदयेन प्रतिपादितम् आध्यात्मिकबुद्धेः चतुरायामेषु (समीक्षात्मकास्तित्व-वादीचिन्तनम्, व्यक्तिगतार्थोत्पादनम्, परात्पराभिज्ञता, चेतनादशाविस्तारः) एकमन्यद् आयामं 'समन्वयात्मकदृष्टौ क्षमतां' योजयित्वा पञ्चायामानामाधारेण आध्यात्मिकबुद्धेः मापनार्थं 'मापिनी' इत्यस्य निर्माणं कृतम्। प्रत्येकायामस्य मापनार्थं 10-10 कथनानां निर्माणं कृतम्। तदन्नतरं विषयविशेषज्ञानां सहाय्येन सर्वेषां आयामानां मापनार्थं क्रमशः 6-6 सार्थककथनानां चयनं कृतम्। एवं प्रकारेण अस्मिन् उपकरणे त्रिंशत् (30) कथनानि समाहृत्य बिन्दुपञ्चानामाधारेण (पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम्) मापिनी इत्यस्य निर्माणं कृतम्। मापिन्याः विश्वसनीयतायाः ज्ञानं परीक्षणेन-पुनः-परीक्षणेन कृतं। एतस्य मानं 0.75 प्राप्तं जातम्। अत एव सहसम्बन्धं (Co-relation) सार्थकं वर्तते। अस्मिन्नपि स्वनिर्मितमापिन्याः वैधतायाः ज्ञानं विषयवस्तु-वैधतापरीक्षणमाध्यमेन विषयविशेषज्ञानां साहाय्येन च कृतं वर्तते।

## 3.5 आधारसामग्रीणां संकलनार्थं सम्प्रत्यात्मकरूपरेखा

अनुसन्धानकर्त्री आधारसामग्रीणां संकलनार्थं त्रयाणां उपकरणानां प्रयोगं कृतवती। शैक्षिकबुद्धेः मापनार्थं सामान्यबुद्धिपरीक्षणस्य (Test of General Intelligence-TGI) प्रयोगं कृतम्। यस्यान्तर्गते षड् परीक्षणानि सन्ति। परीक्षणेऽस्मिन् शिक्षकाः सम्यक् उत्तरस्योपरि ✓ इति अङ्कनं कृत्वा स्वाभिमतं प्रस्तुतवन्तः। यस्याधारेण शैक्षिकबुद्धेः मापनार्थं प्रदत्तानां संकलनमभवत्। भावात्मकबुद्धेः मापनार्थं स्वनिर्मितमापिन्याः प्रयोगः कृतः। अस्यान्तर्गते त्रिषु श्रेणिषु यथा – आम्, नैव, अनिश्चितमन्तर्गते प्राप्तम् अभिमतमाधारेण प्रदत्तानां संकलनं कृतम्। आध्यात्मिकबुद्धेः मापनार्थं स्वनिर्मितमापिन्याः प्रयोगः कृतः। अस्यान्तर्गते पंचश्रेणिषु यथा– पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम् इत्यान्तर्गते प्राप्तम् अभिमतमाधारेण प्रदत्तानां संकलनं कृतम्।

## 3.6 आधारसामग्रीणां विश्लेषणार्थं सम्प्रत्यात्मकरूपरेखा

सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विश्लेषणं मापिकायां प्रदत्तकुन्जी–अनुसारेण कृतम्। अत्र निष्कर्षस्याधारेणैव मूल्याङ्कनं कृतम्। शैक्षिकबुद्धेः विश्लेषणार्थं सर्वप्रथमं प्रयुक्तपरीक्षणे अंकितासु उपपरीक्षणेषु (शब्दार्थः, सादृश्यता, वर्गीकरणम्, अंकश्रेणी, कूटसंकेतनरूपान्तरणम्, न्यायवाक्यम्) प्राप्तावृत्तेः प्रत्येकेषु उपपरीक्षणेषु सर्वासाम् आवृत्तीनां ज्ञानं कृतम्। तदनन्तरं प्रत्येकस्य परीक्षणस्य आवृत्तीं प्रतिशते परिवर्तनम् अभवत्।

भावात्मकबुद्धेः विश्लेषणार्थं कथनस्य अनुक्रियार्थं दत्तानां त्रयाणां बिन्दूनां आम्, नैव, अनिश्चितम् क्रमशः 3, 2, 1, भारांकप्रदानं कृतम्। तदनन्तरं समेकितप्राप्तांकस्य ज्ञानं कृतम्। समेकितप्राप्ताकांनां विस्तारेण पंचसमानवर्गेषु– अतिनिम्नतम्, निम्नतम्, औसतम्, उच्चतम् अथ च उच्चतमम् वर्गेषु विभाजनं कृतम्। ततः परमेतेषां वर्गाणामावृत्तयः ज्ञात्वा एताषां आवृत्तिनां प्रतिशते परिवर्तनं कृतम्। आध्यात्मिकबुद्धेः आधारसामग्रीणां विश्लेषणार्थं सर्वप्रथमं तत्र कथनस्य पंचबिन्दवः सन्ति, ते यथा–पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतं क्रमिकरूपेण तैः 5, 4, 3, 2, 1, भारांकप्रदानं कृतम्। तदनन्तरं समेकितप्राप्ताकानां ज्ञानं कृतम्। समेकितप्राप्ताकानां विस्तारेण पंचसमानवर्गेषु यथा– अतिनिम्नतम्, निम्नतम्, औसतम्, उच्चतम् अथ च उच्चतमम् वर्गेषु विभाजनं कृतं वर्तते। ततः परमेतासाम् वर्गाणामावृत्तयः ज्ञात्वा ताः प्रतिशते

परिवर्तनं कृतम्। प्रस्तुतानुसन्धानाध्ययने शून्यपरिकल्पनानां परीक्षणं टी-परीक्षणं (ज.जमेज) इति सांख्यिकीयविधिमाध्यमेन कृतम्। प्रतिशतानां मध्ये एक-प्रतिदर्शः अथ च द्वि-प्रतिदर्शः टी-परीक्षणमाध्यमेन शून्यपरिकल्पनानां परीक्षणम् अधोवर्णितसूत्रमाध्यमेन कृतम्। एकप्रतिदर्शः द्विप्रतिदर्शश्च टी-परीक्षण इत्यस्य सूत्रम्-

$$t = \frac{P1\text{-}P2}{P1\text{-}P2}$$

$P_1$ = प्रथमसमूहस्य प्रतिदर्शः

$P_2$ = द्वितीयसमूहस्य प्रतिदर्शः

$\sigma P_1 - P_2$ = द्विसमूहयोः प्रतिशतयोः मानकत्रुटिः

एकप्रतिदर्शस्य प्रतिशतयोः अन्तरस्य मानकत्रुटिः (Standered Eror)

$$\sigma P_1 - P_2 = \sqrt{\sigma^2_{P1} + \sigma^2_{P2} - 2r\ \sigma P_1 \sigma P_2}$$

द्विप्रतिदर्शस्य प्रतिशतयोः अन्तरस्य मानकत्रुटिः (Standered Eror)

$$\sigma P_1 - P_2 = \sqrt{PQ} \quad \frac{1}{n1} + \frac{1}{n2}$$

अध्ययनेऽस्मिन् टी-परीक्षणार्थं सांख्यिकीयपरिगणनम् (statistical calculater) इत्यस्य साहाय्येन विश्लेषणमिदं कृतं वर्तते।

♦♦♦

चतुर्थोऽध्यायः

# आधारसामग्रिनां विश्लेषणं निर्वचनञ्च

## 4.1 भूमिका

कस्मिन्नपि अनुसन्धानकार्यस्य सफलता तस्य सम्यक् विश्लेषणस्योपरि आधारितास्ति। एतदर्थम् अनुसन्धानकार्ये प्रदत्तसंकलनान्तरं तेषां सम्यग्रूपेण विश्लेषणं क्रियते। सङ्कलितानां प्रदत्तानां विश्लेषणं कर्तुं प्रदत्तानां सरले बोधमये च रूपे व्यवस्थापनं क्रियते। प्रदत्तव्यवस्थापनान्तर्गतं प्रदत्तान् तेषां समरूपता सादृश्यता च आधारेण केषाञ्चित् क्रमबद्धप्राप्तांकेषु श्रेणीषु वा विभाजनं क्रियते। प्रदत्तव्यवस्थापनस्य इयं प्रक्रिया आधारसामग्रीणां प्रतिपादनं कथ्यते। येन आधारसामग्रीणाम् अर्थपूर्णतायां वृद्धिर्भवति। अनुसन्धानप्रकृत्याधारेण विश्लेषणं भेदद्वयेन सम्भवति। गुणात्मकविश्लेषणं परिमाणात्मकविश्लेषणञ्च। प्रस्तुताऽध्ययने परिमाणात्मकविश्लेषणस्य प्रयोगः कृतः। यस्य प्रयोगः मापिका इत्यादिभिः प्राप्तप्रदत्तानां विश्लेषणाय क्रियते। प्रस्तुतानुसन्धानाऽध्ययने सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः विश्लेषणं चतुर्षु चरणेषु कृतम्। प्रथमे चरणे परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः विश्लेषणात्मकमध्ययनं कृतम्। द्वितीये चरणे आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः विश्लेषणात्मकमध्ययनं कृतम्। तृतीये चरणे परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः तुलनात्मकमध्ययनं कृतम्। चतुर्थे चरणे लिङ्गाधारेणपरम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः तुलनात्मकमध्ययनं कृतम्। अध्ययनस्य विस्तृतविवरणमधोलिखितमस्ति।

## 4.2 परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः विश्लेषणात्मकमध्ययनम् –

परम्परागतधारायाः सेवापूर्वशिक्षकाणा शैक्षिकबुद्धेः विश्लेषणात्मकमध्ययनं

प्रयुक्तपरीक्षणे अङ्कितेषु उपपरीक्षणेषु प्राप्तावृत्त्याधारेण कृतम्। भावात्मकाध्यात्मिक-बुद्ध्योः विश्लेषणात्मकमध्ययनं प्रकारत्रयेण कृतम्। प्रथमं-प्रयुक्तमापिकायां श्रेणिनाम् (आम्, नैव, अनिश्चितम्) आधारेण। द्वितीयं-समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीयं-समेकितप्राप्ताङ्कानां वर्गानामाधारेण। विस्तृतवर्णनम् अधोलिखितेषु बिंदुषु प्रस्तुतम्।

### 4.2.1 परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विश्लेषणात्मकमध्ययनम् -

परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः मापयितुं प्रयुक्तपरीक्षणे अङ्कितेषु प्रत्येकेषु उपपरीक्षणेषु (शब्दार्थः, सादृश्यता, वर्गीकरणम्, अंकश्रेणी, कूटसङ्केतन रूपान्तरणम्, न्यायवाक्यम्) शिक्षकाणां सर्वैः मूलप्राप्ताङ्काः अवज्ञाताः। तदनन्तरं प्रत्येकपरीक्षणेषु मूलप्राप्ताङ्कानां प्रतिशते परिवर्तितम्। एतस्य विस्तृतं वर्णनं सारिण्यान्तर्गते (4.1) वर्णितमस्ति।

**सारिणी (4.1)**

**परंपरागतधारायाः सेवापूर्वशिक्षकाणां**

**शैक्षिकबुद्धेः विविधायामानामाधारेण विवरणम्**

| क्र. सं. | उप-परीक्षणम् | उपपरीक्षणस्य नामानि | मूलप्राप्तांकाः | मूलप्राप्तांकानां प्रतिशतम् |
|---|---|---|---|---|
| 1 | I | शब्दार्थः | 820 | 54.5% |
| 2 | II | सादृश्यता | 974 | 64.9% |
| 3 | III | वर्गीकरणम् | 484 | 32% |
| 4 | IV | अंकश्रेणीः | 1229 | 81.9% |
| 5 | V | कूटसंकेतनरूपान्तरणम् | 904 | 60% |
| 6 | VI | न्यायवाक्यम् | 635 | 42% |

उक्तसारिण्याः (4.1) अवलोकनेन ज्ञायते यद् प्रथमे शब्दार्थः इति उप-परीक्षणे सेवापूर्वशिक्षकाणां प्रतिशतं 54.5%, सादृश्यता इति परीक्षणे 64.9% वर्गीकरणम् इति उप-परीक्षणे 32%, अङ्कश्रेण्यां 81.9%, कूटसंकेतनरूपान्तरणम् इति उप-परीक्षणे 60%, न्यायवाक्ये 42% प्रतिशतं अस्ति। तेषु उप-परीक्षणेषु

सर्वाधिकं प्रतिशतम् अंकश्रेण्याम् अस्ति। अस्य विश्लेषणस्य मूर्तरूपेण विवरणम् अंग्राङ्कितारेखे (4.1) वर्णितमस्ति।

**आरेख (4.1)**
**परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विविधायामानामाधारेण विश्लेषणम्**




उक्तारेखस्य (4.1) अवलोकनेन ज्ञायते यत् परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विविधायामेषु अङ्कश्रेणी इत्यायामे सर्वाधिकं प्रतिशतं तथा च वर्गीकरणम् इत्यायामे अतिनिम्नप्रतिशतं प्राप्तम्। ततः परं क्रमेण सादृश्यता, कूटसंकेतनरूपान्तरणम्, शब्दार्थः तथा च न्यायवाक्यम् इत्यायामेषु अलभत।

### 4.2.2 परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विश्लेषणात्मकध्ययनम्-

परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विश्लेषणात्मकमध्ययनं प्रकारत्रयेण कृतम्। प्रथमं तावद् भावात्मकबुद्धेः मापनाय प्रयुक्तायाः मापिन्याः श्रेणिनाम् (आम्, न, अनिश्चितम्) आधारेण। द्वितीये समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीयेसमेकितप्राप्ताङ्कानां वर्गानामाधारेण। विस्तृतं वर्णनम् अधोलिखितेषु बिन्दुषु प्रस्तुतम्।

क) परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण विवरणम्

परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः मापनाय प्रयुक्तायां मापिकायाम् अङ्कितासु श्रेणीनां (आम्, न, अनिश्चितम्) समेकितप्राप्ताङ्काः ज्ञाताः। तदनन्तरं प्रत्येकस्याः श्रेण्याः समेकितप्राप्ताङ्काः प्रतिशतरूपेण परिवर्तिताः। एतस्य विस्तृतं वर्णनं (4.2) सारिण्यान्तर्गते वर्णितमस्ति।

**सारिणी (4.2)**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण विवरणम्**

| क्र.सं. | प्रयुक्तश्रेण्यः | समेकितप्राप्ताङ्काः | समेकितप्राप्ताङ्कानां प्रतिशतम् |
|---|---|---|---|
| 1 | आम् | 3330 | 74% |
| 2 | न | 469 | 10.4% |
| 3 | अनिश्चितम् | 701 | 15.6% |

उपर्युक्तसारिण्याः अवलोकनेन ज्ञायते यद् आम् इति श्रेण्यां परम्परागत-धारायाः सेवापूर्वशिक्षकाणां प्रतिशतं 74%, न इति श्रेण्यां 10.4%, अनिश्चितम् इति श्रेण्यां च 15.6% अस्ति। तासु श्रेणीषु सर्वाधिकं प्रतिशतम् आम् इति श्रेण्यामस्ति। अस्य विश्लेषणस्य मूर्तरूपेण विवरणम् अग्राङ्कितारेखे (4.2) वर्णितमस्ति।

**आरेख (4.2)**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः श्रेण्याधारेण विवरणम्**



उक्तारेखस्य (4.2) अवलोकनेन ज्ञायते यद् परम्परागतधारायाः सेवापूर्व-शिक्षकाणां भावात्मकबुद्धेः त्रिषु श्रेणीषु आम् इति श्रेण्यां सर्वाधिकं प्रतिशतं परञ्च न इति श्रेण्यां सर्वाधिकं न्यूनं प्रतिशतम् अस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः अनिश्चिता इति श्रेण्याम् आम् इति श्रेण्याः तुलनायां न्यूनं प्रत्युत न इति श्रेण्याः तुलनायाम् अधिकमस्ति।

**ख) परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः समेकित-प्राप्ताङ्कानां प्रतिशताधारेण विश्लेषणात्मकमध्ययनम्**

सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः मापयितुं प्रयुक्तायां मापिकायां पञ्चायामाः इति सन्ति। यथा आत्माभिज्ञता, आत्मप्रबन्धनम्, आत्माभिप्रेरणा, तद्नुभूतिः, सामाजिकदक्षता च। प्रत्येकस्य आयामस्यान्तर्गते प्रत्येकेन सेवापूर्वशिक्षकेण मापिकायाम् अङ्कितासु त्रिषु बिन्दुषु आम्, न, अनिश्चितम् इति श्रेण्यां व्यक्तावृत्त्याधारेण समेकितप्राप्ताङ्कः भाराङ्कश्च 3, 2, 1 इत्यनेन क्रमेण गुणयित्वा ज्ञातः कृतः। ततः परम् एतेषाम् आवृत्तिं ज्ञात्वा अथ च एतासाम् आवृत्तिं प्रतिशतं ज्ञातम्। एतस्य विस्तृतं विवरणं (4.3) सारिण्यान्तर्गते वर्णितमस्ति।

**सारिणी (4.3)**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम्**

| क्र.सं. | आयामाः | समेकितप्राप्ताङ्काः | समेकितप्राप्ताङ्कानां प्रतिशतम् |
|---|---|---|---|
| 1 | आत्माभिज्ञता | 2384 | 88.3% |
| 2 | आत्मप्रबन्धनम् | 2137 | 79% |
| 3 | आत्माभिप्रेरणा | 2428 | 89.9% |
| 4 | तद्नुभूतिः | 2347 | 86.9% |
| 5 | सामाजिकदक्षता | 2320 | 85.9% |

उपर्युक्तसारिण्याः (4.3) अवलोकनेन इदं स्पष्टं ज्ञायते यद् सेवापूर्व-शिक्षकाणां भावात्मकबुद्धेः प्रथमायामे आत्माभिज्ञतायां समेकितप्राप्ताङ्काः 88.3%, द्वितीयायामे आत्मप्रबन्धने 79%, तृतीयायामे आत्माभिप्रेरणायां 89.9%,

चतुर्थायामे तद्नुभूत्यां 86.9% अथ च पञ्चमायामे सामाजिकदक्षतायां 85.9% प्रतिशतं प्राप्तम्। भावात्मकबुद्धेः स्पष्टरूपेण वर्णनार्थम् अधोवर्णितारेखे (4.3) एतेषां सर्वेषां तुलनात्मकं वर्णनं प्रस्तुतं कृतम्–

**आरेख (4.3)**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम्**




उपर्युक्तारेखस्य (4.3) अवलोकनेन ज्ञायते यद् परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः पञ्चायामेषु आत्माभिप्रेरणा इति आयामे सर्वाधिकं प्रतिशतं तथा च आत्मप्रबन्धनम् इति आयामे अतिनिम्नप्रतिशतं प्राप्तम्। सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः पञ्चायामेषु सर्वाधिकप्रतिशतं आत्माभिप्रेरणायां ततः परं क्रमशः आत्माभिज्ञतायां, तद्नुभूत्यां, सामाजिकदक्षतायाञ्च अस्ति।

**ग ) परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः विविधवर्गा-नामाधारेण विश्लेषणात्मकमध्ययनम्**

प्रत्येकेन सेवापूर्वशिक्षकेण मापिकायाम् अङ्कितेषु त्रिषु बिन्दुषु आम् न, अनिश्चितम् इत्यस्यान्तर्गतं व्यक्तावृत्तीनामाधारिकृत्य प्रत्येकस्य वर्गस्य आवृत्तिः भाराङ्कं 3, 2, 1 गुणयित्वा समेकितप्राप्ताङ्कः ज्ञातः कृतः। एतस्य विस्तारः 30-90 इत्यस्य मध्ये अभवत्। विस्तारेण पञ्चसमानवर्गेषु -अतिनिम्नतम्, निम्नतम्, औसतम्, उच्चतम् तथा च उच्चतमम् वर्गेषु विभक्तम्। ततः परमेतेषां वर्गाणामावृत्तयः ज्ञायन्ते। अथ च एतासाम् आवृत्तीनां प्रतिशतमपि ज्ञायते। एतस्य विस्तृतं विवरणम् सारिण्यां (4.4) विद्यन्ते।

**सारिणी ( 4.4 )**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम्**

| क्र.सं. | वर्गनाम | वर्गान्तरम् | आवृत्तयः | आवृत्तेः प्रतिशतम् |
|---|---|---|---|---|
| 1. | उच्चतमम् | 79-90 | 49 | 32.7% |
| 2. | उच्चतम् | 67-78 | 93 | 62% |
| 3. | औसतम् | 55-66 | 07 | 4.6% |
| 4. | निम्नतम् | 43-54 | 01 | 0.7% |
| 5. | अतिनिम्नतम् | 30-42 | 0 | 0% |

उक्तसारिण्याधारेण (4.4) इदं स्पष्टं भवति यद् भावात्मकबुद्धेः अत्युच्चवर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आवृत्तिः 32.7%, उच्चवर्गे 62% एतादृश प्रतिशतरूपेण सन्ति। औसतवर्गे सेवापूर्वशिक्षकाणाम् आवृत्तिः 4.6% प्रतिशतम् अस्ति। निम्न इति वर्गे सेवापूर्वशिक्षकाणाम् आवृत्तिः 0.7% अतिनिम्नवर्गे शिक्षकाणाम् आवृत्तिरेव नास्ति। अत एव एतेषां वर्गे प्रतिशतं शून्यमस्ति। मूर्तरूपेण अस्य विश्लेषणस्य विवरणम् अग्राङ्कितारेखे (4.4) विद्यन्ते।

**आरेख (4.4)**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम्**




उक्तारेखस्य (4.4) अवलोकनेन ज्ञायते यत् परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः उच्चतम् इति वर्गे सर्वाधिकम् अतिनिम्नवर्गे प्रायः न इति प्राप्ता। परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः उच्चतमम् इति वर्गे किञ्चिद् न्यूनम् औसतम् इति वर्गे अत्यल्पमस्ति।

### 4.2.3 परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विश्लेषणात्मकमध्ययनम्

परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विश्लेषणात्मकमध्ययनं त्रिधा कृतम्। प्रथमं- प्रयुक्तमापिकायां श्रेणिनाम् (पूर्णतः सहमतमम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम्) आधारेण। द्वितीयम्- समेकितप्राप्ताङ्कनां प्रतिशताधारेण। तृतीयम्- समेकितप्राप्ताङ्कनां वर्गानाम् आधारेण। विस्तृतवर्णनम् अधोलिखितेषु बिंदुषु प्रस्तुतम्।

### क ) परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विवरणम्

परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिं मापयितुं प्रयुक्तायां मापिकायां अँङ्कितासु श्रेणीनां (पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम्) समेकितप्राप्ताङ्काः ज्ञाताः। तदनन्तरं प्रत्येकस्याः श्रेण्याः समेकितप्राप्ताङ्कान् प्रतिशतरूपेण परिवर्तिताः। एतस्य विस्तृतं विवरणं (4.5) सारिण्यान्तर्गते वर्णितमस्ति।

**सारिणी (4.5)**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विवरणम्**

| क्र.सं. | प्रयुक्तश्रेण्यः | समेकितप्राप्ताङ्काः | समेकित प्राप्ताङ्कानां प्रतिशतम् |
|---|---|---|---|
| 1. | पूर्णतः सहमतम् | 1505 | 33.44% |
| 2. | सहमतम् | 1501 | 33.35% |
| 3. | अनिश्चितम् | 719 | 15.97% |
| 4. | असहमतम् | 476 | 10.57% |
| 5. | पूर्णतः सहमतम् | 299 | 6.64% |

उक्तसारिण्याधारेण (4.5) इदं स्पष्टं भवति यद् आध्यात्मिकबुद्धेः पूर्णतः सहमतम् इति वर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणां 33.44%, सहमतम् इति वर्गे 33.35% एतादृश प्रतिशतरूपेण सन्ति। अनिश्चितम् इतिवर्गे सेवापूर्वशिक्षकाणां 15.97% प्रतिशतम् अस्ति। असहमतम् पूर्णतः असहमतञ्च उभयोः वर्गयोः शिक्षकाणां प्रतिशतः क्रमशः 10.57% अथ च 6.64% अस्ति। मूर्तरूपेण अस्य विश्लेषणस्य विवरणम् अग्राङ्कितारेखे (4.5) विद्यते।

आरेखः ( 4.5 )

**परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विवरणम्**




उक्तारेखस्य अवलोकनेन इदं स्पष्टं भवति यद् परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्रतिशतं पूर्णतः सहमतम् सहमतमञ्चेति श्रेण्योः प्रायः समानमेव सर्वाधिकं च अस्ति। आध्यात्मिकबुद्धेः प्रतिशतं पूर्णतः असहमतम् इति श्रेण्याम् अतिन्यूनमस्ति। आध्यात्मिकबुद्धेः प्रतिशतम् अनिश्चितम् इति श्रेण्यां पूर्णतः सहमतम् सहमतमञ्च उभयोः श्रेण्योः तुलनायां न्यूनं प्रत्युत असहमतम् पूर्णतः असहमतमञ्च द्वयोः श्रेण्योः तुलनायाम् अधिकमस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्रतिशतम् असहमतम् श्रेण्यां पूर्णतः असहमतं श्रेण्याः तुलनायाम् अधिकमस्ति परञ्च पूर्णतः सहमतं सहमतमञ्च द्वयोः श्रेण्योः तुलनायां न्यूनमस्ति।

**ख ) परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकित-प्राप्ताङ्कानां प्रतिशताधारेण विश्लेषणात्मकमध्ययनम्**

सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिं मापयितुं प्रयुक्तायां मापिकायां पञ्चायामाः सन्ति यथा समीक्षात्मकास्तित्ववादिचिन्तनम्, व्यक्तिगतार्थोत्पादनम्,

परात्पराभिज्ञता, चेतनदशाविस्तारः, समन्वयात्मकदृष्टौ क्षमता च। प्रत्येकस्य आयामस्यान्तर्गते प्रत्येकेन सेवापूर्वशिक्षकेण मापिकायाम् अङ्कितेषु पञ्चषु बिन्दुषु यथा पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम् इति श्रेण्यां व्यक्तावृत्त्याधारेण समेकितः प्राप्ताङ्कः भाराङ्कश्च 5, 4, 3, 2, 1 इत्यनेन क्रमेण गुणयित्वा ज्ञातः कृतः। ततः परम् एतेषाम् आवृत्तिं ज्ञात्वा अथ च एतासाम् आवृत्तेः प्रतिशतं ज्ञातम्। एतस्य विस्तृतविवरणं (4.6) सारिण्यान्तर्गते वर्णितमस्ति।

**सारिणी (4.6)**

**परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम्**

| क्र. सं. | आयामाः | समेकितप्राप्ताङ्काः | समेकित-प्राप्ताङ्कानां प्रतिशतम् |
|---|---|---|---|
| 1. | समीक्षात्मकास्तित्ववादी-चिन्तमनम् | 3574 | 79.4% |
| 2. | व्यक्तिगतार्थोत्पादनम् | 3535 | 78.5% |
| 3. | परात्परभिज्ञता | 3331 | 74% |
| 4. | चेतनदशाविस्तारः | 3630 | 80.7% |
| 5. | समन्वयात्मकदृष्टौक्षमता | 2894 | 64.3% |

उक्तसारिण्याः अवलोकनेन इदं स्पष्टं ज्ञायते यद् परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्रथमायामे समीक्षात्मकास्तित्ववादीचिन्तने समेकितप्राप्ताङ्काः 79.4%, द्वितीयायामे व्यक्तिगतार्थोत्पादने 78.5%, तृतीयायामे परात्परभिज्ञतायां 74%, चतुर्थायामे चेतनदशाविस्तारे 80.7% अथ च पंचमायामे समन्वयात्मकदृष्टौ क्षमतायां 64.3% प्रतिशतं प्राप्तम्। आध्यात्मिकबुद्धेः पंचायामानां समेकितप्राप्ताङ्कानां प्रतिशतं स्पष्टरूपेण वर्णनार्थं अग्राङ्कितारेखे (4.6) एतेषां सर्वेषां तुलनात्मकं वर्णनं प्रस्तुतं कृतम्।

### आरेखः (4.6)

### परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विविधायामानां समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम्




उपर्युक्तारेखस्य (4.6) अवलोकनेन ज्ञायते यद् चेतनदशाविस्तारः इति आयामे आध्यात्मिकबुद्धेः सर्वाधिकं प्रतिशतमस्ति। ततः परं क्रमशः समीक्षात्मकास्तित्ववादिचिन्तने व्यक्तिगतार्थोत्पादने, परात्परभिज्ञतायां, अथ च समन्वयात्मकदृष्टौ क्षमतायां च प्रतिशतं प्राप्तम्।

### ग) परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विविधवर्गानामाधारेण विश्लेषणात्मकमध्ययनम्

प्रत्येकेन सेवापूर्वशिक्षकेण मापिकायाम् अङ्कितेषु पञ्चषु बिन्दुषु पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम् अथ च पूर्णतः असहमतम् इत्यास्यान्तर्गतं व्यक्तावृत्तीनामाधारिकृत्य प्रत्येकस्य वर्गस्य आवृत्तिभाराङ्कं 5, 4, 3, 2, 1 गुणयित्वा समेकितप्राप्ताङ्कः ज्ञातः कृतः। एतस्य विस्तारः 30-150 इत्यस्य मध्ये अभवत्। विस्तारेण पञ्चसमानवर्गेषु -अतिनिम्नतम्, निम्नतम्, औसतम्, उच्चतम् तथा च उच्चतमम् वर्गेषु विभक्तम्। ततः परमेतेषां वर्गाणामावृत्तयः ज्ञायन्ते। अथ च एताषाम् आवृत्तिनां प्रतिशतमपि ज्ञायते। एतस्य विस्तृतं विवरणम् (4.7) सारिण्यां विद्यन्ते।

## सारिणी (4.7)

## परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम्

| क्र.सं. | वर्गनामः | वर्गान्तरम् | आवृत्तयः | आवृत्तेः प्रतिशतम् |
|---|---|---|---|---|
| 1. | उच्चतमम् | 127 – 150 | 18 | 12% |
| 2. | उच्चतम् | 103 – 126 | 107 | 71.3% |
| 3. | औसतम् | 79 – 102 | 25 | 16.7% |
| 4. | निम्नतम् | 55 – 78 | 0 | 0% |
| 5. | अतिनिम्नतम् | 33 – 54 | 0 | 0% |

उक्तसारिण्याधारेण (4.7) इदं स्पष्टं भवति यद् आध्यात्मिकबुद्धेः उच्चतमम्-वर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आवृत्तिः 12%, उच्चतम्-वर्गे 71.3% एतादृश प्रतिशतरूपेण विद्यते। औसतवर्गे सेवापूर्वशिक्षकाणाम् आवृत्तिः 16.7% प्रतिशतम् अस्ति। निम्नातिनिम्नवर्गे शिक्षकाणाम् आवृत्तिरेव नास्ति। अत एव एतेषां वर्गानां प्रतिशतं शून्यमस्ति। मूर्तरूपेण अस्य विश्लेषणस्य विवरणम् अग्राङ्कितारेखे (4.7) विद्यते।

## आरेखः (4.7)

## परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्कानां वर्गानामाधारेण विवरणम्



उक्तारेखस्य अवलोकनेन इदं स्पष्टं यद् परम्परागतधारायाः सेवापूर्व-शिक्षकाणाम् आध्यात्मिकबुद्धेः सर्वाधिकप्रतिशतम् उच्चतम् इति वर्गे अस्ति। ततः परं क्रमशः औसतम् उच्चतमम् च वर्गे अस्ति। निम्नातिनिम्नवर्गे प्रायः न इति प्रतिशतं प्राप्तम्।

## 4.3 आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः विश्लेषणात्मकमध्ययनम्

आधुनिकधारायाः सेवापूर्वशिक्षकाणा शैक्षिकबुद्धेः विश्लेषणात्मकम् अध्ययनम् प्रयुक्तपरीक्षणे अङ्कितेषु उपपरीक्षणेषु प्राप्तावृत्त्याधारेण कृतम्। भावात्मकाध्यात्मिक-बुद्ध्योः विश्लेषणात्मकमध्ययनं त्रिधा कृतम्। प्रथमं- प्रयुक्तमापिकायां श्रेणिनाम् (आम्, नैव, अनिश्चितम्) आधारेण। द्वितीयं-समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीयम्- समेकितप्राप्ताङ्कानां वर्गानामाधारेण। विस्तृतं वर्णनम् अधोलिखितेषु बिंदुषु प्रस्तुतम्।

### 4.3.1 आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विश्लेषणात्मकम् अध्ययनम्

आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धिं मापयितुं प्रयुक्तपरीक्षणे अङ्कितेषु उपपरीक्षणेषु (शब्दार्थः, सादृश्यता, वर्गीकरणम्, अंकश्रेणी, कूटसंकेतन-रूपान्तरणम्, न्यायवाक्यम्) प्राप्तावृत्तेः प्रत्येकेषु उपपरीक्षणेषु सर्वाः आवृत्तयः ज्ञाताः। तदनन्तरं प्रत्येकस्य परीक्षणस्य आवृत्तिः प्रतिशते परिवर्तिता भवति। एतस्य विस्तृतं वर्णनं सारिण्यान्तर्गते (4.8) वर्णितमस्ति।

**सारिणी (4.8)**
**आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विविधायामानामाधारेण विवरणम्**

| क्र.सं. | उपपरीक्षणस्य नामानि | मूलप्राप्तांकाः | प्रतिशतम् |
|---|---|---|---|
| 1. | शब्दार्थः | 714 | 47.6% |
| 2. | सादृश्यता | 986 | 65.7% |
| 3. | वर्गीकरणम् | 597 | 39.8% |
| 4. | अंकश्रेणी | 1249 | 83.26% |

| | | | |
|---|---|---|---|
| 5. | कूटसङ्केतनरूपान्तरणम् | 906 | 60.4% |
| 6. | न्यायवाक्यम् | 645 | 36% |

उक्तसारिण्याः (4.8) अवलोकनेन ज्ञायते यद् प्रथमे शब्दार्थः इति उप-परीक्षणे सेवापूर्वशिक्षकाणां प्रतिशतम् 47.6%, सादृश्यता इति परीक्षणे 57%, वर्गीकरणम् इति परीक्षणे 37.86%, अंकश्रेण्यां 72%, कूटसङ्केतनरूपान्तरण इति परीक्षणे 47%, न्यायवाक्ये च 36% प्रतिशतम् अस्ति। तेषु उप-परीक्षणेषु सर्वाधिकं प्रतिशतम् अंकश्रेणी इति परीक्षणे अस्ति। अस्य विश्लेषणस्य मूर्तरूपेण विवरणं अग्राङ्कितारेखे (4.8) वर्णितमस्ति।

**आरेखः ( 4.8 )**

**आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विविधायामानामाधारेण विश्लेषणात्मकम् अध्ययनम्**




उक्तारेखस्य (4.8) अवलोकनेन ज्ञायते यद् आधुनिकधारायाः सेवापूर्व-शिक्षकाणां शैक्षिकबुद्धेः सर्वाधिकं प्रतिशतम् अंकश्रेण्यां प्राप्तम्। न्यायवाक्यम् इति उप-परीक्षणे सर्वाधिकन्यूनं प्रतिशतं प्राप्तम्। पञ्चायामेषु शैक्षिकबुद्धेः प्रतिशतम् अंकश्रेणी, सादृश्यता, कूटसंकेतन रूपान्तरणं, शब्दार्थः, अथ च न्यायवाक्ये क्रमशः अस्ति।

उक्तारेखस्य अवलोकनेन ज्ञायते यत् परम्परागताधुनिकधाराया: सेवापूर्व-शिक्षकेषु परम्परागताधुनिकधाराया: शिक्षकाणां भावात्मकबुद्धे: प्रतिशतम् उच्चतमम् इति वर्गे सर्वाधिकं तस्मिन्नैव परम्परागतधाराया: शिक्षकाणाम् अधिकं प्राप्तम्। प्रत्युत उभयो: धारयो: शिक्षिकाणां भावात्मकबुद्धे: प्रतिशतम् उच्चतम् इति वर्गे सर्वाधिकं तत्र आधुनिकधाराया: शिक्षकाणाम् अधिकमस्ति। उभयो: धारयो: सेवापूवशिक्षकाणां शिक्षिकाणाञ्च भावात्मकबुद्धे: प्रतिशतम् औसतम् इति वर्गे किञ्चिद् न्यूनं निम्नतम् इति वर्गे अत्यल्पम् तथा च अतिनिम्नतम् इति वर्गे प्राय: न इति अलभत।

### 4.5.3 लिङ्गाधारेणपरम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः तुलनात्मकमध्ययनम्-

लिङ्गाधारेण परम्परगताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः तुलनात्मकमध्ययनं प्रकारत्रयेण कृतम्। प्रथमम्- उभयोः धारयोः शिक्षकाणां शिक्षिकाणाञ्च आध्यात्मिकबुद्धिं मापयितुं प्रयुक्तमापिकायां श्रेणीनाम् (पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम्) आधारेण। द्वितीयम्- समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीयम्- समेकितप्राप्ताङ्कानां वर्गानामाधारेण। विस्तृतं वर्णनम् अधोलिखितेषु बिंदुषु प्रदर्शितमस्ति।

### क ) लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण विश्लेषणात्मकमध्ययनम्-

लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः तुलनात्मकमध्ययनार्थम् आध्यात्मिकबुद्धिं मापयितुं प्रयुक्तायां मापिकायाम् अङ्कितासु श्रेणिषु (पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम्) परम्परागताधुनिकधारयोः शिक्षकाणां शिक्षिकाणाञ्च प्रत्येकश्रेणिषु समेकितप्राप्ताङ्काः पृथक्-पृथग् अवज्ञाताः। ततः परमुभयोः वर्गयोः प्रत्येकासु श्रेणिषु समेकितप्राप्ताङ्काः प्रतिशतरूपेण परिवर्तितम्। अस्य विस्तृतं विवरणम् अधोलिखितायां (4.27) सारिण्यामन्तर्गते कृतं वर्तते।

**सारिणी ( 4.27 )**

**लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम्**

| क्र.सं. | प्रयुक्तश्रेण्यः | आधुनिकधारा | | परम्परागतधारा | |
|---|---|---|---|---|---|
| | | शिक्षिकाः (M) | शिक्षिकाः (F) | शिक्षकाः (M) | शिक्षिकाः (F) |
| 1. | पूर्णतः सहमतम् | 38% | 31% | 33% | 34% |
| 2. | सहमतम् | 31% | 34% | 33.96% | 31% |
| 3. | अनिश्चितम् | 15.3% | 18.8% | 15.6% | 17% |
| 4. | असहमतम् | 9.8% | 12.3% | 10.4% | 11.3% |
| 5. | पूर्णतः असहमतम् | 13.5% | 4.5% | 6.8% | 5.95% |

उक्तसारिण्याधारेण इदं स्पष्टं भवति यत् आध्यात्मिकबुद्धेः पूर्णतःसहमतम् इति वर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणां प्रतिशतम् 33% अथ च शिक्षिकाणां प्रतिशतम् 34% अस्ति। आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् 38%, अथ च शिक्षिकाणां 31% प्रतिशतमस्ति। सहमतम् इति वर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् 33.96% अथ च शिक्षिकाणां प्रतिशतम् 31% अस्ति। आधुनिकधारायाः सेवापूर्वशिक्षकाणां प्रतिशतम् 31% अथ च शिक्षिकाणां प्रतिशतम् 34% अस्ति। अनिश्चितम् इति वर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् 15. 6% अथ च शिक्षिकाणां प्रतिशतम् 17% अस्ति। आधुनिकधारायाः सेवापूर्वशिक्षकाणां प्रतिशतम् 15.3% अथ च शिक्षिकाणां प्रतिशतम् 18.8% अस्ति। असहमतम् इति वर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणां प्रतिशतम् 10.4% अथ च शिक्षिकाणां प्रतिशतम् 11.3% अस्ति। आधुनिकधारायाः सेवापूर्वशिक्षकाणां प्रतिशतम् 9.8% अथ च शिक्षिकाणां प्रतिशतम् 12.3% अस्ति। पूर्णतः असहमतम् वर्गे परम्परागतधारायाः सेवापूर्वशिक्षकाणां प्रतिशतम् 6.8% अथ च शिक्षिकाणां प्रतिशतम् 5.95% अस्ति। आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् 13.5% अथ च शिक्षिकाणां प्रतिशतम् 4.5% अस्ति। मूर्तरूपेण अस्य विश्लेषणस्य विवरणम् अग्राङ्कितारेखे (4.27) विद्यते।

### आरेख (4.27)
### लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः श्रेण्याधारेण तुलनात्मकविवरणम्



उक्तारेखस्य (4.27) अवलोकनेन ज्ञायते यत् परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकेषु आधुनिकधारायाः शिक्षकाणाम् अथ च परम्परागतधारायाः शिक्षिकाणाम् आध्यात्मिकबुद्धेः प्रतिशतं पूर्णतः सहमतम् इति श्रेण्यां सर्वाधिकं तत्रैव आधुनिकधारायाः शिक्षकाणाम् अधिकमस्ति। परञ्च आधुनिकधारायाः शिक्षिकाणां परम्परागतधारायाः शिक्षकाणाञ्च आध्यात्मिकबुद्धेः प्रतिशतं सहमतम् इति श्रेण्यां सर्वाधिकं समानमपि अस्ति। उभयोः धारयोः सेवापूर्वशिक्षकेषु आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्रतिशतम् असहमतम् इति श्रेण्याम् अत्यल्पं परञ्च आधुनिकधारायाः सेवापूर्वशिक्षिकाणां तथा च परम्परागतधारायाः शिक्षकाणां शिक्षिकाणाञ्च आध्यात्मिकबुद्धेः प्रतिशतं पूर्णतः असहमतम् इति श्रेण्यां सर्वाधिकन्यूनं प्राप्तम्।

### ख) लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिक बुद्धेः समेकितप्राप्ताङ्काः प्रतिशताधारेण तुलनात्मकमध्ययनम्-

लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च आध्यात्मिकबुद्धिं मापयितुं प्रयुक्तायां मापिकायां पञ्चायामाः सन्ति यथा समीक्षात्मकास्तित्ववादिचिन्तनम्, व्यक्तिगतार्थोत्पादनम्, परात्परभिज्ञता, चेतनदशाविस्तारः, समन्वयात्मकदृष्टौ क्षमता। प्रत्येकस्य आयामस्यान्तर्गते प्रत्येकेन सेवापूर्वशिक्षकेण शिक्षिकया च मापिकायाम् अङ्कितासु पञ्चषु बिन्दुषु यथा पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम्, पूर्णतः असहमतम् इति श्रेण्यां व्यक्तावृत्त्याधारेण समेकितः प्राप्ताङ्कः भाराङ्कश्च 5, 4, 3, 2 ,1 इत्यनेन क्रमेण गुणयित्वा ज्ञातं कृतम्। ततः परं समेकितप्राप्ताङ्कानामाधारेण उभयोः धारयोः शिक्षकाणां शिक्षिकाणाञ्च आवृत्तीं पृथक्-पृथग् ज्ञाताः अथ च एतासाम् आवृत्तीनां प्रतिशतरूपेण परिवर्तितम्। एतस्य विस्तृतं विवरणं (4.28) सारिण्यां वर्णितमस्ति।

## सारिणी ( 4.28 )

**लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्काः प्रतिशताधारेण तुलनात्मकविवरणम्**

| क्र. सं. | आध्यात्मिकबुद्धेः आयामाः | आधुनिकधारायाः | | परम्परागतधारायाः | |
|---|---|---|---|---|---|
| | | शिक्षकाः (M) | शिक्षिकाः (F) | शिक्षकाः (M) | शिक्षिका (F) |
| 1. | समीक्षात्मकास्तित्ववादिचिन्तनम् | 83% | 80% | 79% | 79.9% |
| 2. | व्यक्तिगतार्थोत्पादनम् | 79.5% | 78% | 78% | 80% |
| 3. | परात्परभिज्ञता | 77% | 73.9% | 74% | 72% |
| 4. | चेतनदशाविस्तारः | 83% | 79% | 80.9% | 79.7% |
| 5. | समन्वयात्मकदृष्टौ क्षमता | 64.5% | 62.5% | 64% | 64% |

उक्तसारिण्याः अवलोकनेन इदं ज्ञायते यत् आध्यात्मिकबुद्धेः समीक्षात्मकास्तित्ववादिचिन्तनम् इति आयामे आधुनिकधारायाः सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 83% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 80% अस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 79% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतं 79.9% प्राप्तम्। द्वितीयायामे व्यक्तिगतार्थोत्पादने आधुनिकधारायाः सेवापूर्वशिक्षकाणां समेकित-प्राप्ताङ्कानां प्रतिशतम् 79.5% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 78% अस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 78% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतं 80% प्राप्तम्। तृतीयायामे परात्परभिज्ञतायाम् आधुनिकधारायाः सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 77% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतं 73.9%, परम्परागतधारायाः सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 74% अथ च शिक्षिकाणां समेकितप्राप्ताङ्काः प्रतिशतं 72% प्राप्तम्। चतुर्थायामे चेतनदशाविस्तारे आधुनिक-धारायाः सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 83% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतं 79% अस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 80.9% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतं 79.7% प्राप्तम्। पञ्चमायामे समन्वयात्मकदृष्टौ क्षमतायाम् आधुनिकधारायाः

सेवापूर्वशिक्षकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 64.5% अथ च शिक्षिकाणां समेकितप्राप्ताङ्कानां प्रतिशतम् 64.2% अस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च समेकितप्राप्ताङ्कानां प्रतिशतं समानमेव 64% अस्ति। आध्यात्मिकबुद्धेः पञ्चायामानां पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम् अथ च पूर्णतः असहमतम् श्रेण्यामन्तर्गते लिङ्गाधारेण प्राप्तसमेकितप्राप्ताङ्कानां प्रतिशतं स्पष्टरूपेण वर्णनार्थमअग्राङ्कितारेखे (4.28) एतेषां सर्वेषां तुलनात्मकं वर्णनं प्रदर्शितम्।

**आरेख (4.28)**

**लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः समेकितप्राप्ताङ्कानां प्रतिशताधारेण विवरणम्**




आरेखस्य (4.28) अवलोकनेन ज्ञायते यत् आधुनिकधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च तथा च परम्परागतधारायाः सेवापूर्वशिक्षकाणाम्

आध्यात्मिकबुद्धेः प्रतिशतम् आध्यात्मिकबुद्धेः प्रथमायामे समीक्षात्मकास्तित्व-वादिचिन्तने सर्वाधिकं परञ्च परम्परागतधारायाः सेवापूर्वशिक्षिकाणाम् आध्यात्मिक-बुद्धेः प्रतिशतं द्वितीयायामे व्यक्तिगतार्थोत्पादने सर्वाधिकमस्ति। उभयोः धारयोः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च आध्यात्मिकबुद्धेः प्रतिशतं समन्वयात्मकदृष्टौ क्षमतायां इति आयामे अतिन्यूनं प्राप्तम्।

### ग ) लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः विविधवर्गानामाधारेण तुलनात्मकमध्ययनम्-

लिङ्गाधारेण परम्परागताधुनिकधारयोः प्रत्येकेन सेवापूर्वशिक्षकेण शिक्षिकया च मापिकायाम् अङ्कितेषु पञ्चषु बिन्दुषु पूर्णतः सहमतम्, सहमतम्, अनिश्चितम्, असहमतम् अथ च पूर्णतः असहमतम् इत्यास्यान्तर्गतं व्यक्तावृत्तीनामाधारीकृत्य प्रत्येकं वर्गस्य आवृत्तिः भाराङ्कं 5, 4, 3, 2, 1 गुणयित्वा उभयोः धारयोः शिक्षकाणां शिक्षिकाणाञ्च समेकितप्राप्ताङ्काः सम्प्राप्ताः। एतस्य विस्तारः 30-150 इत्यस्य मध्ये अभवत्। विस्तारेण पञ्चसमानवर्गेषु-अतिनिम्नम्, निम्नम्, औसतम्, उच्चात्युच्चतमम् वर्गेषु विभक्तम्। ततः परमुभयोः धारयोः शिक्षकाणां शिक्षिकाणाञ्च वर्गानामावृत्तयः ज्ञायन्ते। अथ च एताषाम् आवृत्तीनां प्रतिशतमपि ज्ञायते। एतस्य विस्तृतं विवरणम् (4.29) सारिण्यां विद्यते।

**सारिणी ( 4.29 )**

**लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्राप्तावृत्तिनां प्रतिशतानां तुलनात्मकविवरणम्**

| क्र. सं. | वर्गनामः | वर्गान्तरम् | आधुनिकधारा | | परम्परागतधारा | |
|---|---|---|---|---|---|---|
| | | | शिक्षकः (M) | शिक्षिकाः (F) | शिक्षकः (M) | शिक्षिका (F) |
| 1. | उच्चतमम् | 127-150 | 18% | 11.6% | 11% | 15% |
| 2. | उच्चतम् | 103-126 | 78% | 65% | 73.5% | 63.6% |
| 3. | औसतम् | 79-102 | 3.6% | 23% | 15% | 21% |
| 4. | निम्नतम् | 55-78 | 0% | 0% | 0% | 0% |
| 5. | अतिनिम्नतम् | 33-54 | 0% | 0% | 0% | 0% |

उक्तसारिण्या ज्ञायते यद् उच्चतमम् इति वर्गे आधुनिकधारायाः सेवापूर्व-शिक्षकाणामावृत्तिः 18% अथ च शिक्षिकाणामावृत्तिः 11.6% अस्ति। परम्परागत-धारायाः सेवापूर्वशिक्षकाणामावृत्तिः 11% अथ च शिक्षिकाणाम् आवृत्तिः 15% अस्ति। उच्चतम् इति वर्गे आधुनिकधारायाः सेवापूर्वशिक्षकाणामावृत्तिः 78% अथ च शिक्षिकाणामावृत्तिः 65% अस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणामा-वृत्तिः 73.5% अथ च शिक्षिकाणामावृत्तिः 63.6% अस्ति। औसतम् इति वर्गे आधुनिकधारायाः सेवापूर्वशिक्षकाणामावृत्तिः 3.6% अथ च शिक्षिकाणामावृत्तिः 23% अस्ति। परम्परागतधाराया सेवापूर्वशिक्षकाणामावृत्तिः 15% अथ च शिक्षिकाणामावृत्तिः 21% अस्ति। निम्नातिनिम्नवर्गे उभयोः धारयोः शिक्षकाणाम् अथ च शिक्षिकाणामावृत्तिः शून्यमेव सन्ति। अस्य विलेषणस्य मूर्तरूपेण विवरणम् अग्राङ्कितारेखे (4.29) वर्तते।

## आरेख (4.29)
## परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्राप्तावृत्तीनां प्रतिशतानां तुलनात्मकविवरणम्




उक्तारेखस्य (4.29) अवलोकनेन ज्ञायते यत् परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च आध्यात्मिकबुद्धेः प्रतिशतस्य प्राप्तिः उच्चतम् इति वर्गे सर्वाधिकम् औसतम् इति वर्गे किञ्चिद् न्यूनम् उच्चतमम् इति वर्गे अत्यल्पमस्ति। परञ्च आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धेः प्रतिशतम् उच्चतम् इति वर्गे सर्वाधिकम् उच्चतमम् इति वर्गे किञ्चिद् न्यूनम् औसतम् इति वर्गे अत्यल्पम् प्राप्तम्।

### 4.5.4 लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः तुलनात्मकमध्ययनम्।

लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च शैक्षिकभावात्मकाध्यात्मिकबुद्धिं मापयितुं प्रयुक्तायां मापिकायां प्रत्येकस्य आयामस्यान्तर्गते प्रत्येकेन सेवापूर्वशिक्षकेण शिक्षिकया च व्यक्तावृत्तीनां भाराङ्कं प्रदानं कृत्वा समेकितः प्राप्ताङ्कः ज्ञातः। ततः परं समेकितप्राप्ताङ्कानामाधारेण उभयोः धारयोः शिक्षकाणां शिक्षिकाणाञ्च शैक्षिकभावात्मकाध्यात्मिकबुद्धेः आवृत्तिः पृथक्-पृथग् ज्ञाता अथ च एतासाम् आवृत्तीनां प्रतिशतरूपेण परिवर्तितम्। एतस्य विस्तृतं विवरणं सारिण्यामन्तर्गते (4.30) वर्णितमस्ति।

**सारिणी (4.30)**

**लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः समेकितप्राप्ताङ्काः प्रतिशतानां तुलनात्मकविवरणम्**

| शिक्षकधारा | शैक्षिकबुद्धि | | भावात्मकबुद्धि | | आध्यात्मिकबुद्धिः | |
|---|---|---|---|---|---|---|
| | शिक्षकः (M) | शिक्षिकाः (F) | शिक्षिकाः (M) | शिक्षिकाः (F) | शिक्षकः (M) | शिक्षिकाः (F) |
| परम्परागतधारा | 56.42% | 54.85% | 85.97% | 86.33% | 75.43% | 75.25% |
| आधुनिकधारा | 60.45% | 54.42% | 84.84% | 85.13% | 75.53% | 74.75% |

उक्तसारिण्या ज्ञायते यत् शैक्षिकबुद्धेः परम्परागतधारायाः शिक्षकाणामावृत्तिः 56% अथ च शिक्षिकाणामावृत्तिः 54% अस्ति। आधुनिक- धारायाः शिक्षकाणामावृत्तिः 60% अथ च शिक्षिकाणामावृत्तिः 54% अस्ति। भावात्मकबुद्धेः परम्परागतधारायाः शिक्षकाणामावृत्तिः 85.90%, शिक्षिकाणामावृत्तिः 86% अथ च आधुनिकधारायाः शिक्षकाणामावृत्तिः 71.9%, शिक्षिकाणामावृत्तिः 85% अस्ति। आध्यात्मिकबुद्धेः परम्परागतधारायाः शिक्षकाणां शिक्षिकाणाञ्च आवृत्तिः समानमेव 75%, अथ च आधुनिकधारायाः शिक्षकाणामावृत्तिः 77.50%, शिक्षिकाणामावृत्तिः 74% अस्ति। अस्मिन् विवरणे इयमपि ज्ञायते यत् शैक्षिकबुद्धेः परम्परागताधुनिकधारयोः शिक्षकाणाम् आवृत्तिः क्रमशः 56% अथ च 60% अस्ति। अस्मिन् एव बुद्धेः परम्परागताधुनिकधारयोः शिक्षिकाणामावृत्तिः समानमेव 54% अस्ति। भावात्मकबुद्धेः

परम्परागताधुनिकधारयोः शिक्षकाणाम् आवृत्तिः क्रमशः 85.9% अथ च 71.9% अस्ति। अस्मिन् एव बुद्धेः परम्परागताधुनिकधारयोः शिक्षिकाणामावृत्तिः क्रमशः 86% अथ च 85% अस्ति। आध्यात्मिकबुद्धेः परम्परागताधुनिकधारयोः शिक्षकाणाम् आवृत्तिः क्रमशः 75%, 77.50% तथा च परम्परागताधुनिकधारयोः शिक्षिकाणामावृत्तिः क्रमशः 75% अथ च 74% अस्ति। अस्य विलेषणस्य मूर्तरूपेण विवरणम् अग्राङ्कितारेखे (4.30) वर्तते।

## आरेख (4.30)

## लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः तुलनात्मकविवरणम्




उक्तारेखस्य अवलोकनेन ज्ञायते यत् परम्परागताधुनिकधारयोः सेवापूर्व-शिक्षकेषु आधुनिकधारायाः शिक्षकाणां शैक्षिकबुद्धेः प्रतिशतं परम्परागतधारायाः शिक्षकाणां शैक्षिकबुद्धेः तुलनायाम् अधिकं प्राप्तम्। परञ्च उभयोः धारयोः सेवापूर्वशिक्षिकाणां शैक्षिकबुद्धेः प्रतिशतं समानं शिक्षकाणां शैक्षिकबुद्धेः तुलनायां न्यूनमस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च भावात्मकबुद्धेः प्रतिशतस्य प्राप्तिः आधुनिकधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च भावात्मकबुद्धेः तुलनायाम् अधिकमस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च भावात्मकबुद्धेः प्रतिशतं प्रायः समानमेव दृष्टम्। परञ्च आधुनिकधारायाः शिक्षिकाणां

भावात्मकबुद्धिः शिक्षकाणां भावात्मकबुद्ध्योर्मध्ये अतिन्यूनम् अन्तरं दृष्टम्। परम्परागतधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च आध्यात्मिकबुद्धेः प्रतिशतं समानं प्राप्तम्। परञ्च आधुनिकधारायाः शिक्षकाणाम् आध्यात्मिकबुद्धेः प्रतिशतं शिक्षिकाणाम् आध्यात्मिकबुद्धेः तुलनायाम् अधिकमस्ति।

## 4.6 अनुसन्धानस्य परिकल्पनापरीक्षणम्

प्रस्तुतअनुसन्धानाध्ययने परिणामानां परीक्षणार्थं षड् शून्यपरिकल्पनानां निरूपणं कृतम्। एतासां परिकल्पनानां परीक्षणं टी-परीक्षणम् (t-test) इति सांख्यिकीयविधिमाध्यमेन कृतम्। प्रतिशतानां मध्ये एक-प्रतिदर्शः अथ च द्वि-प्रतिदर्शः टी-परीक्षणं सांख्यिकीयविधिमाध्यमेन सार्थकतापरीक्षणं कृतम्। सांख्यिकीयपरिगणनम् (statistical calculator) इत्यस्य साहाय्येन विश्लेषणमिदं कृतं वर्तते।

### शून्यपरिकल्पना-1

**परम्परागताधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिक-बुद्धिषु विशेषो भेदो नास्ति।**

अत्र प्रतिशतयोर्मध्ये एकप्रतिदर्शः टी-परीक्षणसांख्यिकीयविधेः प्रयोगः कृतः। परीक्षणेऽस्मिन् परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिका-भावात्मिका, भावात्मिका-आध्यात्मिका, शैक्षिका-आध्यात्मिकेति बुद्धीनां प्राप्तप्रतिशतानां मध्ये च टी-मानम् इत्यस्य गणना कृता। एतस्याः विस्तृतं विवरणं (4.31) सारिण्यामन्तर्गतं वर्णितमस्ति।

अग्राङ्कितसारिण्याः (4.31) अवलोकनेन इदं ज्ञायते यद् परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकञ्च बुद्ध्योः प्रतिशतयोर्मध्ये प्रेक्षितभेदः उभयोः स्तरयोः (0.05=1.98, 0.01=2.61)सार्थकः तथा च निरूपितशून्यपरिकल्पना अस्वीकृता। तात्पर्यमिद यद् परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मक-बुद्ध्योः सार्थकः भेदः वर्तते। अस्मिनेव क्रमे भावात्मकाध्यात्मिकबुद्ध्योः प्रेक्षितभेदः असार्थकः शून्यपरिकल्पना उभयोः स्तरयोः (0.05स्तरे तथा च 0.01स्तरे) स्वीकृता च। तात्पर्यमियं यद् परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकाध्यात्मिकबुद्धी प्रायः समाना एव अस्ति। अन्ते परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकाध्यात्मिकबुद्ध्योः प्राप्तं टी-मानं सारिणीमानाद् 0.05

स्तरे अधिकं परञ्च 0.01 स्तरे न्यूनमस्ति। अत एव 0.05 स्तरे शून्यपरिकल्पना अस्वीकृता तथा च 0.01 स्तरे परिकल्पनामियं स्वीकृता। परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकाध्यात्मिकबुद्ध्योः प्रतिशतयोर्मध्ये प्रेक्षितभेदः 0.05 सार्थकतास्तरे सार्थकः अस्ति, अत एव शून्यपरिकल्पना अस्वीकृता। परञ्च 0. 01 सार्थकतास्तरे असार्थकः अस्ति, अत एव शून्यपरिकल्पना स्वीकृता। अत्र वैकल्पिकपरिकल्पना अस्वीकृता।

**सारिणी (4.31)**

**परम्परागताधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम्**

| क्र.सं. | विशिष्टबुद्धयः | मध्यमानम (M) | प्रतिशतम (P) | संपूर्णसंख्या (N) | टी-मानम(t -value) | मुक्तांशः (df= N-1) | टी-सारिणीमानम | निर्णयः |
|---|---|---|---|---|---|---|---|---|
| 1 | शैक्षिकी | 33.33 | $P_1$= 55.55% | 150 | 3.25 | 149 | 0.05स्तरे =1.98<br>0.01स्तरे =2.61 | भेदः सार्थकः, शून्यपरिकल्पना अस्वीकृता |
| | भावात्मिका | 77.44 | $P_2$= 86.04% | | | | | |
| 2 | भावात्मिका | 77.44 | $P_2$= 86.04% | 150 | 1.04 | | | भेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | आध्यात्मिका | 112.99 | $P_3$= 75.33% | | | | | |
| 3 | शैक्षिकी | 33.33 | $P_1$= 55.55% | 150 | 2.15 | | | 0.05स्तरे भेदः सार्थकः, शून्यपरिकल्पना अस्वीकृता 0.01स्तरे असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | आध्यात्मिका | 112.99 | $P_3$= 75.33% | | | | | |

**शून्यपरिकल्पना-2:**

**आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिक-बुद्धिषु विशेषो भेदो नास्ति।**

अत्र प्रतिशतयोर्मध्ये एकप्रतिदर्शः टी-परीक्षणसांख्यिकीयविधेः प्रयोगः कृतः। परीक्षणेऽस्मिन् आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकाभावात्मिका, भावात्मिका-आध्यात्मिका, शैक्षिका-आध्यात्मिका बुद्धीनां प्राप्तप्रतिशतानां मध्ये

टी-मानम् इत्यस्य गणना कृता। एतस्य विस्तृतं विवरणं (4.32) सारिण्यामन्तर्गते वर्णितमस्ति।

## सारिणी (4.32)

## आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम्

| क्र.सं. | विविधबुद्धयः | मध्यमानम् (M) | प्रतिशतम् (P) | संपूर्णसंख्या (N) | टी-मानम् (t-value) | मुक्तांशः (d=f N-1) | टी-सारिणीमानम् | निर्णयः |
|---|---|---|---|---|---|---|---|---|
| 1 | शैक्षिकी | 33.49 | $P_1$= 55.81% | 150 | 3.11 | 149 | 0.05स्तरे =1.98 0.01स्तरे =2.61 | प्रेक्षितभेदः सार्थकः, शून्यपरिकल्पना अस्वीकृता |
| | भावात्मिका | 76.52 | $P_2$= 85.03% | | | | | |
| 2 | भावात्मिका | 76.52 | $P_2$= 85.03% | 150 | 0.897 | | | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | आध्यात्मिका | 113.65 | $P_3$= 75.77% | | | | | |
| 3 | शैक्षिकी | 33.49 | $P_1$= 55.81% | 150 | 2.16 | | | 0.05स्तरे भेदः सार्थकः, शून्यपरिकल्पना अस्वीकृता 0.01स्तरे असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | आध्यात्मिका | 113.65 | $P_3$= 75.77% | | | | | |

उक्तसारिण्याः (4.32) अवलोकनेन इदं ज्ञायते यद् आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकञ्च बुद्ध्योः प्रतिशतयोर्मध्ये प्रेक्षितभेदः उभयोः स्तरयोः (0.05=1.98, 0.01=2.61) सार्थकः तथा च निरूपितशून्यपरिकल्पना अस्वीकृता। तात्पर्यमिद यद् परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मक-बुद्ध्योर्मध्ये सार्थकः भेदः वर्तते। अस्मिनेव क्रमे भावात्मकाध्यात्मिकबुद्ध्योः प्रेक्षितभेदः असार्थकः शून्यपरिकल्पना उभयोः स्तरयोः (0.05स्तरे तथा च 0.01 स्तरे) स्वीकृता च। तात्पर्यमिदं यद् आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकाध्यात्मिकबुद्धी प्रायः समाना एव अस्ति। अन्ते आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकाध्यात्मिकबुद्ध्योः प्राप्तं टी-मानं सारिणीमानाद् 0.05 स्तरे अधिकं परञ्च 0.01 स्तरे न्यूनमस्ति। अत एवं 0.05 स्तरे शून्यपरिकल्पना अस्वीकृता तथा च 0.01 स्तरे परिकल्पनामिदं स्वीकृता। आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकाध्यात्मिकबुद्ध्योः प्रतिशतयोर्मध्ये प्रेक्षितभेदः 0.05 सार्थकतास्तरे सार्थकः अस्ति, अत एव शून्यपरिकल्पना अस्वीकृता। परञ्च 0.01 सार्थकतास्तरे असार्थकः अस्ति। अत एव शून्यपरिकल्पना स्वीकृता वैकल्पिकपरिकल्पना अस्वीकृता च।

**शून्यपरिकल्पना–3**

**परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।**

एतदर्थं प्रतिशतयोर्मध्ये द्वि–प्रतिदर्शः टी–परीक्षणसांख्यिकीयविधेः प्रयोगः कृतः। परीक्षणेऽस्मिन् लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः प्राप्तप्रतिशतानां मध्ये टी–मानम् इत्यस्य गणना कृता। एतस्य विस्तृतं विवरणं (4.33) सारिण्यामन्तर्गते वर्णितमस्ति।

## सारिणी (4.33)

## परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम्

| क्र.सं. | विभिन्नबुद्धयः | समूहः | मध्यमानम् (M) | प्रतिशतम् (P) | संपूर्णसंख्या (N) | टी-मानम् (t-value) | मुक्तांशः (df= $n_1 + n_2 - 2$) | टी-सारिणीमानम् | निष्कर्षः |
|---|---|---|---|---|---|---|---|---|---|
| 1 | शैक्षिकी | परंपरागत | 33.33 | $P_1$= 55.55% | 150 | 0.052 | 298 | 0.05स्तरे =1.98<br>0.01स्तरे =2.61 | प्रेक्षितभेदः असार्थकः अतः शून्यपरिकल्पना स्वीकृता |
| | | आधुनिक | 33.49 | $P_2$= 55.85% | 150 | | | | |
| 2 | भावात्मिका | परंपरागत | 77.44 | $P_2$= 86.04% | 150 | 0.249 | | | प्रेक्षितभेदः असार्थकः अतः शून्यपरिकल्पना स्वीकृता |
| | | आधुनिक | 76.52 | $P_2$= 85.03 | 150 | | | | |
| 3 | आध्यात्मिका | परंपरागत | 112.99 | $P_1$= 75.33% | 150 | 0.089 | | | प्रेक्षितभेदः असार्थकः अतः शून्यपरिकल्पना स्वीकृता |
| | | आधुनिक | 113.65 | $P_2$= 75.77% | 150 | | | | |

उपर्युक्तसारिण्या (4.33) इदं ज्ञायते यद् परंपरागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकी–भावात्मिका, भावात्मिका–आध्यात्मिकी अथ च शैक्षिकी–आध्यात्मिका एतासां बुद्धीनां प्रतिशतानां मध्ये प्रेक्षितभेदः उभयोः स्तरयोः (0.05=1.98, 0.01=2.61) असार्थकः अस्ति तथा च शून्यपरिकल्पना स्वीकृता वैकल्पिकपरिकल्पना अस्वीकृता च। तात्पर्यमिदं यद् परंपगताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिक–भावात्मक, भावात्मका–आध्यात्मिक अथ च शैक्षिका–आध्यात्मिका बुद्धिषु भेदो नास्ति।

**शून्यपरिकल्पना-4**

**लिङ्गाधारेण परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।**

अत्र प्रतिशतयोर्मध्ये द्वि-प्रतिदर्शः टी-परीक्षणसांख्यिकीयविधेः प्रयोगः कृतः। परीक्षणेऽस्मिन् परम्परागताधारायाः सेवापूर्वशिक्षकाणाम् अथ च शिक्षिकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः प्राप्तप्रतिशतानां मध्ये टी-मानम् इत्यस्य गणना कृता। एतस्य विस्तृतं विवरणं (4.34) सारिण्यामन्तर्गते वर्णितमस्ति।

**सारिणी (4.34)**

**लिङ्गाधारेण परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम्**

| क्र.सं. | विविधबुद्धयः | लिङ्गम् | मध्यमानम् (M) | प्रतिशतम् (P) | संपूर्णसंख्या (N) | टी-मानम् (t-value) | मुक्तांशः (df= $n_1 + n_2 - 2$) | टी-सारिणीमानम् | निर्णयः |
|---|---|---|---|---|---|---|---|---|---|
| 1 | शैक्षिकी | M | 33.85 | 56.42% | 117 | 0.160 | 148 | 0.05स्तरे =1.98<br>0.01स्तरे =2.61 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | F | 32.91 | 54.85% | 33 | | | | |
| 2 | भावात्मिका | M | 77.37 | 85.97% | 117 | 0.051 | 148 | | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | F | 77.70 | 86.33% | 33 | | | | |
| 3 | आध्यात्मिका | M | 113.15 | 75.43% | 117 | 0.021 | 148 | | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | F | 112.88 | 75.25% | 33 | | | | |

अग्राङ्कितसारिण्या (4.34) इदं ज्ञायते यद् लिङ्गाधारेण परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकञ्च एतासां बुद्धीनां प्रतिशतानां मध्ये प्रेक्षितभेदः उभयोः स्तरयोः (0.05=1.98, 0.01=2.61) असार्थकः अस्ति तथा च शून्यपरिकल्पना स्वीकृता। तात्पर्यमिदं यद् लिङ्गाधारेण परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकञ्च बुद्धिषु भेदो नास्ति।

**शून्यपरिकल्पना-5**

**लिङ्गाधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।**

अत्र प्रतिशतयोर्मध्ये द्वि-प्रतिदर्शः टी-परीक्षणसांख्यिकीयविधेः प्रयोगः कृतः। परीक्षणेऽस्मिन् आधुनिकधारायाः सेवापूर्वशिक्षकाणां अथ च शिक्षिकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः प्राप्तप्रतिशतानां मध्ये टी-मानम् इत्यस्य गणना कृता। एतस्य विस्तृतं विवरणं (4.35) सारिण्यामन्तर्गते वर्णितमस्ति।

**सारिणी (4.35)**

**लिङ्गाधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धीनां प्रतिशतानां मध्ये सार्थकतापरीक्षणम्**

| क्र.सं. | विविधबुद्धयः | लिङ्गम् | मध्यमानम् (M) | प्रतिशतम् (P) | संपूर्णसंख्या (N) | टी-मानम् (t-value) | मुक्तांशः (df= $n_1 + n_2 - 2$) | टी-सारिणीमानम् | निर्णयः |
|---|---|---|---|---|---|---|---|---|---|
| 1 | शैक्षिकी | M | 36.27 | 60.45% | 55 | 0.718 | 148 | 0.05स्तरे =1.98<br>0.01स्तरे =2.61 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | F | 32.65 | 54.42% | 95 | | | | |
| 2 | भावात्मिका | M | 76.36 | 84.84% | 55 | 0.048 | 148 | | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | F | 76.62 | 85.13% | 95 | | | | |
| 3 | आध्यात्मिका | M | 116.29 | 75.53% | 55 | 0.106 | 148 | | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | F | 112.13 | 74.75% | 95 | | | | |

उक्तसारिण्या (4.35) इदं ज्ञायते यद् लिङ्गाधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकञ्च एतासां बुद्धीनां प्रतिशतानां मध्ये प्रेक्षितभेदः उभयोः स्तरयोः (0.05=1.98, 0.01=2.61) असार्थकः अस्ति तथा च शून्यपरिकल्पना स्वीकृता वैकल्पिकपरिकल्पना अस्वीकृता च। तात्पर्यमिदं यद् लिङ्गाधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकञ्च बुद्धिषु भेदो नास्ति।

**शून्यपरिकल्पना-6**

**लिङ्गाधारेण परम्परागताधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिकबुद्धिषु विशेषो भेदो नास्ति।**

अत्र प्रतिशतयोर्मध्ये द्वि-प्रतिदर्शः टी-परीक्षणसांख्यिकीयविधेः प्रयोगः

कृतः। परीक्षणेऽस्मिन् आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् अथ च शिक्षिकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः प्राप्तप्रतिशतानां मध्ये टी–मानम् इत्यस्य गणना कृता। एतस्य विस्तृतं विवरणं (4.36) सारिण्यामन्तर्गते वर्णितमस्ति।

अग्राङ्किकतसारिण्या (4.36) इदं ज्ञायते यद् परम्परागताधुनिकधारायाः शिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकञ्च एतासां बुद्धिनां प्रतिशतानां मध्ये प्रेक्षितभेदः उभयोः स्तरयोः (0.05=1.97, 0.01=2.60) असार्थकः अस्ति तथा च शून्यपरिकल्पना स्वीकृता। अस्मिनेव क्रमे इदमपि स्पष्टं भवति यद् परम्परा–गताधुनिकधारायाः शिक्षिकाणां शैक्षिकभावात्मकाध्यात्मिकञ्च बुद्धिनां प्रतिशतानां मध्ये प्रेक्षितभेदः उभयोः स्तरयोः (0.05=1.98, 0.01=2.61) असार्थकः अस्ति। अत एव शून्यपरिकल्पना स्वीकृता। अत्र वैकल्पिकपरिकल्पना अस्वीकृता। तात्पर्यमिदं यद् आधुनिकधारायाः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च शैक्षिकभावात्म–काध्यात्मिकञ्च बुद्धिषु भेदो नास्ति।

## सारिणी (4.36)

## लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः प्रतिशतमध्ये सार्थकतापरीक्षणम्

| विविधबुद्धयः | लिङ्गम् | धारा | मध्यमानम् (M) | प्रतिशतम् (P) | संपूर्णसंख्या: (N) | टी-मानम् (t-value) | मुक्तांशः ($df = n_1 + n_2 - 2$) | टी-सारिणीमानम् | निर्णयः |
|---|---|---|---|---|---|---|---|---|---|
| शैक्षिकी | M | पर. | 33.85 | 56.42% | 117 | 0.499 | 170 | 0.05स्तरे=1.97<br>0.01स्तरे=2.60 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | आधु. | 36.27 | 60.45% | 55 | | | | |
| | F | पर. | 32.91 | 54.85% | 33 | 0.043 | 126 | 0.05स्तरे=1.98<br>0.01स्तरे=2.61 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | आधु. | 32.65 | 54.42% | 95 | | | | |
| भावात्मिका | M | पर. | 77.37 | 85.97% | 117 | 0.197 | 170 | 0.05स्तरे=1.97<br>0.01स्तरे=2.60 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | आधु. | 76.36 | 84.84% | 55 | | | | |
| | F | पर. | 77.70 | 86.33% | 33 | 0.168 | 126 | 0.05स्तरे=1.98<br>0.01स्तरे=2.61 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | आधु. | 76.62 | 85.13% | 95 | | | | |
| आध्यात्मिका | M | पर. | 113.15 | 75.43% | 117 | 0.014 | 170 | 0.05स्तरे=1.97<br>0.01स्तरे=2.60 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | आधु. | 116.29 | 75.53% | 55 | | | | |
| | F | पर. | 112.88 | 75.25% | 33 | 0.057 | 126 | 0.05स्तरे=1.98<br>0.01स्तरे=2.61 | प्रेक्षितभेदः असार्थकः, शून्यपरिकल्पना स्वीकृता |
| | | आधु. | 112.13 | 74.75% | 95 | | | | |

◆◆◆

## पञ्चमोऽध्यायः

# सामान्यीकरणं निष्कर्षनिरूपणञ्च

### 5.1 भूमिका

अनुसन्धानस्य चरमं लक्ष्यं समस्यासमाधानान्वेषणं समाधानप्रस्तुतीकरणं च भवति। अपरेषु शब्देषु वक्तुं शक्यते यत् अनुसन्धानान्तर्गतं तेषां विषयाणां प्रश्नानां वा समुचितम् उत्तरं प्रदेयं भवति यस्यां दृष्टौ संस्थाप्य अनुसन्धानस्योपक्रमः नियोजितरूपेण कार्यान्वितो भवति। समस्यायाः समाधानम् उत्तरं वा सामान्यीकरणस्य निष्कर्षाणाञ्च रूपे वैज्ञानिक-प्रविधिदृष्ट्या वा अनुसन्धानप्रक्रियायाः परिणतिः कथ्यते। निष्कर्षैः एव अनुसन्धानकार्यस्य सार्थकतत्त्वं सिद्ध्यति। यतो हि निष्कर्षाधारेण कस्मिन्नपि क्षेत्रे महत्त्वपूर्णानि परिवर्तनानि भवन्ति। अत्र वस्तुस्थितिः इदम् अस्ति यत् प्रबुद्धा व्यक्तिः प्रसगैः सम्बद्धानां घटनानां वर्णनं तासां व्याख्यासु भविष्यकथनेषु च कस्यापि सामान्यीकरणम् अवश्यमेव अवलम्बते।

सीमितेषु अर्थेषु तस्याः प्रक्रियायाः अन्तर्गतं लघुसमूहे कृतं परीक्षणं दीर्घसमूहे संपूर्णायां जनसंख्यायां (समग्रे) वा आरोपयितुं शक्यते। एतस्मिन् आगमनात्मिका चिंतनप्रक्रिया निहिता भवति। या एका एतादृशी तार्किकी प्रक्रिया अस्ति यस्यां विचारकः ज्ञातादज्ञातं प्रति अग्रेसरो भवति। अनुसन्धानप्रक्रियायां सामान्यीकरणस्य निष्कर्षस्य च अवस्थाधारः सामग्रीणां विश्लेषणेन निर्वचनेन च उत्सर्गतः सम्बद्धो भवति। अनेन अनुसन्धानस्य परिणामस्य साररूपेण लेखनम् अनुसन्धानान्तर्गतनिरूपितानां परिकल्पनानां परीक्षणाणाम् तदनु निष्कर्षनिरूपणं सम्भवति। प्रस्तुताध्ययने प्राप्तनिष्कर्षाः एतदाधारेण एव अधोलिखितेषु बिन्दुषु प्रस्तूयन्ते-

### 5.2 परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिक-बुद्धेः विश्लेषणात्मकमध्ययनाधारेण सामान्यीकरणं निष्कर्ष-निरूपणञ्च-

परम्परागतधाराया: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धे: विश्लेषणात्मकमध्ययनं प्रयुक्तपरीक्षणे अङ्कितेषु उपपरीक्षणेषु प्राप्तावृत्त्याधारेण कृतम्। भावात्मकाध्यात्मिक-बुद्ध्योः विश्लेषणात्मकमध्ययनं प्रकारत्रयेण कृतम्। प्रथमं- प्रयुक्तमापिकायां श्रेणिनाम् (आम्, नैव, अनिश्चितम्) आधारेण। द्वितीयम्- समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीयम् - समेकितप्राप्ताङ्कानां वर्गानामाधारेण। एतदाधारेण अधोलिखितसामान्यीकरणस्य निरूपणम् अभवत्-

- परम्परागतधाराया: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धि: अंकश्रेण्यां सर्वाधिकास्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धि: वर्गीकरणम् इति श्रेण्यां सर्वाधिकं न्यूनमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: आम् इति श्रेण्यां सर्वाधिकमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: न इति श्रेण्यां सर्वाधिकं न्यूनमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: अनिश्चिता इति श्रेण्याम् आम् इति श्रेण्या: तुलनायां न्यूनं प्रत्युत न इति श्रेण्या: तुलनायाम् अधिकमस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: आत्माभिप्रेरणा इति आयामस्यान्तर्गते सर्वाधिकामस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: आत्मप्रबन्धनम् इति आयामस्यान्तर्गते अतिन्यूनमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: उच्चतम् इति वर्गे सर्वाधिकमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: उच्चतम् इति वर्गे सर्वाधिकम् उच्चतमम् इति वर्गे किञ्चिद् न्यूनं औसतमम् इति वर्गे अत्यल्पमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: पूर्णत: सहमतम् सहमतमञ्च श्रेण्यो: प्राय: समानमेव सर्वाधिकं च अस्ति।

- परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: पूर्णत: असहमतम् इति श्रेण्याम् अतिन्यूनमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: अनिश्चितम् इति श्रेण्यां पूर्णत: सहमतम् सहमतमञ्च द्वयो: श्रेण्यो: तुलनायां न्यूनं प्रत्युत असहमतम् पूर्णत: असहमतञ्च इति द्वयो: श्रेण्यो: तुलनायाम् अधिकमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: असहमतं श्रेण्यां पूर्णत: असहमतं श्रेण्या: तुलनायाम् अधिकमस्ति परञ्च पूर्णत: सहमतम् सहमतमञ्च उभयो: श्रेण्यो: तुलनायां न्यूनमस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: चेतनदशाविस्तार: इति आयामे सर्वाधिकमस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: समन्वयात्मकदृष्टौक्षमता इति आयामे सर्वाधिकं न्यूनमस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: समीक्षात्मकास्तित्वादिचिन्तनम् इति आयामे व्यक्तिगतार्थोत्पादनम् इति आयामस्य तुलनायाम् अधिकं परञ्च चेतनदशाविस्तार: इति आयामस्य तुलनायाम् न्यूनमस्ति।
- व्यक्तिगतार्थोत्पादनम् इति आयामे परात्पराभिज्ञता इति आयामस्य तुलनायाम् अधिकमस्ति। परञ्च परात्पराभिज्ञता इति आयामस्य तुलनायां समन्वयात्मकदृष्टौ क्षमता इति आयामे न्यूनमस्ति।
- परम्परागतधाराया: अधिकांशत: सेवापूर्वशिक्षकेषु उच्चस्तरीया आध्यात्मिक-बुद्धि: अस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धि: उच्चमतम् इति वर्गे सर्वाधिकं न्यूनमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां आध्यात्मिकबुद्धि: उच्चतम् इति श्रेण्यां सर्वाधिकम् औसतम् इति श्रेण्यां किञ्चिद् न्यूनं उच्चमतम् इति श्रेण्याम् अत्यल्पमस्ति।

उपर्युक्तविश्लेषणस्याधारेण निष्कर्षरूपेण वक्तुं शक्नुमः यत् अधिकांशतः परम्परागतधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धिः अंकश्रेण्यां सर्वाधिकमस्ति। श्रेण्याधारेण तथा च समेकितप्राप्ताङ्कानां वर्गानामाधारेण अधिकांशतः परम्परागतधारायाः सेवापूर्वशिक्षकेषु उच्चस्तरीया भावात्मकाध्यात्मिकबुद्धिः अस्ति। आत्माभिप्रेरणा इति आयामस्यान्तर्गते भावात्मकबुद्धेः प्राप्तिः सर्वाधिकम् अथ च चेतनदशाविस्तारः इति आयामस्यान्तर्गते आध्यात्मिकबुद्धेः प्राप्तिः सर्वाधिकमस्ति।

## 5.3 आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः विश्लेषणात्मकमध्ययनाधारेण सामान्यीकरणं निष्कर्षनिरूपणञ्च-

आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः विश्लेषणात्मकम् अध्ययनं प्रयुक्तपरीक्षणे अङ्कितेषु उपपरीक्षणेषु प्राप्तावृत्त्याधारेण कृतम्। भावात्मकाध्यात्मिक-बुद्ध्योः विश्लेषणात्मकमध्ययनम् प्रकारत्रयेण कृतम्। प्रथमं- प्रयुक्तमापिकायां श्रेणिनाम् (आम्, नैव, अनिश्चितम्) आधारेण। द्वितीयम्- समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीयम् - समेकितप्राप्तांकानां वर्गानामाधारेण। एतद्‌धारेण अधोलिखितसामान्यीकरणस्य निरूपणम् अभवत्-

- आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धिः अंकश्रेण्यां सर्वाधिकमस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धिः न्यायवाक्यम् इति श्रेण्यां सर्वाधिकं न्यूनं प्राप्ता।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः आम् इति श्रेण्यां सर्वाधिकमस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः न इति श्रेण्यां सर्वाधिकं न्यूनं प्राप्ता।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः अनिश्चिता इति श्रेण्याम् आम् इति श्रेण्याः तुलनायां न्यूनं परञ्च न इति श्रेण्याः तुलनायाम् अधिकमस्ति।
- समेकितप्राप्ताकानां प्रतिशताधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः आत्माभिज्ञता इति आयामस्यान्तर्गते सर्वाधिकमस्ति।
- समेकितप्राप्ताकानां प्रतिशताधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः आत्मप्रबन्धनम् इति आयामस्यान्तर्गते अतिन्यूनमस्ति।

- समेकितप्राप्ताङ्कानां प्रतिशताधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः आत्माभिप्रेरणा तदनुभूतिञ्च द्वयोः आयामयोः प्रायः समानमेव अस्ति परञ्च आत्माभिज्ञता आयामस्य तुलनायां न्यूनम् आत्मप्रबन्धम् इति आयामस्य तुलनायाम् अधिकमस्ति। सामाजिकदक्षता इति आयामे आत्माभिप्रेरणा तदनुभूतिञ्च द्वयोः आयामयोः तुलनायां न्यूनमस्ति।
- आधुनिकधारायाः अधिकांशसेवापूर्वशिक्षकेषु उच्चस्तरीया भावात्मकबुद्धिः अस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः निम्नतमतिनिम्नवर्गयोः प्रायः न इति अलभत्।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः उच्चतम् इति श्रेण्यां सर्वाधिकम् उच्चतमम् श्रेण्यां किञ्चित् न्यूनम् औसतम् इति श्रेण्याम् अत्यल्पमस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः पूर्णतः सहमतम् इति श्रेण्यां सर्वाधिकमस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः पूर्णतः असहमतम् इति श्रेण्याम् अतिन्यूनमस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः अनिश्चित इति श्रेण्यां पूर्णतः सहमतम् सहमतमञ्च उभयोः श्रेण्योः तुलनायां न्यूनं प्रत्युत असहमतम् पूर्णतः असहमतमञ्च द्वयोः श्रेण्योः तुलनायाम् अधिकमस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः सहमतम् इति श्रेण्यां पूर्णतः सहमतम् श्रेण्याः तुलनायां न्यूनमस्ति तथा च असहमतमिति श्रेण्यां पूर्णतः असहमतम् श्रेण्याः तुलनायाम् अधिकमस्ति।
- समेकितप्राप्तांकानां प्रतिशताधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः समीक्षात्मकास्तित्वादिचिन्तनम् इति आयामे सर्वाधिकमस्ति।
- समेकितप्राप्तांकानां प्रतिशताधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणाम्

आध्यात्मिकबुद्धिः समन्वयात्मकदृष्टौ क्षमता इति आयामे सर्वाधिकं न्यूनमस्ति।

- समेकितप्राप्तांकानां प्रतिशताधारेण आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः चेतनदशाविस्तारः इति आयामे व्यक्तिगतार्थोत्पादनम् इति आयामस्य तुलनायाम् अधिकं परञ्च समीक्षात्मकास्तित्वादिचिन्तनम् इति आयामस्य तुलनायाम् न्यूनमस्ति।
- व्यक्तिगतार्थोत्पादनम् इति आयामे परात्पराभिज्ञता इति आयामस्य तुलनायाम् अधिकमस्ति परञ्च परात्परभिज्ञता इति आयामस्य तुलनायां समन्वयात्मक-दृष्टौ क्षमता इति आयामे न्यूनमस्ति।
- आधुनिकधारायाः अधिकांशसेवापूर्वशिक्षकेषु उच्चस्तरीया आध्यात्मिकबुद्धिः अस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां आध्यात्मिकबुद्धिः उच्चतमम् इति वर्गे सर्वाधिकं न्यूनमस्ति।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणां आध्यात्मिकबुद्धिः निम्नतमतिनिम्नतम् उभयोः वर्गयोः प्रायः न इति प्राप्ता।
- आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः उच्चश्रेण्यां सर्वाधिकम् औसतम् इति श्रेण्यां किञ्चिद् न्यूनम् उच्चतमम् इति श्रेण्याम् अत्यल्पमस्ति।

उपर्युक्तविश्लेषणस्याधारेण निष्कर्षरूपेण वक्तुं शक्नुमः यद् अधिकांशतः आधुनिकधारायाः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धिः अंकश्रेण्यां सर्वाधिकमस्ति। श्रेण्याऽऽधारेण तथा च समेकितप्राप्ताङ्कानां वर्गानामाधारेण अधिकांशतः आधुनिकधारायाः सेवापूर्वशिक्षकेषु उच्चस्तरीया भावात्मकाध्यात्मिका च बुद्धिः अस्ति। आत्माभिज्ञता इति आयामस्यान्तर्गते भावात्मकबुद्धेः प्राप्तिः सर्वाधिकम् अथ च समीक्षात्मकास्तित्ववादिचिन्तनम् इति आयामस्यान्तर्गते आध्यात्मिकबुद्धेः प्राप्तिः सर्वाधिकमस्ति।

## 5.4 परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धेः तुलनात्मकमध्ययनाधारेण सामान्यीकरणं निष्कर्ष-निरूपणञ्च-

परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धे: तुलनात्मकमध्ययनं शैक्षिकबुद्धे: मापनाय प्रयुक्तपरीक्षणे अङ्कितेपु प्रत्युपपरीक्षणेषु 'शब्दार्थ:, सादृश्यता, वर्गीकरणम्, अंकश्रेणी, कूटसंकेतरूपान्तरणं, न्यायवाक्यं' प्राप्तावृत्त्याधारेण कृतम्। परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां भावात्मकाध्यात्मिकबुद्ध्यो: विश्लेषणात्मकमध्ययनं प्रकारत्रयेण कृतम्। प्रथमं तावत् भावात्मकबुद्धे: मापयितुं प्रयुक्ताया: मापिन्या: श्रेणिनामाधारेण। द्वितीये समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीये समेकितप्राप्तांकानां वर्गनामाधारेण। उभयो: धारयो: सेवापूर्वशिक्षकाणां शैक्षिकभावात्मकाध्यात्मिकबुद्धे: तुलनात्मकमध्ययनं तयो: त्रयाणां बुद्धीनां परीक्षण प्राप्तसमेकितप्राप्ताङ्कानां प्रतिशताधारेण कृतम्। एतदाधारेण अधोलिखितसामान्यीकरणस्य निरूपणम् अभवत्–

- परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धि: अंकश्रेण्यां सर्वाधिकमस्ति।
- परम्परागतधाराया: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धि: वर्गीकरणम् इति श्रेण्यां सर्वाधिकन्यूनं परञ्च आधुनिकधाराया: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धि: न्यायवाक्यम् इति श्रेण्यां सर्वाधिकन्यूनं अस्ति।
- परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां शैक्षिकबुद्धे: प्राप्ति: कूटसंकेतनरूपान्तरणम् इति उप-परीक्षणे प्राय: समानमेव अस्ति।
- पम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: आम् इति श्रेण्यां सर्वाधिकमस्ति।
- परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: न इति श्रेण्यां सर्वाधिकं न्यूनमस्ति।
- परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: अनिश्चितम् इति श्रेण्यां समानमेव दृष्टा।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागतधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: आत्माभिप्रेरणा इति आयामस्यान्तर्गते सर्वाधिकमस्ति प्रत्युत आधुनिकधाराया: सेवापूर्वशिक्षकाणां भावात्मकबुद्धि: आत्माभिज्ञता इति आयामे सर्वाधिकमस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागताधुनिकधारयो: सेवापूर्वशिक्षकाणां

भावात्मकबुद्धिः आत्मप्रबन्धनम् इति आयामस्यान्तर्गते अतिन्यूनम् समानमपि अस्ति। द्वयोः धारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः तद्नुभूतिः इति आयामे समानमेव अलभत।

- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः सामाजिकदक्षता इति आयामे आत्माभिप्रेरणा आत्माभिज्ञतया च उभयोः आयामयोः तुलनायां न्यूनमस्ति परञ्च आत्मप्रबन्धनम् इति आयामस्य तुलनायाम् अधिकमस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकेषु उच्चस्तरीया भावात्मकबुद्धिः अस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः निम्नतमति-निम्नतम् वर्गयोः प्रायः न इति अलभत।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः उच्चतम् इति वर्गे सर्वाधिकमस्ति। आधुनिकधारायाः शिक्षकाणां भावात्मकबुद्धिः उच्चतमम् इति वर्गे किञ्चिद् न्यूनम् औसतम् इति वर्गे अत्यल्पम् अलभत। परञ्च परम्परागतधारायाः शिक्षकाणां भावात्मकबुद्धिः औसतम् इति वर्गे किञ्चिद् न्यूनम् उच्चतमम् इति श्रेण्याम् अत्यल्पम् अलभत्।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः पूर्णतः सहमतम् इति श्रेण्यां सर्वाधिकमस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः पूर्णतः असहमतम् इति श्रेण्याम् अतिन्यूनमस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां आध्यात्मिकबुद्धिः अनिश्चितम् इति श्रेण्यां पूर्णतः सहमतऽसहमतम् इति उभयोः श्रेण्योः तुलनायां न्यूनं प्रत्युत असहमतम् पूर्णतः असहमतमञ्च श्रेण्योः तुलनायाम् अधिकमस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः सहमतम् श्रेण्यां पूर्णतः सहमतम् श्रेण्याः तुलनायां न्यूनमस्ति तथा च असहमतम् श्रेण्यां पूर्णतः असहमतम् श्रेण्याः तुलनायाम् अधिकमस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागतधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः चेतनदशाविस्तारः इति आयामे सर्वाधिकमस्ति। प्रत्युत

आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः समीक्षात्मकास्तित्वादिचिन्तनम् इति आयामे सर्वाधिकमस्ति।

- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां आध्यात्मिकबुद्धिः समन्वयात्मकदृष्टौ क्षमता इति आयामे सर्वाधिकं न्यूनमस्ति।
- समेकितप्राप्ताङ्कानां प्रतिशताधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः चेतनदशाविस्तारः इति आयामे समाना तथा च समन्वयात्मकदृष्टौ क्षमता इति आयामस्य तुलनायाम् अधिका अस्ति।
- व्यक्तिगतार्थोत्पादनम् इति आयामे अपि उभयोः धारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः प्रायः समाना चेतनदशाविस्तारः इति आयामस्य तुलनायां न्यूना परञ्च परात्परभिज्ञता इति आयामस्य तुलनायाम् अधिका अस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकेषु उच्चस्तरीया आध्यात्मिकबुद्धिः अस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः उच्चतमम् इति वर्गे सर्वाधिकं न्यूनमस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः निम्नतमतिनिम्नतमवर्गयोः प्रायः न इति अस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः उच्चश्रेण्यां सर्वाधिकम् औसतम् इति श्रेण्यां किञ्चिद् न्यूनम् उच्चतमम् इति श्रेण्याम् अत्यल्पमस्ति।

उपरोक्तविश्लेषणस्याधारेण निष्कर्षरूपेण वक्तुं शक्नुमः यद् अधिकांशतः परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धिः अंकश्रेण्यां सर्वाधिकमस्ति। उभयोः धारयोः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः प्राप्तिः कूटसंकेतनरूपान्तरणम् इति उप-परीक्षणे प्रायः समाना एव अस्ति। श्रेण्याऽऽधारेण तथा च समेकितप्राप्ताङ्कानां वर्गानामाधारेण उभयोः धारयोः अधिकांशतः सेवापूर्वशिक्षकेषु उच्चस्तरीया भावात्मकाध्यात्मिकबुद्धिः अस्ति। परम्परागतधारायाः सेवापूर्वशिक्षकाणां भावात्मकबुद्धिः आत्माभिप्रेरणा इति आयामस्यान्तर्गते सर्वाधिकं परञ्च आधुनिकधारायाः

सेवापूर्वशिक्षकाणाम् आत्माभिज्ञता इति आयामस्यान्तर्गते सर्वाधिकमस्ति। परम्परागत-धारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः चेतनदशाविस्तारः इति आयामे सर्वाधिकं प्रत्युत आधुनिकधारायाः सेवापूर्वशिक्षकाणाम् आध्यात्मिकबुद्धिः समीक्षात्मकास्तित्वादिचिन्तनम् इति आयामे सर्वाधिकमस्ति। परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकेषु उभयोः धारयोः शिक्षकाणां भावात्मकबुद्धिः उच्चस्तरीया अस्ति। आध्यात्मिकबुद्धेः प्राप्ति समानमेव अस्ति। आधुनिकधारायाः शिक्षकाणां शैक्षिकबुद्धिः किञ्चिद् अधिका अस्ति।

## 5.5 लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिक-भावात्मकाध्यात्मिकबुद्धेः तुलनात्मकमध्ययनाधारेण सामान्यीकरणं निष्कर्षनिरूपणञ्च-

लिङ्गाधारेण परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शैक्षिकबुद्धेः मापयितुं प्रयुक्तपरीक्षणे अङ्कितेषु प्रत्येकेषु उपपरीक्षणेषु (शब्दार्थः, सादृश्यता, वर्गीकरणम्, अंकश्रेणी, कूटसंकेतरूपान्तरणं, न्यायवाक्यम्) प्राप्तावृत्त्याधारेण कृतम्। परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां भावात्मकबुद्धेः लिङ्गाधारेण विश्लेषणात्मक-मध्ययनं प्रकारत्रयेण कृतम्। प्रथम तावद् भावात्मकबुद्धेः मापयितुं प्रयुक्तायाः मापिन्याः श्रेणीनामाधारेण। द्वितीये समेकितप्राप्ताङ्कानां प्रतिशताधारेण। तृतीये समेकितप्राप्ताङ्कानां वर्गानामाधारेण। एतदाधारेण अधोलिखितसामान्यीकरणस्य निरूपणम् अभवत्-

- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च शैक्षिकबुद्धिः अंकश्रेण्यां सर्वाधिकमस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च शैक्षिकबुद्धिः वर्गीकरणम् इति श्रेण्यां सर्वाधिकन्यूनं दृष्टम्।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च शैक्षिकबुद्धिः शब्दार्थः इति श्रेण्यां कूटसंकेतरूपान्तरणम् इति श्रेण्याः तुलनायां न्यूनं परञ्च न्यायवाक्यम् इति श्रेण्याः तुलनायाम् अधिकमस्ति।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणां शिक्षिकाणाञ्च शैक्षिकबुद्धिः सादृश्यता इति श्रेण्यां कूटसंकेतनरूपान्तरणम् इति श्रेण्याः तुलनायाम् अधिकमस्ति।

- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् अथ च शिक्षिकाणां भावात्मकबुद्धिः आम् इति श्रेण्यां सर्वाधिकम् अस्ति। न इति श्रेण्यां उभयोः धारयोः शिक्षकाणाम् अथ च शिक्षिकाणां भावात्मकबुद्धिः सर्वाधिकन्यूनं दृष्टम्।
- परम्परागताधुनिकधारयोः सेवापूर्वशिक्षकाणाम् अथ च शिक्षिकाणां भावात्मकबुद्धिः आम इति श्रेण्यां सर्वाधिकम् अनिश्चितम् इति श्रेण्यां किञ्चिद् न्यूनं न इति श्रेण्याम् अत्यल्पमस्ति।
